PG K S2 04 (DSC)

द्विवर्षीयस्नातकोत्तरः पाठ्यक्रमः

(चि. बि. चि. एच. एन. इ. पि. २०२० अनुसारम्)

द्वितीयषाण्मासिकः

व्याकरणम्

संस्कृतम्



पद्मनाथ-गोहाञिबरुवा-मानविकी-विद्या-अध्ययन-सत्रम्

कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

विषयविशेषज्ञाः

१) आचार्य प्रह्लादः रा. जोशी, कुलपतिः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी
२) अध्यापिका सुदेष्णा भट्टाचार्या, अध्यक्षा, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः
३) प्रो. जगदीश शर्मा, अध्यापकः, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः

पाठ्यक्रम-समन्वयकः : डॉ. इन्द्रानी डेका, सहायकाचार्या, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

पिङ्कु कलिता, सहायकाचार्यः, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

पाठ्यक्रम- प्रस्तुतकर्तारः

अध्यायाः	**प्रस्तुतकर्तारः**
१, २, ८, १२, १३, १४	नीलकमलपण्डितः, सहायकाचार्यः, संस्कृतविभागः, दरङ्गमहाविद्यालयः, तेजपुरम्, शोणितपुरम्, असमः
३	अध्यापिका सुदेष्णा भट्टाचार्या, अध्यक्षा, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः
४	डॉ. गायत्री शर्मा, सहाचार्या, संस्कृतविभागः, सन्दिकै-बालिका-महाविद्यालयः, गुवाहाटी ड० इन्द्रानी डेका, सहायकाचार्या, कृष्णकान्त सन्दिकै राज्यिक मुक्त विश्वविद्यालयः
५, ९, १०	डॉ. भाग्यश्री शर्मा, सहायकाचार्या, असमीयाविभागः, डिब्रूगढ़विश्वविद्यालयः
६,७	डॉ. हीरामणिगोस्वामी, सहायकाचार्या, संस्कृतविभागः,बि. बरुवा कलेज (स्वतन्त्रः), गुवाहाटी
११	ड० निदर्शना शर्मा, अतिथि अध्यापिका, संस्क्रतविभागः,बि. बरुवा कलेज (स्वतन्त्रः), गुवाहाटी ड० इन्द्रानी डेका, सहायकाचार्या, कृष्णकान्त सन्दिकै राज्यिक मुक्त विश्वविद्यालयः

सम्पादनसमितिः

विषयवस्तु-सम्पादना: प्रो. जगदीश शर्मा, अध्यापकः, संस्कृतविभागः, गुवाहाटीविश्वविद्यालयः

प्रारूप-सम्पादना : पिङ्कु कलिता, सहायकाचार्यः, संस्कृतविभागः, कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयः

This Self Learning Material (SLM) of the Krishna Kanta Handiqui State Open University is made available under a Creative Commons Attribution-Non-Commercial-Share Alike 4.0 License (international)

http://creativecommons.org/licenses/by-nc-sa/4.0/

ISBN: 978-91-6587-XX-X

प्रथमप्रकाशः – मार्च, 2025

Headquarters : Patgaon, Rani Gate, Guwahati-781017

City Office : Resham Nagar, Khanapara, Guwahati-781022 Wed : www.kkhsou.in

पाठ्यविषयस्य परिचयः : व्याकरणम्

कृष्णकान्त-सन्दिकै-राज्यिक-मुक्त-विश्वविद्यालयेन गृहीतस्य स्नातकोत्तरपर्यायगतसंस्कृतविषयस्य द्वितीयषाण्मासिके प्रथमपत्ररूपेण 'व्याकरणम्' इति पाठ्यविषयः प्रस्तूयते । अस्मिन् पाठ्यविषये संस्कृतव्याकरणसन्दर्भे आलोच्यते । तस्मादेव अस्य पाठ्यविषयस्य नामकरणं वर्तते 'व्याकरणम्' इति । पाठ्यविषयेऽस्मिन् चतुर्दशोऽध्यायाः सन्ति। ते अध्यायाः क्रमपूर्वकं यथा -

१) संस्कृतव्याकरणस्योत्पत्तिः विकासश्च

२) पाणिनीयव्याकरणसम्प्रदायः - सामान्याध्ययनम्

३) महाभाष्यम् (पस्पशाह्निकम्) - सामान्याध्ययनम्

४) अपाणिनीयव्याकरणसम्प्रदायः - सामान्याध्ययनम्

५) संज्ञाप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

६) अजन्तपुंलिङ्गप्रकरणम् (संख्यावाचकशब्दः/पुरणवाचकशब्दः)

७) धातुरूपाणि

८) सन्धिप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

९) कारकप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

१०) समासप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

११) कृत्प्रत्ययप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

१२) तद्धित्प्रत्ययप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

१३) स्त्रीप्रत्ययप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

१४) वाच्यम्

पाठ्यविषयस्यास्य अध्ययनसमये मूलपाठेन सह वामपार्श्वे तथा दक्षिणपार्श्वे केचन चतुर्भुजाकृतिषु मञ्जुषासु विषयाः परिलक्ष्यन्ते । ते विषयाः मूलपाठेषु उल्लिखिताः महत्त्वपूर्णाः धारणाः सरलरूपेण अवबोधने सहायकं भविष्यन्ति । 'ज्ञातव्यम्' इत्यस्मिन् अंशे पाठेन सह सम्बद्धानां महत्त्वपूर्णानां तथ्यानां वर्णनं प्राप्यते । प्रत्येकं शाखाया अध्ययनान्ते 'अग्रगत्याः निरीक्षणम्' इत्यंशे प्रदीयमानाः प्रश्ना अध्ययनस्य प्रगतये सुविधां प्रदास्यन्ति । अध्ययनात्परं उद्धृतानां प्रश्नानाम् उत्तराणि विलिख्य पाठस्यान्तिमे प्रदीयमानः 'अग्रगत्याः निरूपणम्' इत्यस्मिन् अंशेन सह यदि सुमेलयिष्यन्ति तर्हि शिक्षार्थीनां कृते लाभप्रदायकं भविष्यन्ति । अध्यायेऽस्मिन् आलोचितानां विषयाणां विस्तृतरूपेण अध्ययनाय 'ज्ञानाधिक्यम्' इत्यस्मिन् अंशे उल्लिखिताः ग्रन्थाः सहायकाः

भविष्यन्ति । अध्यायस्यान्तिमे केचन 'अभ्यासप्रश्नाः' प्रदीयन्ते । अन्तिमाध्यायस्यान्ते केषाञ्चन सहायकग्रन्थानां नामानि उल्लिख्यन्ते । तेषां ग्रन्थानां सहायेन अस्मिन् पाठ्यविषये उद्धृता अध्यायाः प्रस्तूयन्ते । यदि भवन्तो विस्तृतरूपेण कमपि विषयं ज्ञातुमिच्छन्ति तर्हि तान् ग्रन्थान् अध्ययनं कर्तुं शक्नुवन्ति ।

विषयपरिकल्पनम्

अध्यायः १ : संस्कृतव्याकरणस्योत्पत्तिः विकासश्च

व्याकरणस्य स्वरूपम्, व्याकरणस्याविर्भावः, व्याकरणस्य भेदाः, पाणिनिपूर्ववर्तिनो वैयाकरणाः, पाणिन्यस्मृता आचार्याः, पाणिनिस्मृता आचार्याः, पाणिनीयव्याकरणम्, पाणिन्युत्तरव्याकरणम्, पाणिन्यनुगाः वैयाकरणाः, अपाणिनीयवैयाकरणाः

अध्यायः २ : पाणिनीयव्याकरणसम्प्रदायः – सामान्याध्ययनम्

त्रिमुनिव्याकरणम्, पाणिनिः अष्टाध्यायी च, कात्यायनः वार्तिकञ्च, पतञ्जलिः महाभाष्यञ्च, पाणिनीयसम्प्रदायस्य अन्ये ग्रन्थाः

अध्यायः ३ : महाभाष्यम् (पस्पशाह्निकम्) – सामान्याध्ययनम्

महाभाष्यस्य सामान्यपरिचयः, रचकः पतञ्जलिः, विषयवस्तु, पस्पशाह्निकस्य परिचयः, पस्पशाह्निकगतस्य शब्दस्य अवधारणम्, शब्दलक्षणम्, पस्पशाह्निकप्रतिपादितं व्याकरणावधारणम्, व्याकरणपाठस्य प्रयोजनानि, व्याकरणस्य लक्षणम्

अध्यायः ४ : अपाणिनीयव्याकरणसम्प्रदायः - सामान्याध्ययनम्

कातन्त्रव्याकरणम्, चान्द्रव्याकरणम्, जैनेन्द्रव्याकरणम्, सारस्वतव्याकरणम्, मुग्धवोधव्याकरणम्

अध्यायः ५ : संज्ञाप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

माहेश्वरसूत्राणि शिवसूत्राणि वा, प्रत्याहारगठनप्रक्रिया, पाणिनिव्याकरणे प्रयुकाः प्रत्याहाराः, प्रत्याहारस्य भूमिका

अध्यायः ६ : अजन्तपुंलिङ्गप्रकरणम् (संख्यावाचकशब्दः/पुरणवाचकशब्दः)

संस्कृतपदानां लिङ्गनिर्णयः, अजन्तपुंलिङ्गशब्दा:, सर्वनामशब्दा:, संख्यावाचकशब्दा:, पूरणवाचकशब्दा

अध्यायः ७ : धातुरूपाणि

संस्कृतभाषायां व्यवहृतानां कतिपयानां धातूनां साधारणधारणा, धातूनां प्रकारभेदाः, धातुरूपाणां पुरुषैः सह सम्बन्धः, क्रियायाः कालः लकारश्च, गुणानुसारं भिन्नधातूनां धारणा रूपाणि च, भ्वादिगणीयधातूनां रूपाणि, अदादिगणीयधातूनां रूपाणि, दिवादिगणीयधातूनां रूपाणि

अध्यायः ८ : सन्धिप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

अच्-सन्धिप्रकरणम्, हल्-सन्धिप्रकरणम्, विसर्गसन्धिप्रकरणम्

अध्यायः ९ : कारकप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

कारकसंज्ञा, कारकविभक्ति उपपदविभक्तेः वलीयसी, कारकप्रकारा:

अध्यायः १० : समासप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

समासलक्षणम्, समासस्य साधारणनियमाः, समासप्रकाराः

अध्यायः ११ : कृत्प्रत्ययप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

कृत्प्रत्ययस्य विभाजनम्, कृत्प्रत्ययस्य व्यवहारः, कृत्प्रत्यया

अध्यायः १२ : तद्धित्प्रत्ययप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

तद्धितप्रकरणम्, साधारणतद्धितप्रत्ययाः, अपत्याधिकारः, रक्ताद्यर्थकाः, चातुरर्थिकाः, शैषिकाः, विकारार्थ काः ठगधिकारः, यदधिकारः, छयतोरधिकारः, ठञधिकारः, त्वतलोरधिकारः, भावनाद्यर्थकारः, मत्वर्थीयाः, प्राग्दिशीयाः, प्रागिवीया, स्वार्थिकाः

अध्यायः १३ : स्त्रीप्रत्ययप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

प्रत्ययभेदा:, स्त्रीप्रत्यया: (टाप्, ङीप्, ङीष्, ऊङ्, ङीन्, तिः, चाप्)

अध्यायः १४ : वाच्यम्

वाच्यप्रकाराः, केचन विशेषनियमाः, द्विकर्मकधातूनां वाच्यम्, केषाञ्चित् प्रचलितधातूनां कर्म-भाववाच्ययोः संक्षिप्तीकरणम्, वाच्ये प्रत्ययव्यवहारः, वाच्यपरिवर्तनम्, प्रचल्यमानधातूनां कर्मवाच्ये / भाववाच्ये विस्तृतिरूपम्

अध्यायः १ : संस्कृतव्याकरणरस्योत्पत्तिः विकासश्च

अध्यायस्य संरचना

१.१ उद्देश्यम्

१.२ परिचयः

१.३ व्याकरणस्य स्वरूपम्

१.४ व्याकरणस्याविर्भावः

१.५ व्याकरणस्य भेदाः

१.६ पाणिनिपूर्ववर्तिनो वैयाकरणाः

१.६.१ पाणिन्यस्मृता आचार्याः

१.६.२ पाणिनिस्मृता आचार्याः

१.७ पाणिनीयव्याकरणम्

१.७.१ पाणिनि अष्टाध्यायी च

१.८ पाणिन्युत्तरव्याकरणम्

१.८.१ पाणिन्यनुगाः वैयाकरणाः

१.८.२ अपाणिनीयवैयाकरणाः

१.९ अध्यायस्य असमीयाभाषायां सारांशः

१.१०अध्यायात् किमवगतम्

१.११ज्ञानाधिक्यम्

१.१२अग्रगत्याः निरूपणम्

१.१३ अभ्यासप्रश्नाः

१.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनादनन्तरं भवन्तः –

- व्याकरणस्य स्वरूपविषये ज्ञास्यन्ति।
- व्याकरणस्य आविर्भावविषये ज्ञातुं शक्ष्यन्ति।
- व्याकरणस्य भेदानां विषये ज्ञातुं प्रभविष्यन्ति।
- प्राक्पाणिनीयाचार्याणां विषये ज्ञास्यन्ति।
- मुनित्रयविषये ज्ञातुं प्रभविष्यन्ति।

- पाणिन्युत्तरवैयाकरणानां विषये ज्ञातुं शक्ष्यन्ति।

१.२ परिचयः

भाषैव मानावानां भावाभिव्यक्तये सशक्तं साधनम् । यद्यपि आकारेङ्गितचेष्टादिभिः साधनैः भावाभिव्यक्तिः सम्भवति ,तथापि न तत्र सम्पूर्णता विद्यते भाषैव सा शक्तिर्यया मनुष्यः पशुतो भिद्यते ,तेनैव कारणेन सा वाङ्नाम देवी शक्तिः। उक्तञ्च ऋग्वेदे – 'तां विश्वरूपाः पशवो वदन्ति' इति। एवं हि देवतोत्पादिता भाषा क्रमेण मनुष्येण गृहीतेति मन्यते । अस्मात् शब्दाद् अयमर्थो बोद्धव्य इति ईश्वरेच्छैव शब्दशक्तिरिति । देवतायत्ता भाषा एकैव आसीत्, किन्तु सा मानवैः यदा गृहीता, तदा मानवानामल्पबुद्धित्वात् भाषाऽपि भिन्ना जाता। देवभाषा हि संस्कृतपदेन उच्यते आचार्यैः। "संस्कृतं नाम दैवीवागन्वाख्यातामनीषिभिः" इति वचनात्। तस्या दैवीवाचः संस्कृताभिधानं प्रकृतिप्रत्ययादिविभागैः संस्कृतत्वादिति मन्यते। विश्वस्मिन् विश्वे संस्कृतमेव प्राचीनभाषेति नास्ति कश्चन सन्देहः। कस्या अपि भाषायाः स्वरूपज्ञानाय व्याकरणस्य मुख्या भूमिका वर्तते। सुविदितमेव यत् नामरूपात्मकेऽस्मिन् जगति एकमपि ज्ञानं शब्दादृते न सम्भवति । सर्वविधं ज्ञानं तु शब्दानुविद्धमेव शब्देन भासते। यथोक्तम् –

"न सोऽस्ति प्रत्ययलोके यश्शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥"(वाक्यपदीयम्,ब्रह्मकाण्डम् १२३)

एवं दैवीवाग्रूपा संस्कृतभाषा अपौरुषेयाख्यवेदवत अनादिकालादेव प्रचलितेति मन्यते । अपि च तद्वत्संस्कृतभाषायाः व्याकरणमपि अनादिकालात्प्रवाहिता इति तु नास्ति सन्देहः। संस्कृतव्याकरणस्य स्वरूप-परम्परा-भेदादिविषये अग्रे आलोच्यते।

१.३ व्याकरणस्यस्वरूपम्

सर्वार्थानांव्याकरणाद्व्याकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरतीति तत्तथा ॥ (महाभारतम्,उद्योगपर्वः – ४२/६०)

सामान्यतो व्याकरणपदेन शब्दानुशासनशास्त्रं ज्ञायते । व्याक्रियन्तेऽसाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते येन तत् व्याकरणमिति व्युत्पत्या वि-आङ्-पूर्वककृधातोः, डुकृञ्-करणे (करणेऽर्थे ल्यूट्प्रत्यये भूते सति व्याकरणमिति पदं निष्पद्यते । व्याकरणशब्दः शब्दानुशासनेऽर्थे योगरूढः । शब्दानुशासनञ्च शब्दा अनुशिष्यन्ते अप शब्देभ्यः विविच्य ज्ञाप्यन्तेऽनेनेति। इदं हि व्याकरणस्यान्वर्थं नाम। अपि च व्याकरणशास्त्रं शब्दशास्त्रनाम्नाऽपि व्यवहृयते।

यद्यपि शब्दशास्त्रस्यास्य व्याकरणनाम्ना एव सर्वत्र प्रसिद्धिः, तथापि महाभाष्यकारः पतञ्जलि इदं शब्दानुशासननाम्ना व्यवहरति। यथा- "अथ शब्दानुशासनम्। केषां शब्दानां वैदिकानां लौकिकानाञ्च" इति। तत्र महाभाष्ये प्रसङ्गात्। तेन व्याकरणं नाम प्रकृतिप्रत्ययविभागेन शब्दसाधुत्वविवेचकं शास्त्रं व्याकरणमिति।

अपि च "एकः शब्दः सम्यक्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुक्भवति" इति शास्त्रानुसारेण साधुशब्दज्ञाने प्रयोगे च धर्मः, न हि व्याकरणज्ञानम् अन्तरेण साधुशब्दान् व्यवहर्तुं शक्नुवन्ति जना इति निश्चितम् । एवं को हि व्याकरणमिति पदार्थ इति जिज्ञासायाम् उच्यते भगवता पतञ्जलिना- "लक्ष्यलक्षणे व्याकरणम्" इति । अत्र लक्ष्यः शब्दः लक्षणञ्च सूत्रम् । किञ्च रत्नप्रभोद्भासितप्रोढमनोरमाभूमिकायां व्याकरणस्य लक्षणमेवं प्रदत्तम्- "शब्दसाधुत्वबोधकः सूत्रात्मकः लक्ष्यलक्षणात्मको वा ग्रन्थविशेषः" इति । कालिकाप्रसादशुक्लाचार्येण हि व्याकरणत्वम् अर्थविशिष्टशब्दनिष्ठपुण्यजनकतावच्छेदकसाधुजातिविशेषव्यञ्जकम् । गोपथब्राह्मण-मुण्डकोपनिषत्प्रभृतिग्रन्थेषु शब्दशास्त्रनिमित्तं व्याकरणशब्दः प्रयुक्तो दृश्यते । गोपथब्राह्मणे यथा- "ओङ्कारं पृच्छामः को धातुः, किं प्रातिपदिकं, किं नामाख्यातं, किं लिङ्गं, किं वचनं, का विभक्तिः, कः प्रत्ययः, कः स्वरः,उपसर्गो, निपातः, किं वै व्याकरणं, को विकारः, को विकारो कति मात्रः, कति वर्णः, कत्यक्षरः, कति पदः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम्" इति । (गोपथ ब्राह्मणम्- १/२४)

तथा च रामायणे –

"नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम ।
बहु व्याहरताऽनेन न किञ्चिदपभाषितम् ॥" (रामायणम्-३/३/२९)

तथा च व्याकरणं हि वेदपुरुषस्य मुखत्वेन उपमीयते । उक्तञ्च पाणिनीयशिक्षायां 'मुखं व्याकरणं स्मृतम्' इति ।

१.४ व्याकरणस्याविर्भावः

सकलशास्त्रशिरोभूतं वेदपुरुषस्य मुखत्वेन स्मृतं व्याकरणं कदा आरभ्य प्रवर्तितमभूत् इति न शक्यते तत्त्वतो निरूपयितुम् । तथापि पण्डिताः कथयन्ति यत् व्याकरणस्य बीजं वैदिकसंहितासु दृश्यते । महामुनिर्यास्को महाभाष्यकारपतञ्जलिः चापि स्वस्वग्रन्थे एतादृशान् मन्त्रान् स्मरति येषु व्याकरणस्य स्वरूपं सूचितमस्ति । यथा –

चत्वारि शृङ्गा त्रयोऽस्य पादा
द्वे शीर्षे सप्तहस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवोमर्त्याँआविवेश ॥ (ऋग्वेदः४/५८/३)

अस्य मन्त्रस्य इत्थमाशयो व्याख्यायत् चत्वारि शृङ्गा इति नाम-आख्यात-उपसर्ग-निपाताः, त्रयः पादा इति त्रीणि वचनानि, त्रयः पुरुषाश्च, द्वे शीर्षे इति सुबन्ततिङन्तरूपे, सप्तहस्तास इति सप्त विभक्तयः, त्रिधा बद्ध इति कृदन्ततद्धितान्तसमासलेन नियमितः रोरवीति सर्वानपि शेते, महान् देव इति देवी वाक्, मर्त्यान् आ विवेशेति ।

शुक्लयजुर्वेदेऽपि उक्तमेवम् "दृष्टा रूपे व्याकरोत्सत्यानृते प्रजापतिः" इति । (शुक्लयजुर्वेदः- १९/७७) संहितानन्तरं ब्राहमणसाहित्येऽपि व्याकरणास्तित्वविषये बहुत्र बहुधोक्तमस्ति । गोपथब्राहमणेऽपि व्याकरणस्य विषये एवमुक्तं वर्तते – "ओङ्कारं पृच्छामः, को धातुः किं प्रातिपदिकम्" इत्यादि (गोपथ ब्राह्मणम् १/२४)

ऐतरेयब्राहमणेऽपि "सप्तधा वै वागभवत" इति प्रोक्तम् । तत्र भट्टभास्करेण 'सप्तधा' इति पदेन सप्तविभक्तयः गृहीतः । तस्माद् व्याकरणस्य प्राचीनत्वं वैदिकवाङ्मयादपि इति तु युधिष्ठिरमीमांसकमतत्यन्तमेव समीचीनं प्रतिभाति । संस्कृतभाषा आदौ यौगिकपदबल्यासीत् क्रमशः सा रुढिमाश्रितेति कथ्यते । यौगिकता अस्याः स्वभावसिद्धा । सा च प्रकृतिप्रत्ययविभागेन एव ज्ञायते प्रतिपदपाठादेव भाषाज्ञानस्य असम्भवात् । तत्तत् पदानां प्रकृतिप्रत्ययविभागेन सामान्यीकरणं यदैव अनुभूतं तदैव व्याकरणं प्रवर्तितम् । एतत्प्रवर्तनस्य यदि मूलसंहितायाः प्राक्काले न सम्भवति चेत् तत्सहैव तु निश्चयमेव । एवं मूलसंहिताकालादाराभ्य पतञ्जलिपर्यन्तं व्याकरणशास्त्रस्य प्रवर्तनकालं सञ्चरति । तदनन्तरं व्याकरणस्य व्याख्या काल आगच्छति ।

व्याकरणशास्त्रस्य प्रवर्तकानां विषये नैकानि मतानि दृश्यन्ते । तेषु प्रमुखप्रवर्तकानां विषये अत्र उल्लिख्यते –

ब्रह्मा – भारतीयज्ञानपरम्परायां सर्वविधविद्यानां प्रवक्ता ब्रह्मा इति मन्यते । एवं सर्वशास्त्रशिरोभूतं व्याकरणमपि आदौ ब्रह्मणा एव प्रवर्तितमिति मन्यते । एतद्विषये ऋक्तन्त्रे एवं प्राप्यते – "ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः" इति । (१/४)

बृहस्पतिः – ऋक्तन्त्रानुसारं व्याकरणशास्त्रस्य द्वितीयः प्रवक्ता बृहस्पतिः । अङ्गिरः पुत्रत्वात् स अङ्गिरा (अङ्गिरस) इति नाम्नाऽपि प्रसिद्धः । कोषग्रन्थेषु अयं सुराचार्य इति प्रोक्तः । देवगुरुबृहस्पतिनापि बहूनां शास्त्राणां प्रवचनं कृतम् । महाभारतानुसारं बृहस्पतिः समस्तवेदाङ्गानां प्रवचन कर्तेति । यथोक्तम् –
'वेदाङ्गानि बृहस्पतिः'(महाभारतम्, शान्तिपर्व २१०) ।

इन्द्रः – एवं ब्रह्मणा प्रोक्तं व्याकरणं बृहस्पतिरधीतवान् । बृहस्पतिश्च इन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच । तावत्पर्यन्तं प्रकृतिप्रत्ययविभागो नाभवत् । आदौ इन्द्रेण एव प्रत्ययविभागद्वारा शब्दोपदेशप्रक्रियायाः प्रकल्पना कृता । एतत्प्रमाणं तैत्तिरीयसंहितायां प्राप्यते –
"वाग्वै पराच्यव्याकृतावदत् । ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्वितितामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्" इति । (तैत्तिरीयसंहिता -६/४/७)

व्याकरणशास्त्रस्य द्वौ सम्प्रदायौ अत्यन्तं प्रसिद्धौ । एक ऐन्द्र अपरश्च माहेश्वरः । कातन्त्रादीनि हि व्याकरणानि ऐन्द्रसम्प्रदायस्य शाखाप्रशाखारूपाणि । तथा पाणिन्यादयो हि माहेश्वरसम्प्रदायस्य व्याख्यातारः । महाभारतस्य शान्तिपर्वान्तर्गते शिवसहस्रनामस्तोत्रे बृहस्पति शिवोऽपि षडङ्गानां प्रवचनमकरोदिति समुल्लिखितं वर्तते । यथोक्तम्- "वेदात् षडङ्गाद्धृत्य"(शान्तिपर्वः २८४/१९२) ।

एवं व्याकरणप्रवर्तने कतर आद्य इति प्रश्ने समुदिते उच्यते सारस्वरभाष्ये –

"समुद्रवद्व्याकरणं महेश्वरे तदर्द्धकुम्भोद्धरणं बृहस्पतौ ।
तद्भागधेयञ्च शतं पुरन्दरे कुशाबिन्दूत्पतितं हि पाणिनौ ॥"

अनेन तु ऐन्द्रापेक्षया बार्हस्पत्यस्य तदपेक्षयापि माहेश्वरस्य व्याकरणस्य प्राचीनत्वं सिद्ध्यति । वस्तुतस्तु शब्दतत्त्वं तु अनादिरेव मन्यते । तदुच्यते –

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥"(वाक्यपदीयम्, ब्रह्मकाण्डम् १)

१.५ व्याकरणशास्त्रस्य भेदाः

पूर्वस्मिन् प्रकरणे व्याकरणशास्त्रस्य उद्भवः कथं सञ्जातः ? तस्य प्रर्वतकः कः ? इत्यादयो विषयाः समवगताः । अस्मिन् भागे व्याकरणशास्त्रस्य भेदविषये विविच्यते । वस्तुतो व्याकरणस्य त्रीणि रूपाणि दृश्यन्ते, तानि यथा – छान्दसं, लौकिकं, छान्दसलौकिकञ्चेति । तत्र छान्दसं प्रातिशाख्यादि । प्रातिशाख्यं हि वेदानां प्रतिशाखासम्बद्धम् । तेन यावन्तो वेदस्य शाखास्तावन्ति एव प्रातिशाख्यानि स्युः । परन्तु दुर्भाग्यादेव साम्प्रतं षडेवोपलभ्यन्ते । तेषु शौनकसङ्कलितम् ऋक्प्रातिशाख्यम्, कात्यायनसंकलितं वाजसनेयीयप्रातिशाख्यम्, वररुचिसङ्कलितं सामप्रातिशाख्यम्, अथर्वप्रातिशाख्यम्, तैत्तिरीयप्रातिशाख्यम्, मैत्रायणीप्रातिशाख्यञ्च । मन्त्राणां संहितापाठे सम्भवविकारेषु विचार एव मूलतः प्रातिशाख्यस्य उद्देश्यम् । तथा च लौकिकं कातन्त्रादि, छान्दसलौकिकं पाणिनीयादि । लौकिकव्याकरणस्य बहवो भेदा आचार्यैः स्मर्यन्ते । सम्प्रत्यपि अष्टादशाधिका व्याकरणपरम्परा प्रवर्तन्ते । तेष्वपि प्राधान्येन अष्टौ नव एव वा गृहीताः शोधास्तु तत्सम्बद्धा एव । तत्राष्टव्याकरणविषये यथा –

"ब्राह्ममैशानमैन्द्रञ्च प्राजापत्यं बृहस्पतिम् ।
त्वाष्ट्रमापिशलञ्चेति पाणिनीयमथाष्टमम् ॥"

अर्थात् अष्टौ व्याकरणपरम्परा यथा – ब्राह्मम्, ऐशानम्, ऐन्द्रम्, प्राजापत्यम्, बार्हस्पत्यम्, त्वाष्ट्रम्, आपिशलं, पाणिनीयञ्च ।

अपि च श्रीतत्त्वविधिनामके ग्रन्थे नवव्याकरणानाम् उल्लेखः प्राप्यते –

"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ॥"

अत्र ऐन्द्रमिन्द्रप्रवर्तितम्, चान्द्रं चन्द्रगोभीप्रणीतम्, काशकृत्स्नं काशकृत्स्नप्रणीतम्, औदीच्यसंस्कृतसम्बद्धम्, कौमारं सर्ववर्मप्रोक्तम्, कातन्त्रीयम्, शाकटायनं शाकटायनप्रोक्तं सोणादिकम् ।

१.६ पाणिनिपूर्ववर्त्तिनो वैयाकरणाः

पाणिनिपूर्ववर्तिन व्याकरणाचार्याः 'पाणिन्यस्मृताः' 'पाणिनिस्मृता' इति द्विधा विभक्तुं शक्यते । ये खलु व्याकरणाचार्याणां नामानि पाणिनीयाष्टाध्याय्यां नोच्चारितानि, ते आचार्याः पाणिन्यस्मृताः, तथा च येषां व्याकरणाचार्याणां नामानि अष्टाध्याय्यां समुच्चारितानि, ते च आचार्याः पाणिनिस्मृताः वैयाकरणाः ।

१.६.१ पाणिन्यस्मृताचार्याः –

भगवता पाणिनिना तदीयाष्टाध्याय्याम् अनुल्लिखितानां व्याकरणाचार्याणां सुदीर्घा परम्परा वर्तते । पाणिनिना अष्टाध्याय्यां किमर्थं तत्तदाचार्याणाम् उल्लेखः न कृतः तद्विषये नास्ति किमपि प्रामाणिकं तथ्यम् । तेषाम् आचार्याणां विषये अत्र किञ्चित् प्रस्तूयते –

महेश्वरः – महेश्वरप्रणीतस्य व्याकरणस्य समुल्लेखो नैकेषु ग्रन्थेषु दृश्यते। महाभारतस्य शान्तिपर्वान्तर्गते शिवसहस्रनामस्तोत्रे शिवः षडङ्गानां प्रवर्तक इति उक्तम् । यथा - "वेदात् षडङ्गान्युद्धृत्य"(महाभारतम् २८४/१९२)।

पाणिनीयशिक्षायामपि अन्ते एवमुक्तमस्ति

"येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥"

उच्यतेऽपि एतद् यत् 'अइउण्' प्रभृतीनि चतुर्दशसूत्राणि माहेश्वरसूत्राणि शिवसूत्राणि वा। तथा च श्रूयते – महर्षिः पाणिनिः महेश्वराद् अक्षरसमाम्नायं समधिगम्य समग्रं व्याकरणशास्त्रं रचयामास । एवं विविधशास्त्रेषु महेश्वरस्य व्याकरणप्रणेतृत्वविषयं प्राप्यते, परन्तु साम्प्रतं तद् व्याकरणस्य स्वरूपविषये नोपलभ्यते। ब्रहमाण्डपुराणानुसारं शिवस्य माता सुरभिः पिता च प्रजापतिकश्यपः । महादेवशिवस्य कालः कृतयुगस्य चतुर्थचरणं मन्यते । एवं महेश्वरस्य काल एकादशसहस्रवर्षाद् पूर्वमिति कथ्यते।

बृहस्पतिः – बृहस्पतिरपि व्याकरणस्य प्रवक्तेति तु सर्वसम्मतमेव। तच्च पूर्वमुक्तमेव 'ब्रहमा बृहस्पतये प्रोवाच' इति वचनात् तत्सुप्रतीयते एव। बार्हस्पत्यव्याकरणस्य स्वरूपविषये साम्प्रतं न ज्ञायते। बृहस्पतिः हि दिव्यं वर्षसहस्रं इन्द्राय प्रतिपदोक्तानां शब्दानां पारायणं प्रोवाच इति तु श्रुतिः । बृहस्पतेः स्थितिकालः विक्रमपूर्वदशसहस्राब्दमिति अनुमीयते तथापि तद्विषये नास्ति प्रामाणिको हेतुः।

इन्द्रः – श्रुतिग्रन्थेषु इन्द्रः प्रथमः वैयाकरण इति अपि प्राप्यते । तेन हि प्रकृतिप्रत्ययविभागेन शब्दा व्याकृता । स इन्द्रः कश्यपाद् अदित्यां सञ्जात इति पुराणेषु प्रसिद्धम् । इन्द्रप्रोक्तस्य व्याकरणस्यापि स्वरूपं साम्प्रतं ज्ञातुं न शक्यते।

वायुः – वायु अपि अपरो वैयाकरण इत्यपि श्रूयते। इन्द्रकृते ऐन्द्रव्याकरणे वायोः योगदानमासीत् इति तु श्रुतिः कथयति । तैत्तिरीयसंहितायामेवमुक्तम् –"वाग्वै पराच्यव्याकृतावदत् ,ते देवा इमामब्रुव इमां नो वाचं व्याकुर्विति सोऽब्रुवीद्वरं वृणै मध्यं चैव वायवे च सह" इत्यादि। (तैत्तिरीयसंहिता ६/४/७)।
न केवलम् ऐन्द्रव्याकरणादेव वायोः व्याकरणत्वम् अपि तु वायव्यव्याकरणस्यापि विषये चर्चा श्रूयते । स हि ब्रह्मणो ज्ञानं लब्धवान् इति पुराणेषु प्रसिद्धः।

भरद्वाजः – भरद्वाजो हि इन्द्रशिष्यः भरद्वाज इन्द्रात् सर्वमपि व्याकरणज्ञानं लब्धवान् । तच्च इन्द्राद् लब्धं सर्वं व्याकरणज्ञानं स ऋषिभ्य उक्तवान् । अयं बृहस्पतेः पुत्रः । यद्यपि भरद्वाज-तन्त्रं साम्प्रतं नोपलभ्यते तथापि ऋकतन्त्रोक्तं 'ब्रह्मा बृहस्पतये प्रोवाच' इत्यादिवचनाद् भरद्वाजस्य व्याकरणशास्त्रप्रवक्तृत्वं सिद्धति।

भागुरिः – यद्यपि भागुरे उल्लेख अष्टाध्याय्यां नोपलभ्यते तथापि भागुरेः व्याकरणविषयकम् अत्यन्तं प्रसिद्धं मतम् एकस्मिन् श्लोके एवं प्राप्यते –

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिश ॥"

अर्थात् भागुरिमतेन 'अव' 'अपि' च इति अनयो उपसर्गयो अकारो लुप्यते। यथा अवगाहः = वगाहः, अपिधानम् = पिधानम् तथा हलन्तशब्दात् आप् (टाप्) प्रत्ययो भवति। यथा- वाक् = वाचा, निश् = निशा, दिश् = दिशा इति। अपि च आचार्यभागुरिप्रोक्तं व्याकरणमतं समुपलभ्यते। यथा – 'नप्नेति भागुरिः।'(भाषावृत्तिः ४/१/१०)। इत्थं व्याकरणकोषालङ्कारशास्त्राद्यनेकानां विषयाणां प्रवक्ता भागुरिः पाणिनोत्तरविचक्षणै: बहुधा स्मर्यते।

पौष्करसादिः – पौष्करसादिः तैत्तिरीयमैत्रायण्यादिप्रातिशाख्येषु महाभाष्ये च वैयाकरणत्वेन स्मृतः। पाणिनेः पूर्ववर्ती अयं पौष्करसादि आचार्यः पुष्करसतः पुत्रः यज्ञेश्वरभट्टः स्वकीयरत्नावलीग्रन्थे पौष्करसारिपदस्य निर्वचनमेवं कृतम् – "पुष्करे तीर्थविशेषे सीदतीति पुष्करसः तस्यापत्यं पौष्करसादिः" इति।
महाभाष्ये अस्याचार्यस्य विषये प्राप्यते एवम् – 'चयो द्वितीया शरि पौष्करसादेः' (महाभाष्यम्८/४/४८)।

चारायणः– चारायणोऽपि पाणिनिपूर्ववर्तिवैयाकरणो वर्त्तते। तस्य हि 'पुरुकृतेच्छछ्रयोः' इति सूत्रमेकं देवपालेन लोगाक्षिगृह्यसूत्रव्याख्यायां स्मृतम्। परन्तु साम्प्रतं तत्कृतव्याकरणस्वरूपविषये प्रामाणिकं तथ्यं नोपलभ्यते। संहिताप्रवर्तकत्वात्तस्य हि स्थितिकालो विक्रमपूर्वत्रिसहस्राब्दीमभित अनुमितः।.

काशकृत्स्नः – पाणिन्यनुल्लिखितोऽपि काशकृत्स्नो महावैयाकरण आसीत्। ऐन्द्रसम्प्रदायानुयायित्वेन प्रसिद्धं काशकृत्स्नव्याकरणम् औदीच्यसंस्कृतसम्बद्धम्। सोऽपि भाषापरिवारः काशकृत्स्नधातुपाठेन सह संवदते। काशकृत्स्नव्याकरणविषये प्रदीपे वाक्यपदीये काशिकावृत्तौ च बहुधा प्राप्यते। काशिकावृत्तौ 'त्रिकं काशकृत्स्तम्' इत्युक्तम्। काशकृत्स्नतन्त्रे १४२ सूत्राणि उपलभ्यन्ते सम्प्रति।

वैयाघ्रपद्यः – काशिकावृत्तौ वैयाघ्रद्यस्य व्याकरणस्य उल्लेखः प्राप्यते। 'दशकं वैयाघ्रपदीयम्' इति वचनात् ज्ञायते यत् वैयाघ्रद्यस्य व्याकरणे दशाध्याया आसन् इति। अस्य व्याकरणस्य विषयेऽपि अधुना अधिकं किमपि न ज्ञायते।

माध्यन्दिनिः – माध्यन्दिनिव्याकरणविषये यद्यपि पाणिन्यष्टाध्यायां नोपलभ्यते किमपि सूत्रं, तथापि काशिकावृत्तौ तद्विषये एका कारिका वर्त्तते –

"सम्बोधने तूशनसत्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्।
माध्यन्दिनिव्यष्टि गुणं त्विगन्ते नपुंसके व्यघ्रपदां वरिष्ठः॥" इति (काशिकावृत्तिः,७/१/९४)

अपि च प्रक्रियाकौमुदीभूमिकायामपि तद्विषयकम् उद्धरणं प्राप्यते – "इकः षण्ढेऽपि समुद्धौ गुणौ माध्यन्दिने"।

अनेन ज्ञायते यत् पाणिनिपूर्ववर्ती अयं माध्यन्दिनि-आचार्योऽपि वैयाकरण आसीदिति।

रौढिः – आचार्यरौढेः निर्देशः पाणिनीयव्याकरणे प्राप्यते। तथापि काशिकावृत्तेः "आपिशलपाणिनीयाः, पाणिनीयरौढीयाः, रौढौयकाशकृत्स्नाः" इति उद्धरणाद् निश्चयेन रौढिरेव वैयाकरणः। तद्विषये महाभाष्येऽपि (१/१/७३) 'घृतरौढीया' इति उदाहरणं प्राप्यते।

शौनकिः – शौनकिरपि अन्यतमः वैयाकरण आसीत्। तस्यापि व्याकरणं साम्प्रतं नोपलभ्यते। शौनकेः व्याकरणस्य अस्तित्त्वं ग्रन्थोद्धरणात् एव ज्ञायते। चरकसंहितायाः टीकाकारः जज्झट तस्य मतमेवमुल्लिखति –

'करोतेरपि कर्तृत्वे दीर्घत्वं शास्ति शौनकिः किञ्च शौनकेः' व्याकरणसम्बन्धिमतं वाजसनेयीयप्रातिशाख्यादिषु बहुधा दृश्यते।

गौतमः – पाणिन्यनुल्लिखिताचार्येषु प्राक्पाणिनीयवैयाकरणेषु गौतमोऽन्यतमः । महाभाष्यस्य "आपिशलपाणिनीयव्याडीयगौतमीयाः" (६/२/३६) इति पतञ्जलिवचनात् गौतमस्य वैयाकरणत्वं सिद्धति । तैत्तिरीयप्रातिशाख्ये (५/३८) तथा च मैत्रायणीप्रातिशाख्ये (५/४०) आचार्यगौतमस्य व्याकरणमतं प्रदत्तं वर्तते।

व्याडिः – पाणिनीयपूर्ववर्तिषु आचार्येषु अपरोऽयम् आचार्योऽत्यन्तं प्रसिद्धो वर्तते । परन्तु पाणिनीयसूत्रेषु तस्योल्लेखो नास्ति। ऋक्प्रातिशाख्ये (६/२३, ६/२८, ६/४३, १३/३१, १३/३७) शौनकः व्याडेः मतमुद्धरति । पुरुषोत्तमकृतभाषावृत्तौ 'इको यण्भिर्व्यवधानं व्याडिगालवयोरपि वक्तव्यम्' इति तत्सम्बन्धिवचनं प्राप्यते।

एवं प्रकारेण अस्मिन प्रकरणे महेश्वरादारभ्य व्याडिपर्यन्तं पाणिनिपूर्ववर्तिनां वैयाकरणानां विषये संक्षिप्त विवरणं प्रदत्तम् । एतेषां व्याकरणाचार्याणां विषये प्राणिनीयव्याकरणे नोपलभ्यते, अत एते आचार्याः पाणिन्यस्मृता आचार्या इति।

१.६.२ पाणिनिस्मृता आचार्याः

भगवता पाणिनिना स्वप्रणीताष्टाध्याय्यां दशप्राचीनाचार्यानां मतानि सूत्रेषु निर्दिष्टानि सन्ति । ते च आचार्याः पाणिनिस्मृता आचार्या इति कथ्यन्ते । तेषाम् आचार्याणां नामानि यथा – आपिशलः, काश्यपः, गार्ग्यः, गालवः, चाक्रवर्मणः, भारद्वाजः, शाकटायनः, शाकल्यः, सेनकः, स्फोटायनश्च । एषामाचार्याणां विषये अस्मिन् प्रकरणे संक्षिप्तरूपेण प्रस्तूयते –

आपिशलः – आचार्यापिशलस्य उल्लेख अष्टाध्याय्या एकस्मिन् सूत्रे वर्तते । यथा – वा 'सुप्यापिशलेः' (६/१/९२) पाणिन्यष्टाध्याय्यामुल्लिखितत्वात् अयं पाणिनेः पूर्ववर्तीति तु निश्चितम् । शाकटायनव्याकरणस्य अमोघावृत्तिकारः पालकीर्तिः अमोघावृत्तौ एवं कथयति – 'अष्टका आपिशालपाणिनीयाः'।

अनेन कथनेन ज्ञायते यत् आपिशलव्याकरणे अष्टाध्याय्या आसन् काशिकावृत्तौ अस्य व्याकरणस्य उदाहरणं प्राप्यते । यथा– 'आपिशलं पुष्करणम्'(४/३/११५), 'आपिशल्युपज्ञं गुरुलाछवम्' (६/२/१) । एवं तन्त्रपदीप-पदमञ्जरी-शब्दकौस्तुभप्रभृतिषु ग्रन्थेषु आपिशलव्याकरणस्योद्धरणं बहुधा प्राप्यते।

काश्यपः – भगवान् पाणिनि अष्टाध्याय्यां द्वयोः सूत्रयोः काश्यपाचार्यस्य मतं संस्मरति। सूत्रद्वयं यथा – 'तृषिमृषिकृषेः काश्यपस्य' (अष्टाध्यायी,१/२/२५), 'नोदात्तस्वरितोदयमगार्ग्यकाश्यप - गालवानाम्' (अष्टाध्यायी,८/४/६७) । काश्यपव्याकरणमपि साम्प्रतं नोपलभ्यते । काश्यपस्य स्थितिकालः प्राक्पाणिनीय इत्येव ज्ञायते पाणिनीयसूत्रयो उल्लेखात्, किन्तु कियत्प्राचीन इति तु नैव अनुमातुं शक्यते।

गार्ग्यः – महर्षिपाणिनिः गार्ग्याचार्यस्य मतं स्वाष्टाध्यायीव्याकरणे त्रिवारम् उल्लिखति । यथा – 'अङ्गार्ग्यगालवयोः' (७।३।९९), 'ओतो गार्ग्यस्य'(८/३/२०), 'नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्'

(८/४/६७) । एतेषां सूत्रगतमतानां पर्यालोचनेन पाणिनेरपि गार्ग्यस्य प्राचीनत्वं सिद्धति । तस्य व्याकरणस्यापि विषये किमपि न ज्ञायते पाणिनिप्रोक्तसूत्राद् ऋते ।

गालवः – महर्षिः पाणिनिः गालवं व्याकरणत्वेन अष्टाध्याय्यां चतुर्वारं स्मरति । यथा – 'इको ह्रस्वोऽङ्यो गालवस्य' (६/३/६१), 'तृतीयादिषु भाषितपुस्कं पुंवद् गालवस्य' (७/१/७४), 'अङगार्ग्यगालवयोः' (७/३/९९), 'नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्' (८/४/६७) ।

अनेन स्पष्टीयते यत् गालवः तु कश्चन वैयाकरण आसीदिति । तस्यापि स्थितिकालविषये ज्ञातुं न शक्यते।

चाक्रवर्मणः – आचार्यचाक्रवर्मणस्य नाम अष्टाध्याय्यां तथा उणादिसूत्रेषु च प्राप्यते । अष्टाध्याय्यां यथा – 'ई३ चाक्रवर्मणस्य' (६/१/१३०) । तथा च पञ्चपाद्यौणादिसूत्रे उक्तमेवं तद्विषये – 'कपश्चातवर्मणस्य' इति (३/१४४) । यद्यपि अष्टाध्यायीप्रभृतिव्याकरणेषु चाक्रवर्मणस्य विषये प्राप्यते तथापि सूत्ररूपेण व्याकरणरूपेण वाधुना तत्कृतं किमपि नोपलभ्यते ।

भारद्वाजः – भारद्वाजश्च पाणिनिस्मृतः अन्यतमो वैयाकरणः । भगवता पाणिनिना एकस्मिन् सूत्रे भारद्वाजस्य उल्लेखः कृतः । यथा – 'ऋतो भारद्वाजस्य' (७/२/६३) तेन ज्ञायते भारद्वाजः पाणिनिपूर्ववर्ती आचार्य इति ।

शाकटायनः – आचार्यशाकटायनस्य विषये पाणिनीयाष्टाध्याय्यां त्रिवारं प्राप्यते । यथा– "लङः शाकटायनस्यैव' (३/४/१११), 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' (८/३/१८), 'त्रिप्रभृतिषु शाकटायनस्य' (८/४/५०) ।

एवं हि बहुत्र शाकटायनो व्याकरणाचार्यत्वेन संस्मृतो दृश्यते । तथा च पूर्वोक्ताष्टाध्यायीसूत्रावलोकनेनापि शाकटायनस्य वैयाकरणत्वं पाणिनिस्मृतत्वात् च तत्प्राचीनत्वमपि ज्ञायते ।

शाकल्यः – महर्षिणा पाणिनिना आचार्यशाकल्यस्य मतं चतुर्वारम् उल्लिखति । तस्मात् स्मृतत्वात् स्वपूर्ववर्तिवैयाकरणेषु शाकल्योऽन्यतमः । शाकल्यमतविषये अष्टाध्याय्यां प्राप्तानि सूत्राणि यथा – 'समुद्धौ शाकलस्येतावनार्षे' (१/१/१६), 'इकोऽसवर्णे शाकलस्य ह्रस्वश्च' (६/१/१२७), 'लोपः शाकल्यस्य' (८/३/१९), 'सर्वत्र शाकल्यस्य' (८/४/५१) । शाकल्याचार्यास्यापि व्याकरणग्रन्थस्तु साम्प्रतं नैवोपलभ्यते ,तथापि ग्रन्थान्तरसहयोगात् शाकल्यव्याकरणसम्बद्धमतं किञ्चित् ज्ञायते । एवञ्च एतदपि ज्ञायते यत् शाकल्यव्याकरणे वैदिकानां लौकिकानां शब्दानाम् अन्वाख्यानं कृतमासीत् ।

सेनकः – पाणिनिना सेनकाचार्यस्य उल्लेख अष्टाध्याय्याम् एकस्मिन्नेव सूत्रे कृतम् । अष्टाध्यायीं विहाय अन्यत्र अस्य आचार्यस्य उल्लेखो न प्राप्यते । अष्टध्याय्यां प्राप्तं सेनकाचार्यसम्बन्धितं सूत्रं यथा –'गिरेश्च सेनकस्य' (५/४/११२) ।

स्फोटायनः – पाणिनिपूर्ववर्त्याचार्येषु स्फोटायन अन्यतमः । पाणिन्याष्टाध्याय्यां तद्विषयकम् एकमेव सूत्रं एखमेव सम्प्राप्यते । यथा – 'अवङ्स्फोटायनस्य' (६/१/१२३) । एतदतिरिक्तं स्फोटायनस्य व्याकरणसम्बन्धितं मतं तत्कृतव्याकरणं वा अद्य न प्राप्यते ।

अनेन प्रकारेणात्र पाणिनिस्मृताः दश तत्पूर्ववर्त्तिवैयाकरणाः संक्षेपेण उपवर्णिताः वर्तन्ते ।

१.७ पाणिनीयव्याकरणम्

संस्कृतभाषायाः यानि खलु आर्षव्याकरणानि आसन्, तेषु साम्प्रतं केवलं पाणिनीयव्याकरणमेव साङ्गोपाङ्गरूपेण प्राप्यते । इदं पाणिनीयछान्दसलौकिकव्याकरणमिति उच्यते । यतोहि अनेन पाणिनीयव्याकरणेन वैदिकानां लौकिकानाम् उभयविधशब्दानां प्रकृतिप्रत्ययदीनां यथार्थस्वरूपं ज्ञातुं शक्यते । संसारेऽस्मिन् पाणिनीयव्याकरणातिरिक्तं भाषायाः परिष्कृतं वैज्ञानिकं च व्याकरणं नोपलभ्यते । प्रकरणे अस्मिन् भगवतः पाणिनेः विषये तथा च तत्कृताष्टाध्याय्याः विषये आलोच्यते ।

१.७.१ पाणिनि अष्टाध्यायी च

त्रिकाण्डकोषे पुरुषोत्तमदेवेन भगवतः पाणिनेः बहवः पर्यायाः दत्ताः सन्ति । ते यथा – पाणिनः, पाणिनिः, दाक्षीपुत्रः, शालङ्किः, शालातुरीयः, आहिकश्च । श्लोकात्मकपाणिनीयशिक्षायाः याजुषपाठे 'पाणिनेयः' इति अपि नाम उपलभ्यते । किञ्च 'यशस्तिलकचम्प्वां 'पणिपुत्रः' इति प्राप्यते । एवं बहुषु ग्रन्थेषु पाणिनेः विविधानि नामानि सम्प्राप्यन्ते । भगवतः पाणिनेः पिता शलङ्कः माता च द्राक्षी आसीत् । तस्य मातुलः व्याडिः, अनुजः पिङ्गलः, आचार्यः वर्षोपाध्यायः, मातामहश्च व्यड आसीत् । पाणिनेः जन्मस्थानविषये पण्डिताः नैकमत्यं भजन्ते । तथापि जन्मः पाकिस्तानस्थिते शालातुरनामके ग्रामे अभवत् इति अभिधीयते । तत्र जन्मलब्धत्वादेव पाणिनेरपरं नाम शालातुरीय इति ।

पाणिनेर्जन्मकालविषयेऽपि मतभेदो परिलक्ष्यते विद्वत्सु । तस्य जन्मस्थानविषये नास्ति प्रामाणिकं तथ्यं, तथापि विद्वांसः तस्य जन्मकालं ख्रीष्टपूर्वं सप्तशतकमिति अनुमान्ति । पाणिनिकृतं व्याकरणं पाणिनीयव्याकरणमित्युच्यते । पाणिनीयव्याकरणस्य पञ्चाङ्गव्याकरणमिति प्रसिद्धिः सर्वत्र विद्यते । तानि च पाणिनीयव्याकरणस्य पञ्च अङ्गानि यथा- सूत्रपाठः, धातुपाठः, गणपाठः, लिङ्गानुशासनं, शिक्षा चेति । पाणिनीकृतः सूत्रपाठ एव अष्टाध्यायी इति नाम्ना ज्ञायते । इयम् अष्टाध्यायी संस्कृतव्याकरणस्य एकमात्रं प्रतिनिधिभूत अमूल्यो निधिरस्ति । अष्टाध्यायी अष्टसु अध्यायेषु विभक्ता वर्तते । तथा च प्रत्यध्यायं चत्वारः पादाः सन्ति, एवम् आहत्य सम्पूर्णायामष्टाध्याय्यां द्वात्रिंशत् पादाः सन्ति । अष्टाध्याय्यां विद्यमानानां सूत्राणां संख्या ३९९५ । सूत्रात्मिकायाम् अष्टाध्याय्यां विद्यमानानि सूत्राणि षड्विधानि । तानि हि – संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः, अधिकारश्च । उक्तञ्च –

"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशो अधिकारश्च षड्विधं सूत्रलक्षणम् ।।"

अष्टाध्याय्याः प्रथमं सूत्रमस्ति 'वृद्धिरादैच्' अन्तिमञ्च 'अ अ' इति ।

एवं हि संस्कृतभाषायाः शब्दानां च स्वरूपज्ञानाय एकमात्रं साधनभूतं व्याकरणं वर्तते पाणिनीयं व्याकरणम्। न हि केवलं भारतेऽपि तु पाणिनीयव्याकरणस्य प्रसिद्धि समग्रेऽपि विश्वे वर्तते।

१.८ पाणिन्युत्तरव्याकरणम्

भगवतः पाणिनेरनन्तरं बहवः वैयाकरणाः भारतभूमौ समुद्भूताः। तेषु केचन पाणिनीयाष्टाध्यायीम् अवलम्ब्य एव व्याकरणग्रन्थान् प्रणीतवन्तः, तथा च केचन स्वकीयरीत्या पाणिनीयव्याकरणेव – व्याकरणग्रन्थान् रचितवन्तः। एवं ये खलु आचार्याः पाणिनीयव्याकरणमवलम्ब्य व्याकरणम् अरचयन् ते पाणिन्यनुगाः पाणिन्यनुगामिनो वा। तथा च ये पाणिनीयव्याकरणरीतिं विहाय भिन्नरीत्या व्याकरणं रचयामासः ते अपाणिनीयवैय्याकरणाः। आस्मिन् प्रकरणे तेषां पाणिन्यनुगानाम् आचार्याम् तथा अपाणिनीयाचार्यानां विषये चर्चा विधीयते।

१.८.१ पाणिन्यनुगाः वैयाकरणाः

भगवता पाणिनिना प्रणीताया अष्टाध्याय्या उपरि नैकै आचार्यैः विविधग्रन्थाः प्रणीताः। तेषु आचार्यषु केचन आचार्या अष्टाध्याय्याः वार्तिकं, केचन भाष्यं, केचन प्रक्रियाग्रन्थं, केचन दार्शनिकग्रन्थम् अरचयत्। तेषाम् आचार्याणां मध्ये प्रसिद्धानां प्रमुखानां पाणिन्यनुयायिनाम् व्याकरणाचार्याणां विषये अस्मिन् प्रकरणे संक्षिप्तरूपेण प्रस्तूयते –

कात्यायनः / वररुचिः वार्तिकञ्च – पाणिनीयाष्टाध्यायीमधिकृत्य वैयाकरणैः वार्तिकानि विरचितानि। ते च वार्तिककाराः कात्यायनः, भारद्वाजः, सुनागः, कोष्टा, वाडवः, व्याघ्रभूतिः, वैयाघ्रपद्य इत्यादयः। एतेषु सर्वापेक्षया कात्यायनस्य वार्तिकानि प्रसिद्धिपथम् आगतानि। वार्तिकं नाम सूत्रमधिकृत्य प्रोक्तमुपसूत्रम्। तच्चोक्तं विशदयति स्पष्टयति वा अनुक्तं किन्तु कथनीयं कथयति, दुरुक्तं सूक्तं करोति वा। किञ्च व्याकरणपरम्परायां त्रिमुनिः प्रसिद्धः। तेषु प्रथमः सूत्रकारः पाणिनिः, तद्विषये पूर्वमुक्तमेव, द्वितीय अयं कात्यायनः वार्तिककारः, तृतीयस्तु महामुनिः पतञ्जलिः भाष्यकारः। वार्तिककारकात्यायनस्य अपरं नाम वररुचिरिति। वररुचेर्हि कालविषये देशविषये च बहूनि मतानि वर्तन्ते। केचित् तं पाणिनिसमकालिकं मन्यन्ते, अपरे तु पाणिनेः द्वित्रशतकपश्चाद्वर्तिनम्। अतः कात्यायनस्य समयः ख्रीष्टपूर्वं चतुर्थशतकमिति अनुमातुं शक्यते। जनश्रुत्यानुसारं तस्य पितुः नाम सोमदत्तः, मातुर्नाम च वसुदत्ता इति।

कात्यायनस्य वार्तिकपाठः पाणिनीयव्याकरणस्य कृते नितान्तमेव महत्त्वपूर्णमङ्गम्। यद्यपि पाणिनीयव्याकरणस्य सर्वथा पोषकः कात्यायनीयो वार्तिकपाठः स्वतन्त्रग्रन्थरूपेण नोपलभ्यते तथापि महाभाष्ये एव सामान्यतया इमानि वार्तिकानि द्रष्टुं शक्यन्ते, परन्तु तत्रापि वार्तिकानां संख्या तु अनिश्चितैव। तथापि विद्वासः मन्यन्ते यत् – तेन अष्टाध्याय्याः १५०० सूत्राणामुपरि वार्तिकं लिखितमिति।

पतञ्जलिः महाभाष्यं च – कात्यायनाद् अनन्तरं पाणिनीयव्याकरणस्य यथार्थं सरलभाषया स्पष्टीकृतवान् महर्षिः पतञ्जलिः। तेन अष्टाध्याय्या उपरि मूलतन्त्रवार्तिकसूत्राणि आधृत्य प्रणीतः 'महाभाष्यम्'

इति ग्रन्थः । केचित् पण्डिताः पतञ्जले: जन्मकालं ख्रीष्टपूर्वं द्वितीयशतकमिति कथयन्ति । पतञ्जलेः जन्मस्थानमासीत् गनर्दः । तस्य मातुः नाम आसीत् गोणिकादेवी ।

महाभाष्यं हि पाणिनीयव्याकरणस्य प्रामाणिको व्याख्यानग्रन्थः । महाभाष्यं हि आह्निकेषु विभक्तमस्ति । महाभाष्ये आहत्य ८५ आह्निकानि सन्ति । ज्ञातव्यमेतद्यत् महाभाष्ये केवलं पाणिनीयाष्टाध्याय्याः १७१७ सूत्राणामुपरि एव व्याख्या वर्तते । 'अथ शब्दानुशासनम्' इति वाक्येन महाभाष्यं प्रारभते ।

वामनजयादित्यौ काशिकावृत्तिश्च – जयादित्यस्य वामनस्य च काशिकावृत्तिः पाणिनीयसूत्रवृत्तिषु केन्द्रस्थानीया । वामनजयादित्यौ उभौ पाणिनीयाष्टाध्याय्या अष्टानाम् अध्यायानामुपरि वृत्तिं रचितवन्तौ । वृत्तिस्तु पदच्छेद-पदार्थोक्ति-समासादिविग्रह-अनुवृत्ति-वाक्यार्थ-उदाहरणादिसंयुक्तस्य विस्तृतविवरणात्मकस्य व्याख्यानस्य लघुरूपम् । अष्टाध्याय्याः काशिकावृत्तेः कर्तृत्वविषये पण्डिताः नैकमत्यं भजन्ते । केचिद्धि अष्टाध्याय्याः प्रथमचतुर्णाम् अध्यायानां वृत्तिः जयादित्येन कृता, उत्तरचतुर्णामध्यायानां वृत्तिः वामनेन कृतेति मन्यन्ते । वामनजयादित्ययोः समय ईशवीयसप्तमशताब्दी इति मन्यते ।

भर्तृहरिः – व्याकरणक्षेत्रे भर्तृहरेः नाम अत्यन्तं प्रसिद्धम् । अनेन हि महाभाष्यस्योपरि महाभाष्यदीपिका नाम्नी टीका रचिता । भर्तृहरिणा एव वाक्यपदीयनामकः व्याकरणसम्बन्धी दार्शनिकग्रन्थोऽपि रचितः ।

कैयटः – अनेन कैयटनामकेन वैयाकरणेन पतञ्जलिकृतमहाभाष्यस्योपरि 'प्रदीप' आख्या टीका रचिता । कश्मीरदेशीय अयं वैयाकरण: जैयतस्य पुत्र आसीत् ।

भट्टोजिदीक्षितः – भट्टोजिदीक्षितेन पाणिनीयाष्टाध्याय्याः सर्वाणि सूत्राणि आदाय सिद्धान्तकौमुदीनामकः प्रक्रियाग्रन्थः लिखितः । ग्रन्थस्यास्य अनेकैः विद्वद्भिः व्याख्या कृता । तेषु व्याख्यातृषु भहोजिदीक्षितः स्वयमेव स्वसिद्धान्तकौमुदीग्रन्थस्योपरि 'पौढमनोरमा'नाम्नी टीकामरचयत् । तस्य पिता लक्ष्मीधरदीक्षितः ।

वरदराजः – संस्कृतव्याकरणस्य पण्डितोऽयं भट्टोजिदीक्षितस्य शिष्य आसीत् । तेन हि तद्गुरुकृतं वैयाकरणकौमुद्रीग्रन्थं समाधारीकृत्य मध्यसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी, सारकौमुदी चेति त्रयः सारकृतः संक्षिप्तकृतो वा प्रकरणग्रन्थो रचितः ।

नागेशभट्टः – नागेशभट्टो हि पाणिन्युत्तरवर्तिषु पाणिन्यनुगामिवैयाकरणेषु शीर्षस्थानं समाप्नोति । अनेन हि महावैयाकरणेन कैयटकृतमहाभाष्यप्रदीपटीकाया उपरि उद्योतनाम्नी व्याख्या विलिखिता । तथा च सिद्धान्तकौमुद्या उपरि बृहच्छब्देन्दुशेखराख्या व्याख्या विलिखिता । अनन्तरं तेनैव लघुशब्देन्दुशेखराख्यग्रन्थो लिखितः । नागेशस्य पिता शिवभट्टः माता च सती देवी । तस्य गुरुश्च हरिदीक्षितः । तस्य अन्ये व्याकरणग्रन्थाः यथा – परिभाषेन्दुशेखरः, वैयाकरसिद्धान्तम्, लघुमञ्जूषा, परमलघुमञ्जूषा, स्कोटवादः, महाभाष्यप्रत्याख्यानसंग्रह इत्यादयः ।

एवं हि पाणिनीयव्याकरणस्य ये अनुयायिनः वर्तन्ते, तेषां वैयाकरणाचार्याणां विषये अस्मिन् प्रकरणे संक्षेपेण उल्लिखितम् । यतोहि पाणिनीयपरम्परानुयागिन आचार्याः बहवः वर्तन्ते, तेषु केषाञ्चन प्रसिद्धानाम् आचार्याणां विवरणमेवात्र प्रदत्तम् ।

१.८.२ अपाणिनीयवैयाकरणाः –

पाणिनीयव्याकरणस्य प्रसिद्धत्वेऽपि केचन वैयाकरणाः शब्दानां प्रकृतिप्रत्ययादिसुगमबोधनाय पाणिनीयपरम्पराभिन्नं व्याकरणम् अरचयन् । यद्यपि तादृशं व्याकरणं पाणिनीयपरम्पराभिन्नं तथापि तत्तत् व्याकरणस्य ज्ञाननिमित्तमपि पाणिनीयव्याकरणं पाथेयमेव । तेषां केषाञ्चन प्रसिद्धाः वैयाकरणा उल्लिख्यन्ते

शर्ववर्मा कातन्त्रव्याकरणञ्च – कातन्त्रं हि पाणिनेतरव्याकरणेषु प्राचीनतमम् । अस्य कातन्त्रव्याकरणस्य रचयिता शर्ववर्मा । अस्य व्याकरणस्य मूलम् उद्देश्यम् अत्यन्तसरलरीत्या व्याकरणज्ञानप्रदानम् । अस्य व्याकरणस्य अपरनामानि यथा – कलापः, कलापकः, कौमार इत्यादीनि ।
शर्ववर्मकृतं कातन्त्रव्याकरणं हि स्थूलदृष्ट्या सन्धि-नाम-आख्याताख्येषु त्रिषु प्रकरणेषु विभक्तम् । तत्र प्रथमे हि सन्धिप्रकरणे पञ्चपादाः, द्वितीये प्रकरणे षट्पादाः, तृतीये पादे च आख्यानप्रकरणे अष्टौ पादाः सन्ति । अस्य व्याकरणस्य परिशिष्टं प्रकरणं कृत्प्रकरणमिति, तत्र हि षट्पादाः वर्तन्ते । इदं हि व्याकरणं लौकिकशब्दान् एव व्याकरोति । अस्य व्याकरणस्योपरि दुर्गासिंह-कात्यायन-चिच्छुम-उमापति-चिनप्रभसूरि-जगद्धरभट्टप्रभृतिभि आचार्यैः वृत्तिः लिखिता ।

चान्द्रयोगी चान्द्रव्याकरणञ्च – व्याकरणपरम्परायां चन्द्राचार्यप्रणीतम् अपाणिनीयं चान्द्र व्याकरणमतीव प्रसिद्धं वर्तते । इदं हि व्याकरणं पाणिनीयव्याकरणापेक्ष्या लघु स्पष्टञ्च विद्यते । तथैव कातन्त्रव्याकरणापेक्षयापि सम्पूर्णं वर्तते । चान्द्रव्याकरणं न वार्तिकमपेक्षते नैव च भाष्यम् । चान्द्रव्याकरणं पातञ्जलभाष्यानुजीवि । चान्द्रव्याकरणे सम्प्रति लौकिकप्रकरणमेव लभ्यते । अस्मिन् व्याकरणे षडाध्यायाः सन्ति, तथा च प्रत्यध्यायं चत्वारः पादाः सन्ति । चान्द्रव्याकरणस्य सूत्रपाठः, वर्णसूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठः, लिङ्गानुशासनम्, उपसर्गवृत्तिः, परिभाषापाठः, शिक्षासूत्रपाठः, कोश इति दशाङ्गानि सन्ति । चन्दसूत्रस्योपरि चन्द्राचार्यस्य एव स्वोपज्ञाता वृत्तिः लभ्यते ।

क्षपणकः शब्दानुशासनञ्च – क्षपणकनाम्ना विचक्षणेनापि विदुषा 'शब्दानुशासनम्' इति व्याकरणं रचितम् इति श्रूयते । क्षपणकः हि विक्रमादित्यस्य राजसभायाः रत्नेषु अन्यतमः । तत्कृतस्य शब्दानुशासनस्य अधिकं किमपि न ज्ञायते । क्षपणकशब्दानुशासनस्य उपरि तस्यैव स्वोपज्ञा वृत्ति आसीदिति ।

देवनन्दी जैनेन्द्रशब्दानुशासनञ्च – देवनन्दिना जिनेन्द्रसंज्ञयाऽपि ज्ञातेन पण्डितेन पाणिनीयमेव तन्त्रमनुवृत्य जैनेन्द्रसंज्ञकं शब्दानुशासनं प्रणीतमस्ति । देवनन्दी हि कर्नाटकप्रदेशवास्तव्य इति तत्रत्यशिलालेखादिषु तस्य प्रशस्तेर्वर्णनाद् अनुमीयते जिनेन्द्रेण देवनन्दिना वा प्रोक्तं जैनेन्द्रव्याकरणं लोकव्यवहारप्रयुक्तैः शब्दैः साकं सम्बद्धम् । अस्य व्याकरणस्य बृहल्लघुभेदेन द्वौ भेदौ प्राप्येते । तत्र बृहत्पाठः दाक्षिणात्येषु प्रसिद्धः, यत्र सप्तशताधिकत्रिसहस्रसंख्यकाः श्लोकाः सन्ति । लघुपाठे हि पञ्चाध्यायाः,

विंशतिपादाः, ३०३६ सूत्राणि च सन्ति । अस्य व्याकरणस्योपरि अपि बहवः टीकाः प्रणीताः । तेषु प्रभाचन्द्राचार्यकृता शब्दाम्भोजभास्करन्यासनाम्नी बृहती व्याख्या प्रणीताऽस्ति।

पाल्यकीर्तिः जैनशाकटायनतन्त्रञ्च – पाणिन्त्युत्तरवर्त्तिना पाल्यकीर्तिनाम्ना वैयाकरणेन जैनशाकटायनाख्यं व्याकरणं रचितम् । अस्मिन् व्याकरणे सूत्रपाठ-उणादिपाठ-गणपाठ-लिङ्गानुशासन-परिभाषापाठ-उपसर्गार्थ-तद्धितसङ्ग्रहाश्च सन्ति। अस्यैव व्याकरणस्योपरि पाल्यकीर्तिना एव अमोघाख्या वृत्तिः रचिता । व्याकरणस्य अस्योपरि अभयचन्द्रस्य प्रक्रियासङ्ग्रहाख्यः प्रक्रियाग्रन्थो लभ्यते । किञ्च पाल्यकीर्तिकृतामोधाख्यवृत्तिम् आश्रित्य प्रभाचन्द्रेन न्यासः ,अजितसेनेन चिन्तामणिप्रकाशिका इत्याद्याः व्याख्याः कृताः।

भोजदेवः सरस्वतीकण्ठाभरणञ्च – पाणिनीतरवैयाकरणेषु भोजदेवस्य विशिष्टं स्थानं वर्त्तते । भोजदेवस्य सरस्वतीकण्ठाभरणं सर्वाङ्गपूर्णेषु व्याकरणेषु अन्यतमम्। भोजदेवस्य सरस्वतीकण्ठाभरणाख्यौ द्वौ ग्रन्थौ स्तः। तयो एक अलङ्कारविषयक अपरश्च व्याकरणविषयकः। व्याकरणसम्बद्धे सरस्वतीकण्ठाभरणे अष्टौ अध्यायाः द्वात्रिंशत्पादाः, ६४११ सूत्राणि च सन्ति । तत्र लौकिकशब्दसम्बद्धा आद्याः सप्ताध्यायाः, अष्टमाध्यायः स्वरवैदिकप्रक्रियासम्बद्धः । 'सिद्धिः क्रियादेः, लोकात्' इति अस्य ग्रन्थस्य प्रथमं सूत्रम् । सरस्वतीकण्ठाभरणस्योपरि कृष्णलीलांशुकेन पुरुषकारनाम्नी, रामसिंहेन रत्नदर्पनाम्नी च व्याख्या लिखिता।

हेमचन्द्रसूरिः सिद्धहैमशब्दानुशासनं च – हेमचन्द्रेन हि सिद्धहैमशब्दानुशासनाख्यं साङ्गोपाङ्गं व्याकरणं प्रणीतमासीत् । तस्य पिता चाचिङ्गः माता च पाहिनी । हेमचन्द्रेन कृतमिदं व्याकरणं संस्कृतप्राकृतोभयसम्बद्धं व्याकरणम्। अत्र अष्टौ अध्यायाः सन्ति, प्रत्यध्यायं चत्वारः पादाः च सन्ति।

वोपदेवः मुग्धबोधश्च – वोपदेवेन हि मुग्धबोधाख्यं लघुव्याकरणं प्रणीतं वर्तते । वोपदेवो हि वङ्गदेशीयः । तस्य पिता केशवः । लघुकायमपीदं व्याकरणं सर्वत्र समादृतम् । अस्य व्याकरणस्योपरि विद्यानिवासस्य मुग्धबोधटीका, दुर्गादासस्य सुबोधटीका इत्यादयः समुपलभ्यन्ते।

वस्तुतः अपाणिनीयव्याकरणानि बहूनि वर्तन्ते। यतोहि सर्वेषामुल्लेखो नात्र सम्भवति, अतः केषाञ्चन अपाणिनीयवैयाकरणानामेवात्र समुल्लेखो विहितः।

१.९ अध्यायस्य असमीयाभाषायां सारांशः

এই অধ্যায়ৰ জড়িয়তে আমি সংস্কৃত ব্যাকৰণৰ বিভিন্ন সম্প্ৰদায়সমূহৰ বিষয়ে বিস্তৃত বিৱৰণ লাভ কৰিছোঁ । সাধাৰণতে সম্প্ৰতি উপলব্ধ বিভিন্ন ব্যাকৰণ সম্প্ৰদায়ৰ ভিতৰত পাণিনীয় ব্যাকৰণেই সৰ্বজনবিদিত । সৰ্বজনগ্ৰাহ্য আৰু অত্যন্ত প্ৰামাণিক । গতিকে ব্যাকৰণ সম্প্ৰদায়সমূহৰ বিভাজনৰ বাবে পাণিনীয় ব্যাকৰণকেই মূলাধাৰ হিচাপে এই অধ্যায়ত গ্ৰহণ কৰাহৈছে । এইদৰে আমি ব্যাকৰণকতিনিপ্ৰকাৰে ভাগ কৰিব পাৰোঁ –

১. পাণিনিৰ পূৰ্বৱৰ্তী ব্যাকৰণ

2. পানিনীয় ব্যাকৰণ

৩. পাণিনিৰ উত্তৰৱৰ্তী ব্যাকৰণ

তাৰোপৰি পাণিনিৰ পূৰ্বৱৰ্তী ব্যাকৰণৰ কৰ্তাসকলৰ একাংশৰ বিষয়ে পাণিনীয়ে অষ্টাধ্যায়ীত উল্লেখ কৰিছে আৰু একাংশৰ বিষয়ে উল্লেখ কৰা নাই । গতিকে সেই দৃষ্টিত পানিনিৰ পূৰ্বৱৰ্তী ব্যাকৰণৰ আচার্যসকলক দুটা ভাগত বিভক্ত কৰিছোঁ –

১.পাণিনিৰ অনুগামী বৈয়াকৰণ

২.পাণিনিক অনুসৰণ নকৰা বৈয়াকৰণ

এই অধ্যায়ৰ অধ্যয়নৰ দ্বাৰা সংস্কৃত ব্যাকৰণশাস্ত্ৰৰ সম্প্রদায়বোৰৰ সাংগোপাংগ অৱধাৰণা লাভ কৰিবলৈ সক্ষম হ'ব ।

⏱ १.१० अध्यायात् किमवगतम् –

अध्यायेअस्मन् अधौ उल्लिखितानि विषयाणि अलोचितानि भवन्ति-

- व्याकरणस्य स्वरूपिवषये ज्ञानवन्तः।
- व्याकरणस्य आविर्भावविषये ज्ञातवन्तः।
- व्याकरणस्य भेदानां विषये ज्ञातवन्तः।
- प्राक्पाणिनीयाचार्याणां विषये ज्ञातवन्तः।
- मुनित्रायाणां परिचयं ज्ञातवन्तः।

❓ १.११ अग्रगत्याः निरीक्षणम्

१. व्याकरणशब्दस्य व्युत्पन्तिगतार्थः कः?

२. व्याकरणस्य बीजं कुत्र दृश्यते?

३. व्याकणस्य प्रथमप्रवक्ता कः?

४. व्याकरणस्य कति रूपाणि सन्ति?

५. पाणिनीयाष्टाध्याय्याम् उल्लिखितस्य एकस्य आचार्यस्य नाम लिखतु।

६. पाणिनेः अपरं नामद्वयं लिखतु।

७. पाणिनि-अष्टाध्याय्यां कति अध्यायाः सन्ति?

८. वार्तिकं केन लिखितम्?

९. पतञ्जलेः व्याकरणविषयकं ग्रन्थः कः?

१०. कातन्त्रव्याकरणस्य रचयिता कः?

११. वोपदेवस्य व्याकरणविषयकं ग्रन्थः कः?

✅ १.१२ अग्रगत्याः निरूपणम्

उत्तरम् १ - व्याक्रियन्तेऽसाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते येन तत् व्याकरणमिति।

उत्तरम् २- वैदिकसंहितासु।

उत्तरम् ३ - ब्रह्मा

उत्तरम् ४ - त्रीणि-छान्दसं, लौकिकं, छान्दालौकिकञ्च।

उत्तरम् ५ - भरद्वाजः।

उत्तरम् ६ - दाक्षीपुत्रः शालातुरीयः

उत्तरम् ७ - अष्टौ।

उत्तरम् ८ - कात्यायनेन।

उत्तरम् ९ - महाभाष्यम्।

उत्तरम् १० - शर्ववर्मा।

उत्तरम् ११ - मुग्धबोधः।

१.१३ अभ्यासप्रश्नाः –

(क) **वस्तुधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

१. 'व्याकरणम्' इति शब्दे कः धातुः?

२. व्याकरणमहाभाष्ये व्याकरणस्य लक्षणं किं प्रदत्तम्।

३. व्याकरणं वेदपुरुषस्य केन अङ्गेन सह उपमीयते ?

(ख) **संक्षेपप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया

१. व्याकरणम्

२. ब्रह्मा

३. पाणिनिः

४. नागेशभट्टः

(ग) **रचनाधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

१. व्याकरणस्य स्वरूपविषये एको लेखः प्रस्तूयताम्।

२. पाणिनीयव्याकरणसम्प्रदायम् आश्रित्य प्रबन्धः प्रस्तूयताम्।

३. पाणिनिपूर्ववर्त्तिनां वैयाकरणानां विषये एकः प्रबन्धः लिख्यताम्।

४. पाणिन्युत्तरवर्तिनां वैयाकरणानां विषये एको लेखः प्रस्तूयताम्।

*****

अध्यायः २ : पाणिनीयव्याकरणसम्प्रदायः - सामान्याध्ययनम्

अध्यायस्य संरचना

२.१ उद्देश्यम्
२.२ परिचयः
२.३ त्रिमुनिव्याकरणम्
२.४ पाणिनिः अष्टाध्यायी च
२.५ कात्यायनः वार्तिकञ्च
२.६ पतञ्जलिः महाभाष्यञ्च
२.७ पाणिनीयसम्प्रदायस्य अन्ये ग्रन्थाः
२.८ अध्यायात् किमवगतम्
२.९ ज्ञानाधिक्यम्
२.१० अग्रगत्याः निरूपणम्
२.११ अभ्यासप्रश्नाः

२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनादनन्तरं भवन्तः -

- पाणिनीयव्याकरणसम्प्रदायस्य परिचयं प्रातुं समर्थाः भविष्यन्ति।
- त्रिमुनिव्याकरणस्य स्वरूपं ज्ञातुं समर्थाः भविष्यन्ति।
- महर्षिपाणिनेः परिचयं तथा तत्कृत-अष्टाध्यायीप्रभृतिग्रन्थानां परिचयं प्रातुं समर्थाः भविष्यन्ति।
- कात्यायनस्य परिचयेन सह तत्कृतवार्तिकादिग्रन्थैः सह अपि च परिचिताः भविष्यन्ति।
- पतञ्जलेः परिचयं तथा च तदीयमहाभाष्यादिकृतीः ज्ञातुं समर्थाः भविष्यन्ति।
- त्रिमुनीतरपाणिनीयसम्प्रदायस्य विविधव्याकरणग्रन्थानां परिचयं प्राप्तुं समर्थाः भविष्यन्ति।

२.२ परिचयः

पूर्वस्मिन् अध्याये भवद्भिः संस्कृतव्याकरणस्य सुष्ठु अवधारणा प्राप्ता। यद्यपि व्याकरणक्षेत्रे विविधाः सम्प्रदायाः आसन् तथापि साम्प्रतं तु पाणिनीयः अपाणिनीयः च इति द्वौ व्याकरणसम्प्रदायौ एव प्रचलितौ प्रसिद्धौ च वर्तेते । यथार्थतस्तु भगवान् पाणिनिः एव संस्कृतव्याकरणशास्त्रस्य केन्द्रविन्दुः । यद्यपि प्रातिशाख्यकातन्त्रादिग्रन्थाः शब्दान् व्याकरोति तथापि पाणिनीयव्याकरणमेव लौकिकं वैदिकञ्च उभयविधं

शब्दराशिं व्याकरोति, तद्विषयेऽपि पूर्वस्मिन् अध्याये उक्तमेव । अतः संस्कृतस्य प्रधानभूतं व्याकरणं तु महर्षिपाणिनिकृता अष्टाध्यायी एव । सूत्रेषु निबद्धम् अष्टाध्यायीग्रन्थमाश्रृत्य एव अनन्तरं कात्यायनेन वार्तिकं पतञ्जलिना च महाभाष्यं प्रणीतम् । अष्टाध्याय्याः सूत्राणां यथार्थ्यज्ञानाय तु कात्यायनवार्तिकस्य पतञ्जलिमहाभाष्यस्य च ज्ञानं तु नितान्तमेव प्रयोजनीयम् । तेनैव पाणिनि-कात्यायन-पतञ्जलिख्यातां त्रिमुनिव्याकरणपरम्पराम् अनुसृत्य एव पाणिनीयव्याकरणपरम्परा समारब्धा । परवर्तिकालेषु केचन वैयाकरणाः पाणिनीयपरम्पराभिन्नं व्याकरणम् अरचयन् । ते च आचार्याः अपाणिनीयव्याकरणसम्प्रदाये परिगण्यन्ते । अपि च त्रिमुनिव्याकरणादनन्तरं पाणिनीयसम्प्रदायमेव समाश्रृत्य टीका-प्रकरण-दर्शनादिग्रन्थान् विरच्य सम्प्रदायमिमं प्रसारयामासुः नैके आचार्याः । पाणिनीयापाणिनीययोः उभयविधव्याकरणसम्प्रदाययोः सम्यक् ज्ञानाय पाणिने अष्टाध्यायाः अध्ययनम् अत्यन्तम् आवश्यकम् । तथा च पाणिनीयव्याकरणस्य साधु अध्ययनं संस्कृतभाषायाः शब्दानां प्रकृतिप्रत्ययादिबोधाय पाथेयं भविष्यति । अध्यायेऽस्मिन् पाणिनीयव्याकरणस्य साङ्गोपाङ्गविवेचनं क्रियते ।

२.३ त्रिमुनिव्याकरणम्

संस्कृतव्याकरणक्षेत्रे त्रिमुनिव्याकरणम् इति तु अत्यन्तं प्रसिद्धं वर्त्तते । अत्र त्रिमुनिपदेन पाणिनिः, कात्यायनः, पतञ्जलिः च इत्येते त्रयो वैयाकरणाचार्याः बुद्ध्यन्ते । त्रिमुनिव्याकरणपरम्परायाः प्रथमः आचार्यः सूत्रकारः पाणिनिः । तेन हि अष्टाध्यायीनामकः सूत्रग्रन्थः प्रणीतः । त्रिमुनिपरम्परायाः द्वितीयः आचार्यो वर्त्तते कात्यायनो वररुचिर्वा । यद्यपि कात्यायनेन रचितः स्वतन्त्रः ग्रन्थः साम्प्रतं नोपलभ्यते, तथापि महाभाष्ये संगृहीतानां वार्तिकानां पर्यालोचनेन तस्य कात्यायनस्य अष्टाध्याय्याः उपरि वार्तिककर्तृत्वं सिद्ध्यति । कात्यायनेन हि आवश्यकतानुसारं अष्टाध्याय्याः उपरि वार्तिकानि रचितानि, येन पाणिनिसूत्राणि सम्पूर्णतां गतानि । त्रिमुनिव्याकरणस्य अन्तिमः आचार्योऽस्ति पतञ्जलिः । पतञ्जलिना सकलजनबोधाय सूत्रवार्तिकानां व्याख्यारूपेण भाष्यग्रन्थं रचितवान् । तदेव भाष्यं महाभाष्यमिति लोके अत्यन्तं प्रसिद्धम् । इत्थं हि पाणिनीयसूत्रपुरकं कात्यायनवार्तिकं , सूत्रवार्तिकयोः व्याख्यानभूतं पातञ्जलमहाभाष्यम् । एवञ्च सूत्रवार्तिकमहाभाष्यसमुदितं व्याकरणं पूर्णाङ्गतां भजमानं त्रिमुनिव्याकरणरूपेण प्रसिद्धं लोके यद्यपि पाणिनीये व्याकरणे पाणिनेरेव प्राधान्यं तथापि उक्तानुक्तदुरुक्तदोषपरिहर्तुं वार्तिककर्तुः कात्यायनस्यापि महत्त्वं न्यूनतां नैव भजते । तथैव पतञ्जलेः शब्दानुशासनस्य व्याख्यानशैल्या पाणिनीयं व्याकरणं विभूषयत् लोकोत्तरकीर्तिमधिगच्छति तत्कृतं महाभाष्यम् । किञ्च विजयाभावे मतभेदे वा उत्तरोत्तरमुनीनां प्रामाण्यं स्वीक्रियते । एवं सूत्रकारापेक्षया वार्तिककारस्य, वार्तिकारापेक्षया भाष्यकारस्य प्रामाण्यं वर्तते । उच्यतेऽपि - "यथोत्तरं मुनीनां प्रामाण्यम्" इति । सर्वेषां सौकर्याय अत्र सूत्र-वार्तिक-भाष्याणां स्वरूपविषये किञ्चित् प्रस्तूयते ।

ज्ञातव्यम्

त्रिमुनिपदेन त्रयः आचार्याः ज्ञायन्ते - पाणिनिः – सूत्रकारः, कात्यायनः – वार्तिककारः, पतञ्जलिः –भाष्यकारः ।

सूत्रम् - नैकैराचार्यैः सूत्रस्य व्युत्पत्तिः 'सूचनात् सूत्रमि'ति प्रदत्ता, अर्थात् संकेतप्रदायकं संक्षिप्तवचनमेव सूत्रमिति । किञ्च केचित् सूचयति सूते सूत्रयति वा सूत्रं , सूत्र्यते ग्रथ्यते इति सूत्रम् इत्यादीनि सूत्रलक्षणानि कथयन्ति । सूत्रस्य लक्षणं वायुपुराणे (४९/१४२) एवं प्रदत्तं वर्तते एकस्मिन् पद्ये-

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।

अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥"

अर्थात् अक्षराणाम् अल्पत्वं, सन्देहाभाववत्वं, सारभूतत्वं, वक्तव्यसर्वविषयव्यापित्वं , निरर्थकाक्षरराहित्यं , अर्थदोषराहित्यञ्च एते यत्र भवन्ति तदेव सूत्रमिति अभिधीयते ।

पाणिनीयाष्टाध्यायी तु सूत्रे एव निवद्धा वर्तते । व्याकरणशास्त्रवद् दर्शनादिशास्त्रेष्वपि सूत्ररीतिरेव गृहीता दृश्यते । दर्शनशास्त्रस्य मूलग्रन्थास्तु सूत्रे एव निबद्धाः सन्ति । यथा– सांख्यसूत्रं ,योगसूत्रं ,न्यायसूत्रं , वैशेषिकसूत्रं , ब्रह्मसूत्रम् इत्यादीनि । विशेषतया एका उक्तिरत्यन्तं प्रसिद्धाऽस्ति यत् – "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इति । तस्माद् व्याकरणशास्त्रे स्वल्पकथनेन महदर्थप्रकाशस्य महत्त्वं विद्यते । तदर्थं सूत्रलक्षणमेवं वक्तुं शक्यते यत्– अल्पाक्षरत्वे सति बह्वर्थबोधकत्वं सूत्रत्वमिति । यथा 'वृद्धिरादैच्' इति सूत्रेण वृद्धिः, आद् , ऐच् इति पदत्रयेण व्याकरणशास्त्रस्य वृद्धिवर्णानां निर्देशः कृतः ।

व्याकरणे सूत्राणां षड् भेदाः सन्ति । यथोक्तम्-

" संज्ञा च परिभाषा विधिर्नियम एव च ।

अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥ "

सूत्राणां षड्भेदाः यथा– संज्ञा, परिभाषा , विधिः, नियमः, अतिदेशः , अधिकारश्च ।

वार्तिकम् - पराशरोपपुराणे वार्तिकस्य लक्षणमेवम् उक्तम् -

"उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।

तं ग्रन्थं वार्तिकं प्राहु वार्तिकज्ञा मनीषिणः ॥ "

अर्थात् यत्र सूत्रे उक्ताः, अनुक्ताः , दुरुक्ताः विषयाः विचार्यते, तदेव वार्तिकम् इति कथ्यते । अथवा वार्तिकं नाम सूत्रमधिकृत्य प्रोक्तम् उपसूत्रम् । तच्च उक्तं विशदयति स्पष्टयति वा, अनुक्तं किन्तु कथनीयं कथयति, दुरुक्तं सूक्तं करोति च। अपि च वार्तिकलक्षणं विष्णुधर्मोत्तरे एवं प्रदत्तं वर्तते –

"प्रयोजनं संशयनिर्णयौ च व्याख्याविशेषो गुरुलाघवञ्च ।

कृतव्युदासोऽकृतशासनं च स वार्तिको धर्मगुणोष्टकश्च ॥ "

उदाहरणत्वेन यथा 'यणः प्रतिषेधो वाच्यः' इति वार्तिकम्। सन्धौ 'सुधी + उपास्यः' इति स्थिते प्रक्रियायां 'सुध् य् + उपास्यः' इति जाते 'संयोगान्तस्य लोपः' इति सूत्रेण यकारस्य लोपे प्राप्ते, उक्तवार्तिकेन यकारस्य लोपो वार्यते।

भाष्यम् - विष्णुधर्मोत्तरे भाष्यस्य लक्षणं प्रदत्तम् एवम् -

" सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।

स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥"

अर्थात् यत्र सूत्रानुसारिभिः वाक्यैः सुत्रस्यार्थः वर्ण्यते, तथा च स्वस्य विचारो अपि ग्रन्थकारेण प्रदीयते तदेव भाष्यमिति कथ्यते । पदमञ्जरीकारेण हरदत्तेनापि एवम् उक्तं यत्- 'आक्षेपसमाधानपरो ग्रन्थो भाष्यम्' इति । अत्राक्षेपशब्दस्य अर्थोऽस्ति जिज्ञासा समस्या प्रश्नो वा अतो यस्मिन् ग्रन्थे जिज्ञासानां प्रश्नानां वा समाधानं दीयते , स एव ग्रन्थो भाष्यमिति उच्यते । संस्कृतव्याकरणे पतञ्जलेः महाभाष्यं विशिष्टं स्थानमधिकरोति । पतञ्जलिकृतमहाभाष्यं पाणिनीयाष्टाध्याय्याः सूत्रस्थपदानि सविस्तरम् आलोचयति । न केवलं सूत्राणि अपि वार्तिकानि अपि व्याख्यायते भाष्यग्रन्थे।

एवं हि पाणिनिकृता अष्टाध्यायी , कात्यायनकृतं वार्तिकं ,पतञ्जलिकृतं महाभाष्यञ्च समुदायरूपेण त्रिमुनिव्याकरणमिति कथ्यते । मुनित्रयव्याकरणाध्ययनेनैव संस्कृतभाषायाः शब्दानां प्रकृतिप्रत्ययादीनां सम्प्रत्ययो भवति।

अग्रगत्याः निरीक्षणम्

१. 'त्रिमुनि' इति पदस्य कोऽर्थः ?

.....

२. सूत्रस्य लक्षणं व्याख्यायताम्।

.....

३. वार्तिकस्य स्वरूपं लिख्यताम्।

.....

४. भाष्यशब्दस्य स्वरूपं निरूप्यताम्।

.....

२.४ पाणिनिः अष्टाध्यायी च -

भगवान् पाणिनिः संस्कृतव्याकरणक्षेत्रे प्रमुखस्थानं भजते। यद्यपि तत्पूर्वमपि बहवो व्याकरणाचार्याः आसन्, तथापि उपस्थापनप्राविण्येन पाणिनिरेव वैयाकरणेषु केन्द्रविन्दुत्वं विलसति। महद् कष्टप्रदं यत् तादृशस्य वैयाकरणस्य परिचयस्थानकालादिसम्बन्धिप्रामाणिकं तथ्यं नोपलभ्यते। तथापि महामुनिपाणिनिसम्बन्धिनी, किम्वदन्ती जनश्रुतिर्वा वर्तते। तदाधारेण तस्य स्थानकालादिकम् अनुमातुं शक्यते।

स हि पाणिन-पाणिनि-पणिपुत्र-दाक्षीपुत्र-शालाङ्कि-शालातुरीय-आहिकादिनामभिः अभिधीयते। पाणिनेः गोत्रनाम पाणिनिः, पिता शलङ्कः, माता दाक्षी, मातुलः व्याडिः, स एव दाक्षिर्दाक्षायणो वा, अनुजस्तु पिङ्गलः। तस्य आचार्यः वर्षोपाध्यायः पाणिनेः जन्म शलातुरनामके ग्रामे (साम्प्रतं पाकिस्तानदेशे) अभवद् इति अनुमीयते। शलातुरनामके जनित्वादेव तस्यापरं नाम 'शलातुरीयः' इति कथ्यते। केचन पण्डिताः पाणिनेः प्रकृतं नाम 'आहिक' इत्येव कथयन्ति, पाणिनिस्तु गोत्रनामेति मन्यन्ते। 'पाणिनि' इत्यस्य शब्दस्य व्युत्पत्तिः वैयाकरणैः द्विधा प्रदत्ता दृश्यते। एके तु 'पणिन्' इति शब्दात् अपत्यार्थक-अण्प्रत्यये भूते पुनः अपत्यार्थे 'इञ्'-प्रत्यये भूते 'पाणिनि' इति प्रयोगो निष्पद्यते। अपरे तु पणिन् इति शब्दस्य पर्यायः 'पणिन' शब्दः तस्मात् 'अत इञ्' इति सूत्रेण 'इत्' -प्रत्यये 'पाणिनि' इति शब्दो उपपद्यते।

यद्यपि पाणिनेः आविर्भावकालविषये पण्डितेषु वैमत्यं दृश्यते। तथापि तस्य आविर्भावकालः ईशपूर्वसप्तमशतकादारभ्यः चतुर्थशतकं (700 BC-400 BC) यावत् इति स्वीक्रियते। पाणिनि सम्बन्धीनि बहुनि कथानकानि उपलभ्यन्ते। कथासरित्सागरे प्राप्यते यत् प्रारम्भिककाले जडबुद्धियुक्त आसीत् इति। यथोक्तम्-

"अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्।

तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत्॥"

पाटलिपुत्रे वर्षाचार्यस्य अनेके शिष्या आसन्। तेषु पाणिनिर्नाम मूढमतिः सर्वैस्तिरकृतोऽन्यतम आसीत्। सः पाणिनिः गुरुपत्न्युपदेशेन तपस्तप्तुं गोपर्वतं गतवान्। तत्र हि स महेश्वरमाशुतोषं तपसा प्रसाद्य तत्कृपया सम्पूर्णं व्याकरणज्ञानं लब्धवान्। यथोक्तं पाणिनीयशिक्षायाम् –

"येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ "

ततश्च महेश्वरात् लब्धविद्यः पाणिनिः पाटलिपुत्रम् समागत्य मुखे सर्वं विनिवेद्य कृतार्थः सञ्जातः। तदनन्तरं वररुचिनामा पाणिनेः सहाध्यायी पाणिनिं शास्त्रचर्चानिमित्तम् आहुतवान्। प्रवृत्ते शास्त्रार्थे यदा पाणिनिः पराजयद्वारे समुपस्थितः, तदा भगवता शङ्करेण गगने महान् हुङ्कारः कृतः, येन वररुचिः हतप्रभः सञ्जातः। अनन्तरं पाणिनिः तस्मिन् शास्त्रार्थे विजयं प्राप्तवान्। ततश्च खिन्नो वररुचिः हिमालयं गत्वा महादेवम् आराधितवान्। ततश्च लब्धकृत्स्नव्याकरणः स पुनः पाटलिपुत्रम् आगच्छत्। तदानीं पाणिनिसूत्राणि सम्प्रचलितानि आसन्। वररुचिरपि तत्र अनुक्तदुरुक्तपक्षम् अवलम्ब्य वार्तिकानि रचितवान् इति। पाणिनिसूत्राणि तु पाणिनिना भगवतः शङ्करस्य ढक्कानिनादमादाय कृतानि इति स्वीक्रियते।

महर्षिपाणिनिना अनेके ग्रन्थाः प्रणीताः, तद्विषये किञ्चित् अत्र प्रस्तूयते -

अष्टाध्यायी –

महर्षिपाणिनिकृता अष्टाध्यायी संस्कृतव्याकरणस्य अमूल्या सम्पत्। न केवलं संस्कृतभाषायाम् अपि निखिलभाषासु अपि जगति अष्टाध्यायीव वैज्ञानिकं व्याकरणं नोपलभ्यते। अष्टाध्यायीनामके सूत्रग्रन्थे अष्टौ अध्यायाः सन्ति। अष्टौ अध्यायाः विद्यमानत्वादेव अष्टाध्यायीति अस्य ग्रन्थस्य नामकरणं प्रत्येकमपि अध्याये चत्वारः पादाः सन्ति। एवम् आहत्य अष्टाध्याय्यां द्वात्रिंशत् पादाः सन्ति (4x8=32)। पाणिन्यष्टाध्याय्याः सूत्रसंख्याविषये मतान्तरं दृश्यते। कथ्यते हि पाणिनीयाष्टाध्याय्यां ३९९६ (3996) सूत्राणि सन्तीति। यथोक्तम्-

"त्रीणि सूत्रसहस्राणि तथा नवशतानि च।

षण्णवतिश्च सूत्राणां पाणिनिः कृतवान् स्वयम्॥ "

किन्तु सम्प्रति समुपलब्धे अष्टाध्यायीग्रन्थे ३९८३ (3983) मितानि एव सूत्राणि सन्तीति कथ्यते। तत्र प्रथमाध्याये संज्ञानां परिभाषाणां च वर्णनं वर्तते। यत्र एकपञ्चाशदुत्तरत्रिशतसूत्राणि (351) सन्ति। द्वितीयाध्यायस्य वर्ण्यविषयाः विभक्त्यर्थाः समासाश्च वर्तन्ते। अस्मिन् द्वितीयाध्याये अष्टषष्ट्युत्तरद्विशतसूत्राणि (268) सन्ति। तृतीयाध्याये धातुभ्यो विहिताः प्रत्ययाः सुव्यवस्थापिताः यत्र सूत्राणां संख्या एकत्रिंशदुत्तरषट्शतम् (631)। चतुर्थाध्याये तद्धितप्रत्यया निरूपिताः दृश्यन्ते, यत्र पञ्चत्रिंशदुत्तरषट्शतसूत्राणि

(635) सन्ति । पञ्चमाध्याये तद्धितप्रकरणस्था एव प्रत्ययाः विवेचिताः सन्ति ,यत्र सूत्राणां संख्या पञ्चपञ्चाशदुत्तरपञ्चशतम् (555) । षष्ठाध्याये प्रकृतिप्रत्ययसम्बन्धिकायेण सह तिङ्सन्धिस्वरादीनां निरूपणं वर्तते ,यत्र षड्त्रिंशदुत्तरसप्तशतं (736) सूत्राणि सन्ति । सप्तमाध्याये अङ्गाधिकारः सन्निवेशितः तथा च प्रत्ययसम्बन्धिनी निखिलानि कार्याण्यपि निरूपितानि सन्ति । तत्र अष्टात्रिंशदुत्तरचतुःशतसूत्राणि (438) सन्ति । अन्तिमे च अष्टमाध्याये द्वित्वसम्बन्धीनि विधानानि, पूर्वत्रासिद्धम् इति अधिकारसूत्रप्रकरणानि विवेचितानि सन्ति । तत्र एकोनसप्तत्युत्तरत्रिंशतसंख्यकानि (369) सूत्राणि सन्ति ।

अस्या अष्टाध्यायाः चत्वारो खिलपाठाः वर्तन्ते । अत्र हि खिलशब्दो अवयवार्थकः । अतः पाणिनिप्रोक्तं चतुःसंख्यकखिलपाठसंयुक्तं पञ्चाङ्गमेव व्याकरणं पूर्णतां नयति । अष्टाध्याय्याः प्रथमं सूत्रं 'वृद्धिरादैच्' तथा च अन्तिमं सूत्रम् 'अ अ' इति ।

धातुपाठः –

पाणिनिपञ्चाङ्गव्याकरणस्य द्वितीयमङ्गं धातुपाठः । सामान्यतस्तु धातुपाठः कस्यापि व्याकरणस्य मूलतत्वम् । सर्वे हि शब्दाः धातुमूला इति धातोः प्राथम्यमपरिहार्यम् । एवमेव पाणिनीयो धातुपाठः सम्प्रति समुपलब्धेषु धातुपाठेषु अन्यतमः । पाणिनीये धातुपाठे हि द्विसहस्रपरिमिताः धातवः सन्ति । ते च धातवः दशसु गणेषु विभक्ताः सन्ति । तत्र दश गणाः यथा– भ्वादिगणः , अदादिगणः, जुहोत्यादिगणः , दिवादिगणः, स्वादिगणः, रुधादिगणः, तुदादिगणः, तनादिगणः,क्रयादिगणः , चुरादिगणश्च ।

गणपाठः –

अल्पाक्षरमित्यादिसूत्रलक्षणत्वात् सर्वेषां शब्दानां सूत्रेषु ग्रथनं नैव सम्भवति । अतः पाणिनिना समस्तानाम् आवश्यकशब्दानां गणपाठत्वेन परिकल्पनां कृत्वा तत्र तत्र यथास्थानं सन्निवेशो विहितः । गणपाठान्तर्गतानि अष्टाध्याय्याः षट्पञ्चाशदुत्तरद्विशतसूत्राणि सन्ति । यथा– सर्वादिगणः, स्वरादिगणः, चादिगणः, प्रादिगणः, अजादिगणः इत्यादयः ।

लिङ्गानुशासनम् –

स्त्रीत्वपुंस्त्वादिलिङ्गानि यथा प्राणिजगति प्रत्येकं व्यक्तीनां संस्थानेन सम्बद्धं तथैव तत् प्रत्येकनामशब्दानाम् अपि अविभाज्यम् अङ्गम् । संस्कृतभाषायां हि शब्दमाश्रित्य एव लिङ्गं प्रवर्तते । भगवान् पाणिनिर्लिङ्गानुशासनमपि रचयामास । तस्य स्वरूपं सूत्रात्मकं वर्तते । तत्र हि १८७ सूत्राणि वर्तन्ते ।

शिक्षा –

भगवान् पाणिनिर्व्याकरणस्य अङ्गरूपेण शिक्षसूत्राणां प्रवचनं कृतवान् , या हि 'पाणिनीयशिक्षा' इति नाम्ना प्रसिद्धा । अस्या हि शिक्षायाः सूत्रात्मकः श्लोकात्मकः चेति द्विविधः पाठ उपलभ्यते । श्लोकात्मिकाया

पाणिनीयशिक्षायाः बाहुल्येन प्रचलनं दृश्यते, परन्तु सूत्रात्मिका शिक्षा अभ्यासाभावाद् लुप्तप्राया । शिक्षायाम् अस्याम् अष्टौ प्रकरणानि सन्ति । तानि यथा– स्थानप्रकरणं , करणप्रकरणम्, अन्तःप्रत्यन्तप्रकरणं, बाह्यप्रयन्तप्रकरणं, स्थानपीडनप्रकरणं , वृत्तिकारप्रकरणं, प्रक्रमप्रकरणं, नाभितलप्रकरणञ्च ।

एतानि एव अष्टाध्यायीरूपः सूत्रपाठः, धातुपाठः, गणपाठः , लिङ्गानुशासनं, शिक्षा चेति पञ्चाङ्गानि पाणिनिना ग्रथितानि इति कारणेन पाणिनीयव्याकरणस्य पञ्चाङ्गव्याकरणमिति प्रसिद्धिः लोके ।

उणादिसूत्राणि -

उणादिसूत्राणम् अपि कर्तृत्वं पाणिनेरेवेति मन्यन्ते केचित् पण्डिताः । तत्र पञ्चपादाः सन्ति , यत्र आहत्य ७५९ सूत्राणि सन्ति ।

जाम्बवतीविजयः –

अस्य महाकाव्यस्य प्रणेता पाणिनिरिति मन्यते । अस्य महाकाव्यस्य अपरं नाम 'पातालविजयम्' इति । अत्र श्रीकृष्णजाम्बवत्योः परिणयकथा वर्णिताऽस्ति ।

अग्रगत्याः निरीक्षणम्

५. पाणिनेरेकम् अपरं नाम लिख्यताम् ।

.....

६. पाणिनिः कस्माद् व्याकरणविद्यां लब्धवान् ?

.....

७. अष्टाध्याय्यां कति पादाः सन्ति ?

.....

२.५ कात्यायनः वार्तिकञ्च

कात्यायनेन पाणिनीयसूत्राणामुपरि वार्तिकानि रचितानि इति ज्ञातमेव । त्रिमुनिव्याकरणे कात्यायनः द्वितीयः । कात्यायनस्य अपरं नाम वररुचिरिति । पुरुषोत्तमदेवेन त्रिदण्डकोषे कात्यः, कात्यायनः, पुनर्वसुः, मेधजित् इति वररुचेः पर्यायत्वेन लिखति । पाणिनिकात्यायनयोः शास्त्रार्थकथाविषये पूर्वमुक्तमेव । आचार्यवररुचेः आविर्भावकालः पाणिनिसमकालिकम् अन्यमान्यैः पण्डितैः ईशापूर्वचतुर्थशतकमिति अनुमीयते । राजशेखरस्य काव्यमीमांसाग्रन्थे एवं प्राप्यते यत्- "श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा । अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः । वररुचिपतञ्जली इह परीक्षिताः , ख्यातिमुपजग्मुः ॥" तस्मात् ज्ञायते यत् तया पाणिनिना सह कृतया शास्त्रपरिक्षया कात्यायनो वररुचिर्वा प्रसिद्धिं गतः । किंवदन्त्यनुसारं वररुचि-कात्यायनस्य

पिताऽसीत् सोमदत्तः, माता च वसुदत्तेति । कात्यायनो हि वर्षनामकस्य गुरोः सन्निधौ विद्यामवाप्य अनन्तरं ऐन्द्रव्याकरणे निष्णातोऽभूत् । कात्यायनस्य जन्मस्थानविषये नैकमत्यं दृश्यते । "प्रियतद्धिता दाक्षिणात्याः" इत्यादिवचनानुसारेण कात्यायनं दाक्षिणात्यं मन्यन्ते । कथासरित्सागरे कौशाम्बी कात्यायनस्य जन्मभूमित्वेन निश्चितः ।

वार्तिकम् –

कात्यायनस्य वार्तिकपाठः पाणिनीयव्याकरणस्य नितान्तमेव महत्वपूर्णम् अङ्गं वर्तते । तद्विरहे हि अष्टाध्याय्याः पूर्णत्वमेव हीयते । महतः दुःखस्य विषयो यत् कात्यायनकृतवार्तिकग्रन्थः स्वतन्त्ररूपेण नैवोपलभ्यते । कात्यायनवार्तिकमाधारीकृत्य एव महाभाष्यं प्रणीतम् । महर्षिकात्यायनेन अष्टाध्याय्याः द्वादशशतपरिमितसूत्राणामुपरि वार्तिकमरचयत् । यद्यपि वार्तिकानां संख्या निर्दिष्टा न वर्तते तथापि कात्यायनकृतवार्तिकानां संख्या पञ्चसहस्रम् इति अनुमीयते । यद्यपि महाभाष्यं कात्यायनवार्तिकम् आधृत्य रचितं तथापि तत्र कात्यायनेतरवार्तिकानाम् उल्लेखत्वात् कात्यायनवार्तिकसंख्या निश्चयेन वक्तुं न शक्यते । किञ्च कात्यायनेन सर्वेषां पाणिनीयसूत्राणामुपरि वार्तिकं न प्रणीतम् । तत्र केषाञ्चन सूत्राणां तु बहुनि वार्तिकानि प्रणीतानि । कात्यायनस्य कानिचिद्वार्तिकानि तु सूत्रपूरकाणि सन्ति, कानिचिच्च सूत्राणि प्रतिषेधकानि । यथा- 'संयोगान्तस्य लोपः' इत्यस्य सूत्रस्य 'यणः प्रतिषेधो वाच्यः' इति वार्तिकम् । कात्यायनवार्तिकपाठस्य प्रथमं वार्तिकं 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति । किन्तु केचन 'सिद्धे शब्दार्थसम्बन्धे' इति प्रथमं वार्तिकमिति कथयन्ति ।

कात्यायनो हि पाणिनेः समालोचकोऽपि आसीत् । स हि यत्रैव पाणिन्यष्टाध्याय्याः सूत्रेषु त्रुतिं पश्यति, तत्र तत्परिष्काराय सद्य एव वार्तिकं प्रवर्तते । अतः पाणिन्यष्टाध्याय्याः सूत्राणां अर्थपूरणाय निन्तामेव आवश्यकं वार्तिकम् ।

अग्रगत्याः निरीक्षणम्

८. कात्यायनस्य अपरं नाम किम् ?

……..……

९. कात्यायनस्य गुरुः कः ?

……

१०. कात्यायनवार्तिकानाम् आनुमानिकी संख्या का ?

……

११. एकस्य वार्तिकस्य उदाहरणं दीयताम् ?

……

कात्यायनस्य अन्ये ग्रन्थाः -

स्वर्गारोहनकाव्यम् –

कात्यायनवररुचिना व्याकरणोदाहरणात्मकं 'स्वर्गारोहणं' नाम महाकाव्यं प्रणीतमासीदिति ज्ञायते । महाराजसमुद्रगुप्तेन कृष्णचरितस्य मुनिवर्णने एवमुक्तम्-

"यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि ।

काव्येन रुचिरेणैव ख्यातो वररुचिः कविः ॥ "

अस्य काव्यस्य उद्धरणानि शार्ङ्गधरपद्धति – सदुक्तिकर्णामृत – सुभाषितमुक्तावलीप्रभृतिषु ग्रन्थेषु उपलभ्यते ।

भ्राजश्लोकः –

महाभाष्ये भ्राजसंज्ञकश्लोकानाम् उल्लेखो प्राप्यते । कैयत-हरदत्त-नागेशभट्टादीनां मतं यत् भ्राजसंज्ञकश्लोकानां कर्ता कात्यायनः एवेति ।

उभयसारिकाभाणः –

मद्रासात्(साम्प्रतं चेन्नई) चतुर्भाणी प्रकाशितः। तेषु वररुचिकृतः 'उभयसारिका' नामकः भाणः अन्यतमः । तस्य भाणस्य अन्ते एवमुक्तमस्ति - "इति श्रीमद्वररुचिमुनिकृतिरुभयसारिकानामथाः समाप्तः" इति ।

२.६ पतञ्जलिः महाभाष्यञ्च -

त्रिमुनिव्याकरणस्य अन्तिमाचार्यः पतञ्जलिः । पतञ्जलिकृतमहाभाष्यग्रन्थः पाणिनिव्याकरणाध्ययने विशेषभूमिकाम् अधिकरोति । याथार्थ्येन महाभाष्यं विना पाणिनिव्याकरणस्य ज्ञानं सम्पूर्णतां न याति । पतञ्जलिविषयकानि नैकाथानकानि श्रूयन्ते । महाभाष्ये पतञ्जलिः आत्मानं पुष्यमित्रस्य पुरोहित इति कथयति, यथोक्तम्- 'इह पुष्यमित्रं याजयामः' (३/२/१२३) । पण्डितानां मतानुसारं स सूर्यवंशीयराज्ञः पुष्यमित्रस्य पुरोहित आसीत् । तदनुसारं पतञ्जलेः समयः ईशापूर्वद्वितीयशतकमिति स्वीक्रियते । भगवतः पतञ्जलेः अनेकानि नामानि ग्रन्थेषु स्मर्यन्ते । तानि यथा– गोनर्दीयः, गोणिकापुत्रः, नागनाथः, अहिपतिः, फणी, फणिभृत् , शेषः, शेषराजः, शेषाहिः, चूर्णिकारः, पदकारश्च । गोनर्दनामके स्थाने पतञ्जलेः जन्मत्वाद् तस्य नाम गोनर्दीय इति । तस्य मातुर्नाम आसीत् गोणिकादेवी, तस्मात् तस्यापरं नाम 'गोणिकापुत्र' इति । अपरं किंवदन्त्यनुसारं पतञ्जलिः शेषावतारः । अनुमीयते यत् एकदा शिवनृत्यदर्शनकामः शेषनागः नारायणं प्रार्थितवान् । तदानीं भगवान् नारायणः पाणिनिव्याकरणस्य भाष्यरचनेन तत्सम्भविष्यतीति समुपदिष्टवान् । भगवतः उपदेशमवाप्य शेषनागः गोनर्ददेशे तपस्यरतां गोणिकानाम्नीं मुनिकन्यां मातृत्वेन स्वीकारोद्देश्येन सूर्यार्घ्यस्य मध्ये सूक्ष्मदेशे प्रविष्टवान् । तदनन्तरं तदञ्जलिः पतिते सति तापसमूर्त्तिम् अधरत् । पतिताञ्जलेः प्रादूर्भावत्वात् तस्य नाम

'पतञ्जलिः' इति नामकरणमकरोत् तस्य माता महादेवप्रसादेन लब्धविद्यः पतञ्जलिः अष्टाध्यायीग्रन्थस्योपरि जगत्प्रसिद्धं सर्वोत्तमं महाभाष्यं प्रणीतवान्।

महाभाष्यम् –

व्याकरणसम्बद्धम् अपि महाभाष्यं सरलं सरसञ्च वर्तते। महाभाष्ये आहत्य ८५ आह्निकानि सन्ति। वार्तिकमेवावलम्ब्यास्य महाभाष्यस्य प्रवृत्तिः। उच्यतेऽपि- "संवादशैल्या प्रोक्तं हि महाभाष्यमिदं वार्तिकानामेव व्याख्यानम्" इति।

पतञ्जलिना महाभाष्ये पाणिनीयसूत्राणि स्वातन्त्र्येण कानिचेदेव व्याख्यातानि । तेनेदं महाभाष्यं वार्तिकभाष्यं , वार्तिकानि च भाष्यसूत्राणि। येषु हि सूत्रेषु वार्तिकानि न सन्ति ,तत्र प्रायेण भाष्यमपि न दृश्यते। तथापि महाभाष्यं हि सूत्रसमर्थकम्। यद्यपि वार्तिककारेण सूत्रकारः पाणिनिः प्रत्याख्यातोऽपि तत्र पतञ्जलिकृतं भाष्यं तु युक्त्या सूत्रमेव मण्डयति। महाभाष्यकारेण पतञ्जलिना स्वभाष्यग्रन्थे अष्टाध्याय्याः केवलं १७१३ सूत्राणामेव व्याख्या विहिता। अष्टाध्याय्याः प्रथमाध्यायस्य प्रथमपादस्य सूत्राणि महाभाष्ये नवसु आह्निकेषु विभज्य तेषां भाष्यं विहितं महाभाष्यकारेण । महाभाष्यस्य एतानि नव आह्निकानि समुदायरूपेण 'नवाह्निकभाष्यमि'ति अपि उच्यते । अत्र प्रथमाह्निकस्य नाम 'पस्पशाह्निकम्' इति । कोशकारानुसारं पस्पशशब्दस्यार्थः प्रस्तावना भूमिका वा , तथा च अह्ना निर्वृत्तम् इति आह्निकम् अर्थात् एकस्मिन् दिने एव अध्यापनीयम् । महाभाष्यस्य पस्पशाख्यास्य प्रथमाह्निकस्य विशिष्टं महत्त्वं वर्तते । अस्य पस्पशाह्निकस्य प्राशस्त्यं श्रूयते एवम्–

"शास्त्रेष्वाद्यं व्याकरणं मुख्यं तत्रापि पाणिनेः।

रम्या तत्र महाभाष्यं रम्या तत्रापि पस्पशा॥ "

अस्य श्लोकस्य अयमेवाशयो यत् – सकलशास्त्रेषु व्याकरणशास्त्रं मुख्यं प्रधानं वा। व्याकरणशास्त्रेष्वपि पाणिनीयव्याकरणमर्थात् अष्टाध्यायीनामकं व्याकरणं श्रेष्ठम्। तत्र अष्टाध्याय्याः भाष्यं पतञ्जलिकृतं महाभाष्यम् अत्यन्तं रम्यम्। महाभाष्येऽपि अतिशयरमनीयं पस्पशाह्निकम्।

पूर्वमुक्तमेव यत् महाभाष्यकारेण पतञ्जलिना पाणिनीयसूत्रैः साकं कात्यायनवार्तिकानामपि व्याख्या विहिता। किन्तु क्वचित् क्वचित् तत्तत्सूत्रवार्तिकव्याख्यानक्रमे प्रयोजनानुसारं पतञ्जलिना कतिपयवार्तिकानि रचितानि वर्तन्ते। पतञ्जलिना स्वमहाभाष्ये रचितानि वार्तिकानि 'इष्टि' इति कथ्यन्ते।

'अथ शब्दानुशासनमि'ति वाक्येन पातञ्जलमहाभाष्यं प्रारभते। महाभाष्यस्य प्रथमाह्निके पस्पशाह्निके शब्दस्वरूपं, व्याकरणप्रयोजनं, व्याकरणलक्षणम् इत्यादयो बहवो गूढविषयाः निरूपिताः सन्ति । अस्मिन्नेवाह्निके 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकस्य व्याख्या निरूपिता भाष्यकारेण।

एवं हि महाभाष्यं हि न केवलं व्याकरणग्रन्थ अपि तु इदं हि भारतीयसंस्कृते विश्वकोशोऽपि अस्ति । किञ्च अस्मिन्नेव ग्रन्थे समग्रभारतवर्षस्य भाषिकमानचित्रं परिस्फुटं भवति तत्कालिकसमयस्य । अस्य महाभाष्यस्योपरि भर्तृहरि-कैयट-ज्येष्ठकलश-मैत्रेयरक्षित-पुरुषोत्तमदेवप्रभृतिभिः वैयाकरणैः व्याख्या रचिता वर्तते ।

पतञ्जलिकृताः अन्ये ग्रन्थाः -

महानन्दकाव्यम् –

महाराजसमुद्रगुप्तविरचितस्य कृष्णचरितकाव्यस्य पर्यालोचनेन ज्ञायते यत् महाभाष्यकारपतञ्जलिना 'महानन्द'नामकं महाकाव्यं रचितमिति ।

सिद्धान्तसारावली –

वातस्कन्धपैतस्कन्धोपेत सिद्धान्तसारावलीनामको वैद्यकग्रन्थः पतञ्जलिविरचित इति प्राप्यते ।

आर्यापञ्चाशीतिः –

पतञ्जलिना आर्यापञ्चाशीतिनामकः सेश्वरसांख्यसम्प्रदायस्य कारिकाग्रन्थो विरचितः । सांख्यकारिकायाः युक्तिदीपिकायामस्य बहूनि उद्धरणानि प्राप्यन्ते ।

एतदतरिक्तमपि पतञ्जलिकृतत्वेन चरकपरिष्कारः , कोषग्रन्थः , साहित्यशास्त्रं , लोहशास्त्रञ्च इत्यादयो ग्रन्थाः श्रूयन्ते ।

अग्रगत्याः निरीक्षणम्

१२. पतञ्जलिः कस्य राज्ञः पुरोहितः आसीत् ?

.....

१३. 'शेष' इति कस्य अपरं नाम ?

.....

१४. पतञ्जलेः मातुः नाम किम् ?

.....

१५. महाभाष्ये कति आह्निकानि सन्ति ?

.....

२.७ पाणिनीयसम्प्रदायस्य अन्ये ग्रन्थाः -

पाणिनिकात्यायनपतञ्जलिकृतानि सूत्रवार्तिकभाष्यानि समाधारीकृत्य बहुभिः वैयाकरणैः व्याकरणग्रन्थरचनेन त्रिमुनिव्याकरणं सर्वत्र प्रसारितमभवत् । त्रिमुनिव्याकरणम् अवलम्ब्य नैकपण्डितैः वृत्तिटीकाप्रक्रियादर्शनग्रन्थाः विरचिताः । व्याकरणस्य यथार्थस्वरूपावगमनाय तेषामपि परवर्तिग्रन्थानामध्ययनं नितान्तमेव आवश्यकम् । अत्र तेषां वैयाकरणानां केषाञ्चन विषये किञ्चित् उल्लिख्यते।

वामनजयादित्यौ –

वामनेन जयादित्येन च कृता 'काशिकावृत्तिः' पाणिनीयसूत्रवृत्तिषु प्रमुखस्थानीया वर्तते । वामनजयादित्यौ उभौ पाणिनीयाष्टाध्याय्याः अष्टानाम् अध्यायानामुपरि वृत्तिं रचितवन्तौ । वृत्तिस्तु पदच्छेद-पदार्थोक्ति-समासादिविग्रह-अनुवृत्ति-वाक्यार्थ-उदाहरणादिसंयुक्तस्य विस्तृतविवरणात्मकस्य व्याख्यानस्य लघुरूपम् । अष्टाध्याय्याः काशिकावृत्ते कर्तृत्वविषये पण्डितानां मतभेदः परिलक्ष्यते । केचन अष्टाध्याय्याः प्रथमचतुर्नाम् अध्यायानां तद्वृत्तिः जयादित्येन कृता तथा च अपरचतुर्णाम् अध्यायानां वृत्तिः वामनेन कृता इति मन्यते । तथापि युधिष्ठिरमीमांसकेन स्वग्रन्थे सप्रमाणं निर्दिशति यत् प्रथमपञ्चाध्यायानां वृत्तिः जयादित्यकृता तथा च शेषाणाञ्च त्रयाणाम् अध्यायानां वृत्तिः वामनेन कृतेति । वामनजयादित्ययोः कालः ईशवीयसप्तमशतकमिति मन्यते । इयं काशिकावृत्तिः व्याकरणशास्त्रे महन्महत्वं बिभर्ति । किञ्च प्राचीनानां विलुप्तवृत्तीनां ग्रन्थकाराणां मतानि अस्यां काशिकावृत्तौ यथासम्भवं समुपस्थापितानि ग्रन्थकृद्भ्याम्।

भर्तृहरिः –

संस्कृतवाङ्मये भर्तृहरेः नाम बहुविश्रुतमेव । एकाधिकभर्तृहरेः नाम संस्कृतवाङ्मये प्राप्तत्वाद् तेषां स्थानकालादिविषये महान् भेदो दृश्यते । तथापि भर्तृहरिनाम्ना महान्वैयाकरणेन पातञ्जलमहाभाष्यस्योपरि 'महाभाष्यदीपिका' इति टीका रचिता । महाभाष्यव्याख्यातृषु भर्तृहरिरेव प्रथमो वर्तते । भर्तृहरिसम्बन्धिनी बह्वी किम्वदन्ती श्रूयन्ते । तस्य गुरोः नाम वसुरातः इति प्राप्यते । भर्तृहरेः स्थानकालविषये मतानैक्यं दृश्यते । तस्य जन्मकालः ईशवीयषष्ठशतकं सप्तमशतकं वा अनुमीयते । भर्तृहरिनामसम्पृक्ताः कृतयः अधः प्रदीयन्ते -

(क) महाभाष्यदीपिका

(ख) वाक्यपदीयम्

(ग) स्वोपज्ञावृत्तिः (वाक्यपदीयस्योपरि)

(घ) शतकत्रयम् (श्रृङ्गार-नीति-वैराग्यशतकम्)

(ङ) जैमिनीयमीमांसावृत्तिः

(च) वेदान्तसूत्रवृत्तिः

(छ) शब्दधातुसमीक्षा

(ज) भट्टिकाव्यम्

(झ) भागवृत्तिः

कैयटः-

महाभाष्यस्य व्याख्यातृषु कैय्यटः अन्यतमो विचक्षणो व्याख्याकारः। प्रदीपपुष्पिकातो ज्ञायते यत् तस्य पिता जैय्यट इति। अनुमीयते यत् अयं वैयाकरणः कश्मिरदेशीयः इति। यद्यपि तस्य जन्मकालं निश्चेतुं न शक्यते तथापि ईशवीयेकादशशतकमिति अनुमीयते। कैयटेन हि पतञ्जलिमहाभाष्योपरि 'प्रदीप' इति टीका रचिता।

भट्टोजिदीक्षितः –

आचार्यः भट्टोजिदीक्षितः महाराष्ट्राभिजनो ब्राह्मणः। तस्य आविर्भावसमयः ईशवीयषोडशशतकस्य मध्यभागः सप्तदशशतकस्य पूर्वभागः इति अनुमीयते। तस्य पितुर्नामलक्ष्मीधरः। तेन हि भट्टोजिदीक्षितेन अप्ययदीक्षितसकाशात् वेदान्तशिक्षा लब्धा तथा च शेषकृष्णात् व्याकरणज्ञानं प्राप्तमिति। भट्टोजिदीक्षितेन बहवो ग्रन्थाः प्रणीताः। ते यथा -

(क) शब्दकौस्तुभः

(ख) तत्त्वकौस्तुभः

(ग) तन्त्रसिद्धान्तदीपिका

(घ) वैयाकरणसिद्धान्तकारिका

(ङ) वैयाकरणसिद्धान्तकौमुदी

(च) प्रौढमनोरमा

(छ) तैत्तिरीयसन्ध्याभाष्यम्

(ज) तिथिनिर्णयः

वैयाकरणसिद्धान्तकौमुदी –

आचार्येण भट्टोजिदीक्षितेन प्रणीतो वैयाकरणसिद्धान्तकौमुदीग्रन्थः पाणिनीयव्याकरणसम्प्रदायस्य अत्यन्तं प्रसिद्धः ग्रन्थः । आचार्यदीक्षितेन हि त्रिमुनिव्याकरणम् अवलम्ब्य इमं प्रक्रियाग्रन्थं निर्मितवान् । पाणिनीयसमस्तसूत्रसम्बलितोऽयं प्रक्रियाग्रन्थः पूर्वरचितेभ्यो रूपावताररूपमालाप्रक्रियाकौमुद्यादिभ्यो विस्तृतो विलसति । पाणिनीयव्याकरणस्य सर्वाणि सूत्राणि वार्तिकानि च प्रयोगदृष्ट्या प्रक्रियारूपेण सम्यग्रूपेण संस्थापितानि । ग्रन्थे अस्मिन् अष्टाध्यायीसूत्राणाम् क्रमागतानुसरणं नैव दृश्यते । आदौ लक्ष्यं पुरतः संस्थाप्य प्रक्रियागतसूत्राणि विवेचितानि । तथा च अत्र ग्रन्थकारेण ग्रन्थान्तरेषु प्रसृतानां प्रयोगानां विचाराः प्रयोगसाधनावसरे साधुकृताः दृश्यन्ते । येषां परिशीलनेन शब्दविषयकः भाषाविषयको वा सर्वविधसन्देहः निरस्यति । पूर्वार्धः उत्तरार्धः इति भेदेन वैयाकरणसिद्धान्तकौमुदी द्विधा विभज्यते । तत्र पूर्वार्धे संज्ञाप्रकरणप्रभृतीनि एकचत्वारिंशत् प्रकरणानि सन्ति , तथा उत्तरार्धे तिङन्तभ्वादिप्रभृतीनि अष्टाविंशतिः प्रकरणानि सन्ति। अस्य ग्रन्थस्य मङ्गलाचरणं यथा–

"मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।

वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥"

सिद्धान्तकौमुद्या बह्वः टीकाः समुपलभ्यन्ते । यथा भट्टोजिदीक्षितेन एव कृता प्रौढमनोरमा, ज्ञानेन्द्रसरस्वति कृता तत्वबोधिनी, नीलकण्ठकृता गूढार्थदीपिका, वासुदेवदीक्षितप्रणीता बालमनोरमा, नागेशभट्टकृतः लघुशब्देन्दुशेखरः, बृहच्छब्देन्दुशेखरश्च।

वरदराजः –

पाणिनीयव्याकरणसम्प्रदायस्य अपरो वैयाकरणो वर्तते आचार्यवरदराजः। अयं भट्टोजिदीक्षितस्य शिष्य आसीत्। वरदराजस्य पितुर्नाम दुर्गातनय आसीत्। दाक्षिणात्यस्य ब्राह्मणपरिवारे तस्य जन्म अभवत्। तेन हि वैयाकरणसिद्धान्तकौमुदीम् अनुसृत्य मध्यसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी, सारकौमुदी चेति त्रयो प्रकरणग्रन्थाः लिखिताः। एतेषु हि लघुसिद्धान्तकौमुदी अत्यन्तं प्रसिद्धिं गता।

लघुसिद्धान्तकौमुदी –

वरदराजेन मध्यसिद्धान्तकौमुदीनामकग्रन्थरचनादनन्तरं सुखपूर्वकं व्याकरणज्ञानप्रदानाय सुकुमारमतीनां बालानां कृते इयं लघुसिद्धान्तकौमुदी विरचिता । पाणिनीयव्याकरणरूपमहासमुद्रात् शब्दरत्नानां सहजबोधाय अनेन ग्रन्थेन महान् प्रयत्नो विहितः वरदराजाचार्येण। तदर्थमेव तेन ग्रन्थान्ते एवम् उक्तम्–

" शास्त्रान्तरे प्रविष्टानां बालानां चोपकारिका" इति।

अस्य ग्रन्थास्यापि विषयाः प्रकरणेषु विभक्तं वर्तते । यद्यपि वरदराजेन सिद्धान्तकौमुद्याः प्रक्रियामनुसृत्य एव लघुसिद्धान्तकौमुदी प्रणीता, तथापि स्वग्रन्थे स्वकीयप्रकाशनरीतिरपि परिस्फुटा दृश्यते । लघुसिद्धान्तकौमुद्यामाहत्य अष्टाध्यायाः १२७२ सूत्राणि व्याख्यातानि सन्ति । लघुसिद्धान्तकौमुद्याः मङ्गलाचरणं यथा-

"नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।

पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥ "

नागेशभट्टः –

पाणिनीयव्याकरणसम्प्रदायस्य नव्यवैयाकरणेषु नागेशभट्टः मूर्धन्यो वर्तते । नागेशभट्टो हि महाराष्ट्रियो ब्राह्मणः । तस्य पिता शिवभट्टो माता च सतीदेवी । तस्य गुरुरासीत् हरिदीक्षितः । नागेशभट्टेन बह्व्यः टीकाः , दर्शनग्रन्थाः च प्रणीताः वर्तन्ते । ते च ग्रन्थाः यथा -

(क) परिभाषेन्दुशेखरः

(ख) बृहच्छब्देन्दुशेखरः

(ग) लघुशब्देन्दुशेखरः

(घ) लघुमञ्जुषा

(ङ) परमलघुमञ्जुषा

(च) स्फोटवादः

(छ) वैयाकरणसिद्धान्तमञ्जुषा

(ज) महाभाष्यप्रत्याख्यानसंग्रहः

नागेशभट्टेन हि महाभाष्यस्य प्रदीपाख्यटीकायाः उपरि प्रदीपाख्यः टीका प्रणीता । तस्य हि अयं 'महाभाष्यप्रदीपोद्योतः' इति ग्रन्थः नितान्तं प्रोढः प्राञ्जलश्च वर्तते ।

२.८ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- पाणिनेः तथा तेन विरचितानां ग्रन्थानां परिचयं प्राप्तवन्तः ।

- कात्यायनस्य तथा तेन विरचितानां ग्रन्थानां परिचयं प्राप्तवन्तः ।
- पतञ्जलेः तथा तेन विरचितानां ग्रन्थानां परिचयं प्राप्तवन्तः ।
- पाणिनिसम्प्रदायस्य अपराणाम् आचार्याणां विषये ज्ञातवन्तः ।

२.९ ज्ञानाधिक्यम् -

१. संस्कृत व्याकरणशास्त्र का इतिहास, युधिष्ठिर मीमांसक, चौखम्बा पब्लिशर्स, वाराणसी, 2014

२. अष्टाध्यायी, नरेश झा (व्याखा), चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2021

३. लघुसिद्धान्तकौमुदी, गोविन्द प्रसाद शर्मा (व्याखा) चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2021

४. व्याकरणशास्त्रेतिहासः, लोकमणि दाहालः, भारतीय विद्या प्रकाशन, वाराणसी, 2018

२.१० अग्रगत्याः निरूपणम्

उत्तरम् १ - पाणिनिः कात्यायनः पतञ्जलिश्च एते त्रय आचार्याः ।

उत्तरम् २ - सूत्राणां वैशिष्यं लेखनीयम् ।

उत्तरम् ३ - वार्तिकस्य लक्षणं व्याख्यातव्यम् ।

उत्तरम् ४ - भाष्यस्य लक्षणं लेखनीयम् ।

उत्तरम् ५ - दाक्षिपुत्रः, शालातुरः, पणिपुत्रः इत्यादि ।

उत्तरम् ६ - महेश्वरात् ।

उत्तरम् ७ - ३२ (द्वात्रिंशत्) ।

उत्तरम् ८ - वररुचिः ।

उत्तरम् ९ - वर्षः ।

उत्तरम् १० - पञ्चसहस्रम् ।

उत्तरम् ११ - यणः प्रतिषेधो वाच्यः ।

उत्तरम् १२ - पुष्यमित्रस्य ।

उत्तरम् १३ - पतञ्जलेः।

उत्तरम् १४ - गोणिकादेवी।

उत्तरम् १५ - ८५(85)।

⑦ २.११ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

(१) अष्टाध्यायीग्रन्थस्य रचयिता कः ?

(२) पाणिन्यष्टाध्याय्याः प्रथमं सूत्रं किम् ?

(३) वार्तिकं केन प्रणीतम् ?

(४) महाभाष्यस्य प्रणेता कः?

(५) काशिकावृत्तिः के निर्मिता ?

(६) उद्योतटीका केन प्रणीता ?

(७) प्रोढमनोरमा कस्य ग्रन्थस्य टीका ?

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया -

१. सूत्रम्

२. वार्तिकम्

३. महाभाष्यम्

४. कैयटः

५. भट्टोजिदीक्षितः

६. नागेशः

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

(१) पाणिनेः परिचयपुरःसरं पाणिनीयव्याकरणस्योपरि लेखः प्रस्तूयताम्।

(२) संस्कृतव्याकरणपरम्परायां पतञ्जलेः अवदानविषये एकः प्रबन्धः प्रस्तूयताम्।

(३) त्रिमुनिव्याकरणम् अधिकृत्य एकः लेखः प्रस्तूयताम्।

*****

अध्यायः ३ : महाभाष्यम् – पस्पशाह्निकम् (सामान्याध्ययनम्)

अध्यायस्य संरचना

३.१ उद्देश्यम्

३.२ परिचयः

३.३. महाभाष्यस्य सामान्यपरिचयः

३.३. क. रचकः पतञ्जलिः

३.३. ख. विषयवस्तु

३.४. पस्पशाह्निकस्य परिचयः

३.५. पस्पशाह्निकगतस्य शब्दस्य अवधारणम्

३.५.क. पूर्वपक्षखण्डनम्

३.५.ख. शब्दलक्षणम्

३.६ पस्पशाह्निकप्रतिपादितं व्याकरणावधारणम्

३.६ . क. व्याकरणपाठस्य प्रयोजनानि

३.६ .ख. व्याकरणस्य लक्षणम्

३.७. व्याख्यायताम् –

३.७.क. दुष्टः शब्दः

३.७.ख. चत्वारि शृङ्गा त्रयो अस्य पादाः

३.८. किं पुनः शब्दस्य ज्ञाने धर्म आहोस्वित् प्रयोगेः व्याख्या

३.९ अध्यायात् किमवगतम्

३.१० ज्ञानाधिक्यम्

३.११. अग्रगत्याः निरूपणम्

३.१२. अभ्यासप्रश्नाः

३.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवन्तः -

- पतञ्जलिकृतस्य महाभाष्यस्य विषयवस्तुना सह परिचिताः भविष्यन्ति ।
- पतञ्जलिविहितस्य शब्दस्य लक्षणं ज्ञास्यन्ति ।
- शब्दार्थयोः सम्बन्धं पूर्णतया ज्ञास्यन्ति ।
- व्याकरणाध्ययनस्य प्रयोजनैः सह परिचिताः भविष्यन्ति ।
- पतञ्जलिकृतं व्याकरणलक्षणम् अवगन्तुं समर्थाः भविष्यन्ति ।

३.२ परिचयः

एतावत् पर्यन्तं विभिन्नेषु स्तरेषु भवन्तः संस्कृतव्याकरणस्य बिभिन्नान् बिन्दून् अधीतवन्तः । पाणिनीय-सम्प्रदायद्वयेन मुख्यतया विभक्तं वर्तते संस्कृतव्याकरणम् । पाणिनिप्रणीतम् अष्टाध्यायीग्रन्थम् -अपाणिनीय व्याकरणनिष्ठं भागद्वयं प्रवर्तते । पाणिनिविरचिते ग्रन्थे प्रायशः आधारीकृत्य एव एतत् चतुःसहस्रसंख्यकानि सूत्राणि वर्तन्ते । अतः संस्कृतव्याकरणजगति पाणिनिः सूत्रकारः इति कथ्यते । परन्तु कात्यायनविरचितैः वार्त्तिकैः पतञ्जलिप्रणीतेन भाष्येण च पाणिनिसूत्राणां सम्यक् बोधो जायते । अनेन त्रिमुणि व्याकरणम् इति अवधारणं जगति प्रख्यातं जातम् । तत्र सूत्रकाररूपेण विराजते पाणिनेः नाम, वार्त्तिककाररूपेण वर्तते कात्यायनस्य वररुचेः) वा नाम । तथा च भाष्यकाररूपेण प्रख्यातो जातः पतञ्जलिः । एवं पतञ्जलिकृतं महाभाष्यं (सूत्रग्रन्थरूपेण निर्दिष्टम् अभवत् ।संस्कृतव्याकरणक्षेत्रे विशिष्ट अतोऽस्य ग्रन्थस्य अध्ययनं शिक्षार्थिकृते अत्यावश्यकीयं जातम् । विशेषतः स्नातकोत्तरस्तरे महाभाष्यं व्यतिरिच्य व्याकरणविषयज्ञानं सम्पूर्णं कथमपि न भवितुमर्हति । परन्तु महाभाष्यं बहुविषयसन्नद्धं विशालं पुस्तकम् एकम् अस्ति । समग्रस्य अस्य ग्रन्थस्य पठने पाठने च समयाधिक्यम् अपेक्ष्यते । अत एव स्नातकोत्तरस्तरपाठ्यक्रमे शिक्षार्थिजनानां सौकर्यार्थं केवलं प्रथमम् आह्निकमाधारीकृत्य आलोचनं स्थिरीकृतम् । महाभाष्यस्य प्रथमम् आह्निकं पस्पशाह्निकम् इति नामाङ्कितमस्ति । इदमाह्निकं प्रकृततः समग्रस्य महाभाष्यस्य प्रस्तावनारूपेण वर्तते । शब्दस्य स्वरूपं, शब्दार्थयोः सम्बन्धः, व्याकरणपाठस्य प्रयोजनीयता, व्याकरणस्य लक्षणम् इत्यादिविषयजातं विस्तृतरूपेण समुपन्यस्तमस्ति अस्मिन् आह्निके । परवर्तिकालीनस्य व्याकरणविषयाध्ययनस्य कृते एतेषां प्रारम्भिकविषयाणाम् अध्ययनम् अतीव गुरुत्ववाहकं वर्तते । एतत् विचिन्त्य प्रस्तुते अध्याये चिताः विषया आलोच्यन्ते । एतेषाम् अध्ययनं भवतां कृते फलप्रदं भविष्यति इति आशा वर्तते ।

३.३. महाभाष्यस्य सामान्यपरिचयः

एतत् पूर्वमेव उक्तं यत् महाभाष्यं पाणिनिसम्प्रदायनिष्ठं संस्कृतव्याकरणविषयकम् अतीव गम्भीरं पुस्तकमेकम् अस्ति । शीर्षकस्य अर्थविश्लेषणेन एतत् ज्ञायते यत् महाभाष्यम् इत्यत्र स्थितं 'महत्' इति पदं ग्रन्थस्य अस्य गम्भीरतां निश्चितरूपेण प्रमाणयति । भाष्यग्रन्थत्वात् भाष्यलक्षितं प्रारुप्यं सर्वथा वर्तते अस्य ग्रन्थस्य । अस्य ग्रन्थस्य सामान्यपरिचयप्रदानकाले मुख्यतया बिन्दुद्वयम् आगच्छति, एकः लेखकपरिचितिरूपः, अपरस्तु विषयवस्तुरूपः । एतत् बिन्दुद्वयं गृहीत्वा अत्र आलोचनं प्रवर्तते ।

३.३. क. रचकः पतञ्जलिः

महाभाष्यस्य रचयिता अस्ति पतञ्जलि इति विषये नास्ति कोऽपि संदेहः । त्रिमुनि व्याकरणम् इति प्रयोगः संस्कृतव्याकरणविषये सर्वथा प्रयुक्तो भवति । अत्र त्रिमुनि इति पदेन सूत्रकारः पाणिनिः, वार्तिककारः कात्यायनः तथा च भाष्यकारः पतञ्जलिः सूच्यते । प्रकृततः त्रयाणाम् एतेषां वैयाकरणानां वाक्यसमुदायात् पाणिनीयव्याकरणस्य संपूर्णता जायते । अतएव पतञ्जलिः पाणिनीय-व्याकरण-संप्रदायस्य अन्यतमः पुरोधा अस्ति । पतञ्जलेः समयः ख्रिष्टपूर्व – द्वितीयशताब्दी इति स्थिरीक्रियते यतः शुङ्गवंशीयानां राजत्वकाले तस्य

स्थितिरासीत् इति विद्वज्जनानां मतमस्ति । तथा च पतञ्जलिः पाटलिपुत्रनृपेण पुष्यमित्रेण समायोजिते अश्वमेधयज्ञे समुपस्थितः आसीत् । अनेन अनयोः सुसम्पर्कः प्रमाणितः भवति । पक्षान्तरे प्रश्नः आगच्छति योगसूत्रकर्त्ता पतञ्जलिः तथा च महाभाष्यकारः पतञ्जलिः इति एक एव जनः अथवा तत्सिद्धम् एकनामयुक्तं भिन्नजनद्वयम् । विषये अस्मिन् बहुकथनं प्राप्यते विभिन्नसूत्रात् । एतन्निष्ठवचनजातं समालोच्य कैश्चित् पण्डितैः एतत्स्थिरीक्रियते यत् पतन्जलेः कालः ख्रीष्टपूर्वपञ्चमशतिकातः आरभ्य ख्रीष्टपूर्वद्वितीयशतिकापर्यन्तं प्रवहमाने समये अन्तर्भुक्तः भवति । तथा च पतञ्जलिः स्वकीयग्रन्थे गौनर्दीयपदेन एकाधिकस्थाने स्वात्मानं सूचितवान् । गौनर्दीयपदेन गोनर्ददेशजातः इत्यर्थः सूच्यते । परन्तु गोनर्द इति स्थानस्य अवस्थानविषये न हि विद्वांसः ऐक्यमत्यं प्रकाशयन्ति । केषाञ्चित् मतेन अयोध्यासमीपे आसीत् अयं प्रदेशः । केचन पण्डिताः वदन्ति यत् काश्मीरप्रान्ते आसीत् इदं स्थानम् । अन्ये कथयन्ति यत् उज्जयिनीसमीपे आसीत् गोनर्ददेशः । यद्वा तद्वा भवतु पतञ्जलिः पूर्वभारतीयः आसीत् इति एव बहुजनस्वीकृताभिमतम् इति वक्तुं शक्यते ।

३.३. ख. विषयवस्तु

पतञ्जलेः महाभाष्यं पाणिनीयव्याकरणस्य मुख्यम् एकं शास्त्रं वर्तते । भाष्यपदेन विशेषव्याख्यानं सूच्यते । भाष्यलक्षणम् एवं प्रदत्तम् अस्ति –

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

अर्थात् यस्मिन् ग्रन्थे सूत्रस्थितपदानि अनुसृत्य प्रस्तुतस्य सूत्रस्य अर्थः व्याख्यायते तथा च व्याख्यानसन्दर्भे क्वचित् क्वचित् रचकप्रतिपादितानां पदानां अपि वर्णनं प्रकटितं भवति स एव ग्रन्थः भाष्यग्रन्थः इति भाष्यविद्भिः कथ्यते । अस्मात् लक्षणवाक्यात् एतत् ज्ञायते यत् भाष्यग्रन्थे न केवलं सूत्राणां व्याख्या भवति परन्तु तत्र भाष्यकारस्य स्वकीयपदानि अपि संयुक्तानि भवन्ति । पतञ्जलिकृते महाभाष्यग्रन्थे पाणिनीयकृतानि सूत्राणि व्याख्यायन्ते । पाणिनीयसूत्रस्थितानि पदानि अत्र अर्थपरतया एकैकम् आलोच्यन्ते । अस्मिन् आलोचने स्थाने स्थाने भाष्यकारस्य स्वमतानि अपि संयुक्तानि सन्ति । अर्थात् पाणिनीयसूत्रालोचनप्रसङ्गे पतञ्जलिः क्वचित् क्वचित् स्वीयपदानि अपि योजयति । एतत् सर्वैः ज्ञायते यत् सूत्रं सर्वदा अल्पाक्षरं भवति । तल्लक्षणप्रसङ्गे अतिश्रुतं वाक्यमस्ति -

अल्पाक्षरमसंदिग्धं सारवत् विश्वतो मुखम् ।
अस्तेयमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ इति ।

अत एव अल्पाक्षरयुक्तानां सूत्राणां व्याख्यानार्थं सूत्रानुगुणं पदसंयोजनम् आवश्यकीयं भवति । अन्यथा सूत्रार्थबोधे सारल्यं न जायते । संपूर्णे महाभाष्ये पतञ्जलिना स्वपदसंयोजनं बहुधा कृतमस्ति सूत्रव्याख्यानकाले। अनेन अस्मिन् महाभाष्ये भाष्यलक्षणम् आत्यन्तिकरूपेण यथार्थं भवति । तथा च अयं ग्रन्थः अपरापरभाष्येसु मूर्धन्यत्वं भजते विषयबाहुल्येन वर्णनगाम्भीर्येण च । अत एव अस्य ग्रन्थस्य महाभाष्यम् इति नाम सार्थकतां सूचयति । अस्मिन् ग्रन्थे अध्यायाः आह्निकम् इति पदेन सूच्यन्ते । अह्न इति पदस्य अर्थः दिवस इति ।

आह्निकपदेन एकस्मिन् दिवसे समापनीयः पाठः सूचितो भवति । अत एव एतत् चिन्तनं समीचीनं यत् प्राचीनकाले महाभाष्यस्य प्रत्यध्यायम् एकदिवसीयं पाठ्यम आसीत् । संपूर्णे महाभाष्ये पञ्चाशीति (85) आह्निकानि सन्ति । एषु आह्निकेषु द्वादशशताधिकानि पाणिनीयसूत्राणि व्याख्यायन्ते । एतदपि अवधेयं यत् महाभाष्यं न केवलं पाणिनिसूत्राणां व्याख्यानमस्ति अपि तु अस्मिन् ग्रन्थे समग्रस्य व्याकरणदर्शनस्य एका विस्तृता व्याख्या प्राप्यते । अस्मिन् ग्रन्थे पाणिनिसूत्राणां तथा च तत्तत् सूत्रप्रसङ्गे कात्यायनप्रणीतानां वार्त्तिकानां व्याख्या अपि सरलभाषया उपन्यस्ता अस्ति । तथा च कात्यायनेन अकथितानां केषाञ्चित् विषयाणामपि व्याख्यानमत्र सुलभमस्ति । एतदपि ग्रन्थस्य अस्य महत्वं यत् स्थाने स्थाने आचार्यः पतञ्जलिः कात्यायनप्रदत्तं मतम् अनुसरति, परन्तु बहुषु स्थानेषु एष व्यैयाकरणः कात्यायनविमर्षं परिखण्डयति । तदुपरि अस्मिन् ग्रन्थे वर्तमाना उपस्थापनशैली अपि आकर्षका बोधगम्या च अस्ति । अत्र कथोपकथनशैली अनुसृता वर्तते । अस्य ग्रन्थस्य बहुसंख्यकाः टीकाग्रन्थाः सन्ति । कैयटप्रणीता प्रदीपनामका महाभाष्यटीका संपूर्णे संस्कृतव्याकरणजगति वर्तते एका गुरुत्वपूर्णा कृतिः । । भर्तृहरिणा कृता महाभाष्यस्य टीका अधुना न पूर्णरूपेण प्राप्यते । परन्तु स्थाने स्थाने विषयनिष्ठं भर्तृहरिवाक्यं प्राप्यते येन निश्चितरूपेण प्रमाणितं भवति यत् भर्तृहरिः संपूर्णतया पतञ्जलेः गुणमुग्ध आसीत् । भर्तृहरिणा उच्चारितम् एकं वचनम् एवं गच्छति

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ... इत्यादि ।

तदुपरि महाभाष्ये पतञ्जलिना कात्यायनवचनात् पाणिनिवचनम् अधिकम् आद्रियते । एतदत्र अवधारणीयं यत् एष महाभाष्यग्रन्थो न केवलं व्याकरणस्य विषये कथयति अपि तु पतञ्जलिसमकालीनस्य समाजस्य एकं परिस्फुटं चित्रमपि स्थापयति पाठकानां समक्षम् । अत एव प्राचीनभारतीयसमाजस्य विषये अवलोकनार्थं, संस्कृतव्याकरणस्य बोधार्थं तथा च संस्कृतस्य भाषिकविश्लेशनार्थम् एष ग्रन्थोऽवश्यपाठ्यो भवति । वर्तमानकालीनस्य लिङ्गुइस्तिक्स् इति विषयस्य भारतीयज्ञानपरम्पराधारितो मूलग्रन्थो भवति महाभाष्यम् इति । एतत् सर्वं विविच्य अस्मिन् पाठ्यक्रमे आंशिकरूपेण अस्य ग्रन्थस्य अन्तर्भूक्तिः जाता ।

अग्रगत्याः निरीक्षणम्

१. पतञ्जलेः समयः कः ?

……

२. सूत्रकारः कः ?

……

३. कात्यायनः कः ?

……

४. महाभाष्यस्य अध्यायः केन शब्देन सूच्यते ?

.....

५. महाभाष्ये कति अध्यायाः सन्ति ?

.....

६. आह्निकम् इति पदस्य कोऽर्थः ?

.....

७. कैयटविरचितायाः महाभाष्यटीकायाः नाम किम् ?

.....

८. महाभाष्यस्य रचनशैली कीदृशी अस्ति ?

.....

९. किं भवति अल्पाक्षरम् ।

.....

१०. सूत्रविदः इति शब्दस्य कोऽर्थः ?

.....

३.४. पस्पशाह्निकस्य परिचयः

महाभाष्यग्रन्थस्य प्रथमम् आह्निकं पस्पशा इति उच्यते । अनेन प्रारम्भः सूच्यते । उपोद्घातः इति अस्य अर्थः । अत्र स्मरणीयम् -

शास्त्रस्यारम्भको ग्रन्थ उपोद्घात इतीरितः ।
स एव ग्रन्थसन्दर्भः पस्पशा कथ्यते बुधैः ॥

मल्लिनाथः शिशुपालबधकाव्यस्य टीकायां वदति यत् 'पस्पशा शास्त्रारम्भसमर्थक उपोद्घातग्रन्थः' इति । अत एव पस्पशाह्निकं महाभाष्यस्य प्रस्तावनां सूचयति । अनुबन्धचतुष्टयसूचनं, प्रयोजनकथनं, विषयनिरूपणम् इत्यादिकं सर्वम् आलोचितमस्ति पस्पशाह्निके पतञ्जलिना । अधुना पस्पशा इति पदम् आलोच्यते । वाधन – स्पर्शनार्थकोऽतिस्पश् इति धातुः । तेन सह पुनः पुनः इत्यर्थे यङ् प्रत्ययः संयुक्तोऽस्ति । तथा च अन्तिमे टाप् इति प्रत्ययो युज्यते । अनेन पस्पशा इति शब्दः स्त्रीप्रत्ययान्तो जातः । केषाञ्चित्मतेन प्राचीनकाले भाषायां दर्शनबोधकः स्पश् इति एको धातुरासीत् यस्मात् जातः पस्पशा इति शब्दः । यद्वा तद्वा भवतु पस्पशाह्निकं महाभाष्यग्रन्थस्य भूमिकां प्रस्तौति इति विषये नास्ति कोऽपि सन्देहः । अस्मिन् आह्निके शब्दलक्षणम्, व्याकरणाध्ययनस्य प्रयोजनानि, शब्दस्य नित्यत्वानित्यत्वविचारः, व्याकरणलक्षणम् इत्यादिविषयजातं पूर्वपक्षमतादिखण्डनेन विशदं समुपस्थितमस्ति पतञ्जलिचरणैः । अस्य आह्निकस्य पाठात्

महाभाष्यग्रन्थगतविषयस्य सन्दर्भे एकं स्पष्टम् अवधारणं जायते। अथ शब्दानुशासनम् इति वाक्येन पस्पशाह्निकं प्रारभ्यते। अत्र अथ इति मङ्गलवाचकं पदमस्ति। उक्तमस्ति -

कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

अभिधानग्रन्थे प्राप्यते मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथोऽथ इति। अत एव अथशब्दो मङ्गलबोधको भवति। तथा च अस्मिन् भाष्यग्रन्थे अथ इति शब्दोऽधिकारार्थे प्रयुक्तोऽस्ति । उक्तमस्ति भाष्यकृता अथेत्ययं शब्दोऽधिकारार्थः इति। अर्थात् अथ इति पदेन अस्मिन् ग्रन्थे अधिकारः सूच्यते। अधिकारः प्रस्तावः आरम्भः इति यावत् इति शब्दकौस्तभे। एवं वक्तुं शक्यते यत् अथ इति पदं महाभाष्ये माङ्गलिकाधिकारं सूचयति। एवञ्च अथ शब्दानुशासनम् इति शास्त्रारम्भप्रतिज्ञाभाष्यं भवति। महाभाष्ये लौकिकानां वैदिकानां च शब्दानाम् अनुशासनं भवति।

एवं क्रमेण महाभाष्ये विषयानुगुणं गौरिति शब्दस्य अर्थः, शब्दस्य लक्षणम्, शब्दानुशासनस्य व्याकरणस्य वा प्रयोजनानि, साधुशब्दाः , असाधुशब्दाः, शब्दस्य नित्यत्वानित्यत्वविचारः , व्याकरणस्य लक्षणं तद्व्याख्यानं च इत्यादिकं वैशद्येन आलोचितमस्ति। एतदाह्निकनिष्ठं विषयजातम् अधीत्य व्याकरणमहत्वविषये विज्ञातुः विशेषावधानं जायते। एवं महाभाष्यग्रन्थस्य सन्दर्भे प्रारम्भिकं ज्ञानञ्च उपजायते। तदुपरि महाभाष्यस्य लेखनशैलीविषयेऽपि धारणा भवति।

ज्ञातव्यम्

कैयटविषये , शब्दानुशासनविषये, कात्यायनविषये, अनुबन्धविषये।

३.५. पस्पशाह्निकगतस्य शब्दस्य अवधारणम्

पस्पशाह्निके आलोचितेषु विषयेषु अन्यतमोऽस्ति शब्दनामको विषयः। वैदिकवाङ्मये वाक् इति प्रसङ्गे बहुप्रकारकाः संदर्भा वर्तन्ते। परन्तु शब्द इति विषयं गृहीत्वा पतञ्जलिः तदीये पस्पशाह्निके व्यवस्थापितरूपेण विशदम् आलोचितवान्। परवर्तिकाले भर्तृहरिः तदीये वाक्यपदीये शब्दब्रह्मतत्त्वम् आधारीकृत्य सम्पूर्णे ब्रह्मकाण्डे बिन्दुजातं समुपस्थितवान्। परन्तु पतञ्जलिप्रदत्तं व्याख्यानं शब्दस्वरूपविषये एकं सुस्थिरं चित्रं स्थापयति। एतत् अवधारणीयं यत् अस्मिन् प्रसङ्गे पतञ्जलिना पूर्वपक्षप्रदत्तानि अभिमतानि प्रथमतया सर्वथा परिण्डय तदनन्तरं तत्रभवता स्वमतम् उपस्थाप्यते। शब्दविषये पतञ्जलिवचनं माहात्म्यं भजते विद्वत्समाजे । अत एव एष प्रसङ्गोऽत्र विशदं समुपस्थाप्यते। मन्ये एतत् आलोचनं विद्यार्थिजनानाम् उपकाराय भविष्यति ।

३.५.क. पूर्वपक्षखण्डनम्

शब्दस्य लक्षणं स्वरूपं वा किं भवति इति विषये अलोचयितुं गौरित्यत्र कः शब्दः इति प्रसङ्गम् आनीय पतञ्जलिः प्रश्नम् उत्थापयति – ‘ किं यत् तत् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः। न

इत्याह । द्रव्यं नाम तत् । यत् तर्हि तदिङ्गितं चेष्टितं निमिषितम् इति स शब्दः । न इत्याह । क्रिया नाम सा । यत् तर्हि तत् शुक्लो नीलः कपिलः कपोत इति स शब्दः । न इत्याह । गुणो नाम सः । यत् तर्हि तद्भिन्नेषु अभिन्नं छिन्नेषु अच्छिन्नं सामान्यभूतं स शब्दः । न इत्याह । आकृतिर्नाम सा । कस्तर्हि शब्दः । अनेन प्रकारेण आचार्यः पतञ्जलिः द्रव्य-गुण-क्रिया- आकृतिप्रभृतिभिः शब्दस्वरूपं विशेषयति । तेन एतत् स्पष्टम् उक्तं यत् शब्दो द्रव्यात् भिन्नः , क्रियातः भिन्नः, गुणात् भिन्नः तथा च आकृतितः भिन्नः । यद्यपि सामान्यतो द्रव्यादिना सह शब्दस्य एकत्वं स्थापयितुं प्रचेष्टा चलति परन्तु प्रकृततः शब्दः तु एतेभ्यो द्रव्यादिभ्यो भिन्नः कश्चन पदार्थो भवति इति आचार्यस्य पतञ्जलेः मतम् ।

३.५.ख. शब्दलक्षणम्

पतञ्जलिमहाभागेन शब्दस्य स्वरूपविषये एवम् उक्तम् अस्ति 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः । अथवा 'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते' । अनेन अयमर्थः प्रतिपाद्यते यत् यो ध्वनिः कमपि विशेषम् अर्थं प्रतिपादयति स एव शब्दो भवति । यथा गौरिति ध्वनिना सास्नादियुक्तस्य जीवस्य अर्थः प्रतिपादितो भवति अत एव गौरिति एकः शब्दोऽस्ति । अस्मिन् सन्दर्भे आचार्येण कैयटेन स्फोटस्य प्रसङ्ग आनीतः तद्व्याख्याने । नित्यशब्दः स्फोटो भवति य उत्पत्तिविहीनो विनाशविहीनश्च । एष एव शब्दो भर्तृहरिपादैः अनादिनिधनः इति उक्तोऽस्ति तदीये वाक्यपदीयग्रन्थे । पतञ्जलिः पुनः तदीये पस्पशायायां शब्दस्य उदाहरणत्वेन वदति, तद् यथा – 'शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्य्ययं माणवक इति ध्वनिं कुर्वन्नेवमुच्यते । तस्माद् ध्वनिः शब्दः ।'

अग्रगत्याः निरीक्षणम्

११.शब्द इति विषये व्यवस्थापितरूपेण को विशदम् आलोचितवान् ?

.....

१२.गौरित्यत्र द्रव्यं किम् ?

.....

१३.गौरित्यत्र क्रिया किम् ?

.....

१४.नित्यशब्दः किं भवति ?

.....

१५.शब्दकार्य्ययं ..... (रिक्तस्थानं पूरयतु)

.....

३.६ पस्पशाह्निकप्रतिपादितं व्याकरणावधारणम्

अथ शब्दानुशासनम् इति वाक्येन पतञ्जलिकृतस्य महाभाष्यग्रन्थस्य तथा च पस्पशाह्निकस्य प्रारम्भो जायते । अत्र शब्दानुशासनम् इति पदेन व्याकरणं सूच्यते । अर्थात् व्याकरणेन वैदिकानां लौकिकानां च शब्दानाम् अनुशासनं भवति । अनेन ज्ञायते यत् शब्दज्ञाने व्याकरणं महतीं भूमिकां निर्वहति । एतद् विचिन्त्य आचार्येण पतञ्जलिना पस्पशाह्निके व्याकरणस्य प्रयोजनविषये बहु आलोचितमस्ति । तद्विषये अधुना आलोच्यतेऽत्र ।

३.६ . क. व्याकरणपाठस्य प्रयोजनानि

अस्मिन् प्रसङ्गे आचार्येण पतञ्जलिना विषयोऽयम् एवम् उपस्थाप्यते – 'कानि पुनः शब्दानुशासनस्य प्रयोजनानि । रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ।' रक्षा, ऊहः,आगमः,लघु, असन्देहः – इति पञ्चकं व्याकरणस्य मुख्यं प्रयोजनं भवति । रक्षार्थम् , ऊहकरणार्थम्, आगमार्थं, लघुकरणार्थम् , असन्देहार्थं च व्याकरणस्य प्रयोजनानि भवन्ति । अधुना एकैकं प्रयोजनं विशदम् आलोच्यते पतञ्जलिदिशा ।

a. रक्षा :

पतञ्जलिना उक्तं – 'रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयति ।' वैदिकसंस्कृते केचन विशेषनियमाः प्रवर्तन्ते येषां विषये ज्ञानं वेदार्थबोधे प्रयोजनीयम् । वेदेषु दृश्यते यत् वर्णलोपविषये, वर्णागमसन्दर्भे, वर्णविकारप्रसङ्गे केचन नियमाः प्रयुज्यन्ते ये लौकिकप्रयोगे न दृश्यन्ते । व्याकरणज्ञानविहीनेन जनेन अस्य अवबोधनं न सम्भवति । 'स्वाध्यायोऽध्येतव्यः' इति वैदिकवचनात् ज्ञायते यत् वेदानाम् अध्ययनं कर्त्तव्यम् । तत्करणे वेदार्थावगमनमपि उचितं भवति । उच्यते च वेदे 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।' अत एव यो जनो व्याकरणं जानाति तस्य ज्ञानं वर्तते केन प्रकारेण वेदविषये वर्णलोपो भवति, वर्णागमो भवति, वर्णविकारो वा भवति । व्याकरणज्ञानविहीनोऽसमर्थो भवति शुद्धरूपेण एतद् अवगन्तुम् । अनवधानवशात् तद्विषये तादृशस्य जनस्य प्रमादं भवितुम् अर्हति । तथात्वे तु वेदार्थस्य शुद्धतया परिरक्षणं न सम्भविष्यति । अत एव वेदार्थस्य परिरक्षणार्थं व्याकरणम् अध्येयम् ।

b. ऊहः :

पतञ्जलिना उक्तं- 'ऊहः खल्वपि । न सर्वैर्लिङ्गैर्न च सर्वाभिः विभक्तिभिः वेदे मन्त्राः निवेदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान् न अवैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्माद् अध्येयं व्याकरणम् ।' वेदेषु प्रकृतियागो विकृतियागश्च इति यागस्य द्वैविध्यं कथितमस्ति । विशेषतो ब्राह्मणग्रन्थेषु यागानुष्ठानसन्दर्भे विशदम् आलोचनं प्राप्यते । प्रकृतिवद् विकृतिः कर्त्तव्या इति नियमेन प्रकृतियागानुरूपं परिवर्त्तनं करणीयं भवति विकृतियागनिष्ठेषु मन्त्रेषु । तत्र क्वचित् लिङ्गस्य परिवर्तनं क्वचित् च विभक्तेः परिवर्तनम् अपेक्ष्यते । व्याकरणविषये अनभिज्ञो जनो न समर्थो भवति अपेक्षितं परिवर्तनं कर्तुम् । अनभिज्ञजनकृते परिवर्तने प्रमादो भवति । तथात्वे तु यागानुष्ठानस्य अभीष्टं फलं न जायते । अत एव यागनिष्ठ-अभीष्टफललाभार्थं मन्त्रगतपदपरिवर्तनार्थं व्याकरणज्ञानम् आवश्यकीयम् । तस्माद् व्याकरणम् अध्येयम् ।

c. आगमः :

पतञ्जलिना उक्तं- 'आगमः खल्वपि- "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति । प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।' वेदे नियमोऽस्ति यत् ब्राह्मणः षडङ्गसहितान् वेदान् पठेत्। वेदाङ्गेषु मुख्यरूपेण वर्तते व्याकरणम्। उक्तं च ' मुखं व्याकरणं स्मृतम् '। प्रधानमङ्गमधीत्य वेदपाठे समर्थो भवति ब्राह्मणः। तस्माद् व्याकरणम् अध्येयम्। उक्तं च -

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्॥

d. लघुकरणम् :

पतञ्जलिना उक्तं –'लघ्वर्थं चाध्येयं व्याकरणम् " ब्राह्मणेनावश्यं शब्दा ज्ञेयाः" इति । न चान्तरेण व्याकरणं लघुना उपायेन शब्दाः शक्या ज्ञातुम्।' यतः शब्दानाम् आनन्त्यं वर्तते अत एव तत्र प्रतिपदपाठेन ज्ञानार्जनं न सम्भवति। पक्षान्तरे व्याकरणज्ञानेन एकस्य शब्दस्य अवगतिः शब्दान्तरज्ञानजननी भवति। एष हि वेदार्थज्ञाने लघूपायो भवति। तस्माद् व्याकरणम् अध्येयम्।

e. असन्देहः :

पतञ्जलिना उक्तं- 'असन्देहार्थं चाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति- स्थूलपृषतीम् आग्निवारुणीम् अनड्वाहीम् आलभेत इति। तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ती यस्याः सा स्थूलपृषतीति । तां न अवैयाकरणः स्वरतोऽध्यवस्यति – यदि पुर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः अथ समासान्तोदात्तत्वं ततः तत्पुरुष इति।' अर्थात् वैदिकवाङ्मये बहुषु स्थानेषु स्वरप्रकृतिनिष्ठसमासनिष्पत्तिः भवति। बहुत्र विषयेऽस्मिन् सन्देहस्य अवकाशो भवति । व्याकरणविद् हि केवलं शक्नोति स्वरानुगुणम् अर्थम् विश्लेषयितुम्। अर्थग्रहणे संदेहः मा भूत् तस्माद् व्याकरणम् अध्येयम्।

एतानि व्याकरणस्य प्रधानानि प्रयोजनानि वर्तन्ते। एतद् व्यतिरिच्य अपराणि अपि व्याकरणाध्ययनस्य प्रयोजनानि दृश्यन्ते।

ज्ञातव्यम्

व्याकरणाध्ययनस्य अपराणि प्रयोजनानि

१.तेऽसुराः, २.दुष्टः शब्दः, ३.यदधीतम्, ४.यस्तु प्रयुङ्क्ते, ५.अविद्वान्सः, ६.विभक्तिं कुर्वन्ति, ७.यो वा इमाम्, ८.चत्वारि, ९.उत त्वः, १०.सक्तुमिव, ११.सारस्वतीम्, १२ .दशम्यां पुत्रस्य, १३.सुदेवो असि वरुण।

३.६ .ख. व्याकरणस्य लक्षणम्

आचार्येण पतञ्जलिना पस्पशाह्निके व्याकरणस्य लक्षणम् एवं निर्धारितमस्ति – लक्ष्यलक्षणे व्याकरणम् इति। केषाञ्चित्मतेन व्याकरणशब्दस्य अर्थो भवति सूत्रम्। तत्करणे तु व्याकरणस्य सूत्रम् इति

प्रयोगकाले सूत्रस्य सूत्रम् इत्यर्थः पर्यवस्यते यत्तु कथमपि न समीचीनं भवति। अस्मिन् प्रसङ्गे व्याकरणस्य सूत्रम् इति प्रयोगे षष्ठीविभक्तिः निष्फला जायते। तत् न करणीयम्। अत एव व्याकरणशब्दस्य अर्थः सूत्रम् इति न भवति। तथा तु न हि सूत्रतो हि शब्दाः प्रतिपद्यन्ते। शब्दानाम् अर्थप्रतिपादनार्थं व्याख्यानस्य प्रयोजनीयता अस्ति। केवलं सूत्रस्थितचर्चापदानां कथनेन व्याख्यानं न भवति। तत् यथा 'वृद्धिरादैच्' इति सूत्रगतानां 'वृद्धिः', 'आत्', 'ऐच्' इति त्रयाणां पदानां आख्यानेन व्याख्यानं न भवति। परन्तु तत्र उदाहरणं प्रत्युदाहरणं वाक्याध्याहारः इत्येतत् समुदितं व्याख्यानं भवति। उक्तञ्च

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
पूर्वपक्षसमाधानं व्याख्यानं पञ्चलक्षणम्॥

पुनः केषाञ्चित् मतेन व्याकरणपदेन केवलं शब्दरूपोऽर्थो गृह्यते। अस्मिन् पक्षे उच्यते यत् यदि व्याकरणशब्दस्य अर्थः शब्दो भवति तदा व्याक्रियते व्युत्पद्यते अनेन इति व्याकरणम् इत्यर्थनिष्ठो ल्युट् इति प्रत्ययस्य अनुपपत्तिः स्यात् यतः शब्देन न किमपि व्याक्रियते व्युत्पद्यते वा। एतद् अवधारणीयं यत् सूत्रेण एव व्याख्यानं भवति। तथा च यदि व्याकरणशब्दस्य अर्थः शब्दो भवति तदा वैयाकरणादिपदनिष्ठस्य 'तत्र भवो योगः' इत्यर्थगतस्य अणादितद्धितप्रत्ययस्य उपपत्तिर्न भवति न च प्रोक्तादयश्च तद्धिताः उपपद्यन्ते। अतः पाणिनिना प्रोक्तं पाणिनीयं, आपिशलेन प्रोक्तम् आपिशलं, काशकृत्स्नम् इत्यादि प्रयोगा न उपपद्यन्ते। यतः पाणिनिना न शब्दः प्रोक्तः परन्तु तेन सूत्रं प्रोक्तम् इति।अत एव उच्यते व्याकरणविषये यत् लक्ष्यलक्षणे व्याकरणम् इति। लक्ष्यं च लक्षणं च एतत् समुदितं व्याकरणं भवति। अत्र अवधारणीयं यत् लक्ष्यः इति पदेन शब्दः सूच्यते। तथा च लक्षणम् इति पदेन सूत्रम् इति सूच्यते। समुदायेषु हि शब्दाः प्रवृत्ताः अवयवेष्वपि वर्तन्ते पूर्वे पाञ्चालाः, उत्तरे पाञ्चालाः इत्यादिवत्। एवं व्याकरणम् इति पदं सूत्ररूपे समुदायेऽपि प्रवर्त्तते शब्दरूपे अवयवेऽपि प्रवर्त्तते।

३.७. व्याख्यायताम् –

३.७.क. दुष्टः शब्दः

शब्दानुशासनस्य प्रयोजनविषये एको विषयः समुपस्थापितोऽस्ति पतञ्जलिना यत्र उक्तमस्ति यत् दुष्टः शब्दो वाक्ये प्रयुक्तो मा भूत् तदर्थं व्याकरणम् अध्येयम्। तत्र सम्पूर्णः श्लोको यथा –

दुष्टः शब्दः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

अस्य अयमर्थः- वैदिकमन्त्रविषये उच्यते यत् ये वर्णाः स्वरदिशा वर्णदिशा अशुद्धाः अथवा भ्रान्तरूपेण प्रयुक्ताः भवन्ति ते न कथमपि प्रकृतम् अर्थं प्रतिपादयन्ति। तद्वाक्यं तदा वज्ररूपेण यजमानं हन्ति

यथा स्वरापराधात् इन्द्रशत्रुः इति भ्रान्तम् उच्चारणं यजमानं हतवान् । अस्य वाक्यस्य गूढोऽर्थोऽस्ति यत् वेदमन्त्रोच्चारणे स्वरविषये सदैव विशेषमनस्संयोगः करणीयः । उदात्त–अनुदात्त–स्वरित-प्रचयाद्युच्चारणविषये वेदमन्त्रपाठकाले वाचकः सर्वदा मनस्संयोगी भवेत् । नो चेत् भ्रान्तम् उच्चारणं तस्यैव वाचकस्य मृत्युकारणं भवितुम् अर्हति । उदाहरणत्वेन एका वैदिकी कथा अत्र उपस्थाप्यते । तैत्तिरीयसंहितायां द्वितीये काण्डे पञ्चमप्रपाठके एका कथा एवम् अस्ति – एकदा भगवान् इन्द्रो विश्वरूपं हतवान् । पुत्रस्य मृत्युकारणात् क्षुब्धः त्वष्टा इन्द्रं हन्तुम् अभिचारयागमेकं प्रारब्धवान् । तत्र मन्त्रोच्चारणकाले स 'स्वाहेन्द्रशत्रुर्वर्धस्व' इति पदं व्यवहरति स्म । अस्मिन् पदे व्यवहृतः शत्रुः इति शब्दः 'यः शातयिता नाशकः' इत्यर्थे प्रयुक्तः न तु संज्ञाबोधने आसीत् । यागकर्तुः प्रार्थना ईदृशी आसीत् यत् अग्निज्वालजातः वृत्रासुरः इन्द्रस्य घातकः भवेत् इति । परन्तु अस्य अर्थस्य प्रतिपादनार्थम् 'इन्द्रशत्रुः' इति पदे तत्पुरुषसमासस्य व्यवहारः आवश्यकियो भवति । तत्करणार्थं तु इन्द्रशत्रुः इति पदम् अन्तोदात्तं पठनीयम् आसीत् । परन्तु अनवधानतावशात् स पूर्वपदप्रकृतिस्वरत्वं कृत्वा तस्मिन् इन्द्रशत्रुः इति पदे बहुव्रीहिसमासस्य प्रसंक्तिम् आनीतवान् । अन्यपदार्थप्रधानबहुव्रीहिसमासस्य व्यवहारेण 'इन्द्रो भवति शत्रुर्यस्य' इत्यर्थस्य प्रतिपादनात् वृत्रासुरस्य जन्म अभवत् तस्य मृत्युरपि अभवत् भगवता इन्द्रेण । अनेन त्वष्टा विफलोऽभवत् ।

अत एव न कोऽपि दुष्टान् भ्रान्तान् शब्दान् उच्चारयेत् एतदर्थं व्याकरणम् अध्येयम् इति विशेषार्थोऽस्य वाक्यस्य ।

३.७.ख. चत्वारि शृङ्गा त्रयो अस्य पादाः

शब्दानुशासनस्य प्रयोजनविषये एको विषयः समुपस्थापितोऽस्ति पतञ्जलिना यत्र उक्तमस्ति यत् महता देवेन सह मनुष्याणाम् साम्यं स्यात् तदर्थं व्याकरणम् अध्येयम् । ऋग्वेदीयचतुर्थमण्डलस्थितः सम्पूर्णः श्लोको यथा –

चत्वारि शृङ्गा त्रयो अस्य पादाः
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्या आविवेश ॥

रूपकव्यवहारेण अत्र विवक्षितोऽर्थः प्रकल्पितोऽस्ति । व्याकरणनिष्ठं पदं व्याकरणशास्त्रं वा अत्र वृषभरूपेण कल्पितमस्ति । नाम- आख्यात- उपसर्ग- निपाताः इति पदजातानि शब्दरूपवृषभस्य चत्वारि शृङ्गाणि भवन्ति । भूत-भविष्यत्-वर्तमानाः त्रयः कालाः शब्दरूपवृषभस्य त्रयः पादाः भवन्ति । शब्दात्मानौ नित्यरूपः कार्यरूपश्च द्वौ अस्य शब्दरूपवृषभस्य द्वे शीर्षे भवतः । प्रथमादिसप्तम्यन्तविभक्तिसप्तकम् अस्य शब्दरूपवृषभस्य हस्तसप्तकं भवति । उरसि कण्ठे शिरसि इति स्थानत्रये बद्धो भवति एष शब्दरूपवृषभः । कामवर्षणात् एष शब्दो वृषभः इति उच्यते । अर्थात् शब्दस्य शुद्धम् उच्चारणं कामनापूरकं भवति । एष शब्दरूपवृषभो रोरवीति शब्दं कुर्वन् वर्तते । एष शब्दरूपो महान् देवो मर्त्यान् मरणधर्मयुक्तान् मनुष्यान् आविवेश प्रविशति । अनेन एतत् निर्धार्यते यत् महता

शब्दरूपदेवेन सह अस्माकं सायुज्यम् अस्ति । महता देवेन सह अस्माकं सायुज्य यथा स्यात् इत्यर्थम् अध्येयं व्याकरणम् ।

३.८. किं पुनः शब्दस्य ज्ञाने धर्म आहोस्वित् प्रयोगे : व्याख्या

शब्दस्य ज्ञाने धर्मः अथवा शब्दस्य प्रयोगे धर्मः इति विषयं गृहीत्वा विद्वत्समाजे विप्रतिपत्तिः प्रस्तूयते । यदि शब्दस्य ज्ञाने धर्मो जायते तदा तु अधर्मोऽपि भवति । यतः शब्दज्ञानकाले बहूनाम् अपशब्दानाम् अपि ज्ञानं भवति । एतदपि ज्ञातव्यं यत् यदि शब्दज्ञाने धर्मः तर्हि अपशब्दज्ञाने अधर्मः स्यात् । जगति शब्दसंख्या स्वल्पा परन्तु अपशब्दसंख्या भूयसी । यतः एकस्य शब्दस्य बहवोऽपशब्दाः वर्तन्ते । यथा गौः इत्यस्य शब्दस्य गावी गोणी गोता गोपोतलिका इत्येवम् आदयोऽपभ्रंशाः सन्ति । अनेन एवं भवति यत् गौः इति पदज्ञानात् यथा धर्मो भवति युगपदेव गावी-गोणी-गोता-गोपोतलिकादीनाम् अपशब्दानाम् ज्ञानेन अधर्मो जायते । यदि साधुशब्दस्य प्रयोगे धर्मः इत्युच्यते तदा अपशब्दस्य प्रयोगे अधर्मः स्यात् । शास्त्रे उक्तमस्ति यत् तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः परावभूवुरिति । यदि शब्दस्य प्रयोगे धर्मः सर्वो लोकोऽभ्युदयेन युज्येत । एवं कृते तु प्रयत्नस्य का स्थितिः इति प्रश्नो जायते । तदा उच्यते शास्त्रपूर्वके प्रयोगे अभ्युदयः तत्तुल्यं वेदशब्देन । एवं शब्दस्य ज्ञाने धर्म उत प्रयोगे इति प्रसङ्गे उच्यते 'अथवा कूपखानकवदेतद् भविष्यति । यथा कूपखानकः कूपं खनन् प्रथमतया मृदा पांशुभिः च अवकीर्णो भवति परन्तु जले निर्गते तु तेनैव जलेन गुणमासादयति , येन च दोषो दूरीभवति । एवं प्रकारेण यद्यपि अपशब्दस्य ज्ञानेन अधर्मो जायते तदन्तरं शब्दस्य ज्ञानेन धर्मो जायते दोषो दूरीभूयते । तदा भूयसा अभ्युदयेन संयुक्तो भवति जनः ।

३.९ अध्यायात् किमवगतम्

अध्यायमेनम् अधीत्य भवन्तः ज्ञातुं शक्नुवन्ति यत् पतञ्जलिकृतो महाभाष्यग्रन्थो संस्कृतशास्त्रेषु अन्यतमः । तस्यैव ग्रन्थस्य प्रथमम् आह्निकम् अस्ति पस्पशाह्निकम् । संपूर्णस्य महाभाष्यग्रन्थस्य आमुखरूपेण वर्तते पस्पशाह्निकम् । अत्र शब्दस्य विषये अवधारणं , व्याकरणपाठस्य प्रयोजनानि, शब्दार्थयोः सम्बन्धः, शब्दापशब्दयोः स्थितिः, शब्दज्ञानेन सह अभ्युदययोगः, व्याकरणस्य लक्षणम् इत्यादिकं विषयजातं विशदं समुपस्थापितम् अस्ति । एतेषां विषयजातानाम् अध्ययनेन पाणिनिव्याकरणमहत्वविषये एका सामान्या धारणा उपजायते यया परवर्तिकाले अग्रिमविषयावबोधे सहकारिणी भविष्यति ।

३.१० ज्ञानाधिक्यम्

- Shastri, Charudev, *Vyakarana Mahabhasya*, Delhi: Motilal Banashidas
- Joshi, Bhargava Shastri Bhikaji, *The Vyakaranamahabhasya*, Delhi: Chaukhamba Sanskrit Pratisthan
- Dasgupta, Surendranath, *The Mahabhasya of Patanjali*, Delhi: Indian Council of Philosophical Research.

- Sarma, Raman Kumar, *Mahabhasyam*, Delhi: Eastern book Linkers.
- Shastri, P.S. Subrahmanya, *Lectures on Patanjali's Mahabhasya*, Vol-1, Annamalainagar, 1944

३.११. अग्रगत्याः निरूपणम्

उत्तरम् १ - ख्रीष्टपूर्वद्वितीयशताब्दी।

उत्तरम् २ - पाणिनिः।

उत्तरम् ३ – कात्यायनः।

उत्तरम् ४ - आह्निकम्।

उत्तरम् ५ - पञ्चाशीति।

उत्तरम् ६ - एकदिवसे समापनीयः पाठः।

उत्तरम् ७ - प्रदीपः।

उत्तरम् ८ - कथोपकथननिष्ठा।

उत्तरम् ९ - सूत्रम्।

उत्तरम् १० - सुत्रज्ञाः, सूत्रशैलीनिष्णाताः।

उत्तरम् ११ - पतञ्जलिः।

उत्तरम् १२ - सास्नालाङ्गूलविषाणादिकम्।

उत्तरम् १३ - इङ्गितचेष्टितादिकम्।

उत्तरम् १४ - स्फोटः।

उत्तरम् १५ - माणवकः।

३.१२. अभ्यासप्रश्नाः

क. व्याख्यायताम्

संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५०-३०० शब्देषु लिखन्तु)।

१. अथवा कूपखानकवत् एतद् भविष्यति।

२. दुष्टः शब्दः....।

३. चत्वारि शृङ्गा त्रय अस्य पादाः.....।

ख. रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३००-५०० शब्देषु लिखन्तु)।

१. व्याख्यायताम् त्रिमुणि व्याकरणम् इति।

२. महाभाष्यस्य गुरुत्वम् अधिकृत्य स्वकीयेन वाक्येन लिखतु।

३. पस्पशाह्निकस्य विषये नातिदीर्घा टिप्पणी लेखनीया।

४. पतञ्जलिदिशा शब्दस्वरूपं व्याख्यायताम्।

५. पस्पशाह्निकम् अनुसृत्य व्याकरणप्रयोजनानि लिखितव्यानि।

६. व्याकरणस्य लक्षणम् आलोच्यताम्।

*****

अध्यायः ४ : अपाणिनीयव्याकरणसम्प्रदायः, सामान्याध्ययनम्

अध्यायस्य संरचना

४.१ उद्देश्यम्

४.२ परिचयः

४.३ कातन्त्रव्याकरणम्

४.४ चान्द्रव्याकरणम्

४.५ जैनेन्द्रव्याकरणम्

४.६ सारस्वतव्याकरणम्

४.७ मुग्धवोधव्याकरणम्

४.८ अध्यायस्य असमीयाभाषायां सारांशः

४.९ अध्यायात् किमवगतम्

४.१० ज्ञानाधिक्यम्

४.११ अग्रगत्याः निरूपणम्

४.१२ अभ्यासप्रश्नाः

४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनेन भवन्तः –

- अपाणिनीयव्याकरणस्य संज्ञां ज्ञातुं शक्नुवन्ति।
- कातन्त्रव्याकरणविषये ज्ञातुं शक्नुवन्ति।
- चान्द्रव्याकरणस्य विषये ज्ञातुं शक्नुवन्ति।
- जैनेन्द्रव्याकरणस्य विषये ज्ञातुं शक्नुवन्ति।
- सारस्वतव्याकरणस्य विषये ज्ञातुं शक्नुवन्ति।
- मुग्धवोधव्याकरणविषये अवगतो भविष्यन्ति।

४.२. परिचयः

भवता संस्कृतव्याकरणस्य उद्भव-विकाशविषये पूर्वमेव ज्ञातम् । आदिव्याकरणरूपेण पाणिनिव्याकरणविषये भवता अधीतम्। पाणिने अष्टाध्यायमाश्रित्य बहुव्याख्या टिप्पणी अपि लिखिता। परन्तु अष्टाध्यायीम् अनुसरणं कृत्वा बहुवैयाकरणाः व्याकरणं रचितवन्तः । तैः व्याकरणग्रन्थै अपाणिनीयधारा

प्रचलिता । व्याकरणजगति पाणिनीयसम्प्रदायेन सह अपाणिनीयधारा अपि सममेव प्रयोजनं साधयन्ति । तत्रापि महत्वपूर्णतत्वानि सन्ति यानि भाषाविषयकालोचने सोपकाराः भवन्ति । तस्मादेव कारणात् अपाणिनीयव्याकरणसम्प्रदायस्य कतिपयानां ग्रन्थानां विषये अत्रालोच्यते ।

ज्ञातव्यम्

व्याकरणस्य इतिहासे बहुविधा अपाणिनीयमार्गा उल्लिख्यते । परिवर्तन-शीलायाः भाषायाः काले पाणिनीयेतराणि व्याकरणानि समुदितानि । सर्वेषामपाणिनीयमार्गानां साधारणवैशिष्टमस्ति वैदिकस्वराणां परिहारः । पाणिनिव्याकरणप्रभावात् अन्ये सम्प्रदायाः दिवालोके तारकावत् निष्प्रभो जायते । केनापि दर्शनेन, धर्मेण अथवा क्षेत्रीयोपादानेन अपाणिनीयसम्प्रदाया: प्रभाविताः । अतः कदाचित् तेषां चर्चा अपि विदुषा न्युनं क्रियते ।

४.३ कातन्त्रव्याकरणम्

अपाणिनीयव्याकरणग्रन्थेषु कातन्त्रव्याकरणं विशिष्टस्थानं लभते । व्याकरणमिदं कलापकं कौमारं वा इति नाम्ना अपि ज्ञायते । अस्य रचयिता शर्ववर्मा आसीत् । १००-२०० इसवीये अस्य रचनमभवत् । 'कातन्त्र'शब्दस्य व्युत्पत्ति इषत् तन्त्रं सूत्रं कातन्त्रम्, इषदर्थे अल्पार्थे 'कु'इत्यस्य स्थाने 'का' आदेशे सति तन्त्रशब्देन कातन्त्रपदस्य सिद्धिर्भवति । 'कातन्त्र'पदमेव अस्य ग्रन्थस्य लघुतायाः प्रमाणीकरोति । कुमारणैव प्रोक्तत्वात् कौमारव्याकरणमिति अस्य अपरसंज्ञा । कुमाराणां बालानां वा कृते प्रयुज्यत्वादपि कौमार इति संज्ञा अथवा कुमारशब्देन कार्तिकमपि बोध्यते । कुमारेण कार्तिकेयेन मयुरकलापे लिखितमिदं व्याकरणं कलापव्याकरणमिति संज्ञा । सारस्वतमते तु कुमाराज्ञया सरस्वतीमुखे प्रविश्य स्वयमेव व्याकरणं प्रोक्तवतीति । कातन्त्रव्याकरणस्य प्रणेता कथासरित्सागरानुसारेण शर्ववर्मा आसीत् । परन्तु गरुडपुराणे अस्य व्याकरणस्य प्रणेता कात्यायनः आसीदिति प्राप्यते । नारदीयपुराणानुसारेण सनन्दनेन नारदं व्याकरणमिदं प्रोक्तं कथासरित्सागरे, क्षेमेन्द्रस्य बृहत्कथामञ्जर्यां कलापसम्बन्धीयाख्यानं वर्तते । कथासरित्सागरानुसारेण शर्ववर्मणा सातवाहनप्रबोधनाय व्याकरणमिदं रचितम् । एकदा नृपः सातवाहनः पत्न्या सह जलक्रीडायां जलसिञ्चनं निवारयितुं मोदकं (मा+उदकं) देहि इति नृपपत्नीम् उक्तवती । राज्ञा अर्थं नावगम्य मोदकमानीतम् । नृपस्य अज्ञाप्तायाम् उपहासपात्रमभवत् । अतः षड्मासाभ्यन्तरे व्याकरणज्ञानं प्रदातुं शववर्मणा कातन्त्रव्याकरणं रचितम्।

कातन्त्रव्याकरणस्य शाखाद्वयं प्राप्यते – वाररुचं दौर्गञ्च, वाररुचमिति उत्तरभागे प्रचलितमासीत् । वंगदेशे दौर्गशाखायाः प्रचलनमासीत् । व्याकरणमिदं चतुर्षु प्रकरणेषु विभक्तम् – 'सन्धिनामाख्याताकृत्' इति । तत्र प्रथमे सन्धिप्रकरणे पञ्चपादाः, द्वितीये नामप्रकरणे षट्पादाः, तृतीये आख्यानप्रकरणे अष्टौ पादाः, चतुर्थे कृत्प्रकरणे षट्पादा इति षट्विंशतिः पादाः सन्ति ।

पाणिनिव्याकरणेन सह अस्य व्याकरणस्य वैलक्षणं दृश्यते । वर्णसमाम्नायं कातन्त्रे अष्टाध्यायी इव न दृश्यते । प्रत्याहारादीनां प्रयोग अत्र न दृश्यते । पाणिनीयं व्याकरणं वैदिकलौकिकोभयपक्षसम्बद्धकातन्त्रे वैदिकसूत्राणि परिहीयते ।

कातन्त्रव्याकरणस्य समुपलब्धवृत्तिषु दूर्गसिंहस्य वृत्तिरेव प्राचीना प्रामाणिकी च वर्तते । कातन्त्रवृत्तौ दूर्गसिंह टीकामपि रचितवान् । अष्टमे ईसवीये एव तस्य स्थितिकालः । कातन्त्रवृत्तौ अन्याः वृत्तयः अपि सन्ति । तासु वर्धमानस्य कातन्त्रविस्तारः, त्रिलोचनदासस्य कातन्त्रवृतिपञ्जिका, महादेवस्य शब्दसिद्धिः प्रधानाः । वृतिग्रन्थेषु अपि वैयाकरणैः व्याख्या ग्रन्थाः प्रणीताः ।

अग्रगत्याः निरीक्षणम्

प्रश्नः १ – कातन्त्रव्याकरणस्य प्रणेता कः आसीत् ?

.....

प्रश्नः २ - कातन्त्रव्याकरणस्य अपरनामो लिखतु ?

.....

प्रश्नः ३ - कातन्त्रव्याकरणे कति प्रकरणानि सन्ति ?

.....

४.४ चान्द्रव्याकरणम्

चान्द्रव्याकरणं चन्द्रगोमिनेन रचितम् । संस्कृतव्याकरणस्य इतिहासे चन्द्रः, चन्द्रगोमी, चन्द्राचार्यश्चेति त्रयाणां वैयाकरणानामुल्लेखः प्राप्यते । ते भिन्नाः आसन् अथवा एक एवासीत् तत्र ऐक्यमतं न दृश्यते । चान्द्रव्याकरणस्य प्राचीनतमोल्लेखः प्राप्यते वाक्यपदीये । ततः मेघदूतस्य मल्लिनाथकृतटीकायाम् उपलभ्यते ।

क्षितीश्चन्द्रचेटार्जिमिहाभागानुसारेण चान्द्रव्याकरणं वस्तुतः त्रिमुनियाकरणस्यैव संशोधितं संस्करणमस्ति । यद्यपि अस्य व्याकरणस्योलेखः प्राचीनग्रन्थेषु प्राप्तः तथापि ग्रन्थोऽयं दुर्लभः आसीत् । तिब्बतीयसंस्करणादस्य प्रथमप्रकाशनस्य मान्यत्वं प्रोफेचर लेइविच महाभागाय गच्छति ।

चन्द्रगोमिनं विद्वद्भिः बौद्ध इति मन्यन्ते । अस्य आधारः अस्ति व्याकरणस्य मङ्गलश्लोके क्रियमानः सिद्धः सर्वीयगुरवे नमस्कारः । स्वरवैदिकप्रकरणस्य अभावोऽपि द्वितीयं प्रमाणं युधिष्ठिरमीमांसकमहाभागस्तु वृत्तौ स्वरं वक्षामः इत्यादीनाम् उल्लेखेन एव स्वरवैदिकप्रकरणस्य स्थितिः प्राप्यते इति प्रमाणीकरोति ।

चन्द्राचार्यस्य स्थितिकालोऽपि अधुनापि न निर्णीतः । अन्तःसाक्षरूपेण एकस्मिन् सूत्रे 'अजयद् जर्तो इनाम्' उल्लिख्यते । अत्र 'जर्तो' इति गुप्तशब्दस्य विकारितः शब्दः विजेता राजा स्कन्दगुप्तः आसीदिति अनुमीयते । तस्मात् अस्य व्याकरणस्य रचना ४७० ईसवीये इति वक्तुं शक्यते । वाह्यसाक्षरूपेण चीनी-

पर्यटकस्योल्लेखेन अस्य व्याकरणस्य स्थितिः ६०० इसवीये स्थिरीकर्तुं शक्यते। पातञ्जलव्याकरणे चन्द्राचार्यः कुशलः आसीदिति भर्तृहरिणा कल्हनेन च स्पष्टीकृतम्।

चान्द्रव्याकरणे षट् अध्यायाः सन्ति । प्रत्येके अध्याये चत्वारः पादाः सन्ति । चान्द्रव्याकरणस्य वैशिष्ट्यमस्ति पाणिनिव्याकरणेन सह अस्य सादृश्यम् । विषयवस्तुनि पाणिनिव्याकरणस्य प्रथमं द्वितीयं च अध्यायं विहाय अवशिष्टाध्यायैः सह चान्द्रव्याकरणस्य सादृश्यं वर्तते । तथापि चान्द्रव्याकरणे कतिपयानि पृथगेव वैशिष्ट्यानि परिदृश्यते। पाणिनीये इव चान्द्रव्याकरणे संज्ञाविधानं नास्ति। लघुत्वं, स्पष्टत्वं, सम्पूर्णत्वं च अस्य व्याकरणस्य इतरं लक्षणम्। चान्द्रे प्राप्यते लघुविस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम्, युधिष्ठिरमीमांसकमतेन कातन्त्रं लघुः विस्पष्टं च परन्तु न सम्पूर्णम्। यतो हि अत्र केचित् विषयाः न अन्तर्भूक्ताः । पानिनीयव्याकरणं सम्पूर्णं किन्तु विशालम्। सम्भवतः अनयोः व्याकरणयोः गुणाः मनसि निधाय एव चान्द्रव्याकरणं रचितम्। अपि च अष्टाध्याय्यां ३८१८ सूत्राणि सन्ति। चान्द्रे व्याकरणे ३१०० सूत्राणि सन्ति। चन्द्रगोमिनेन स्वरवैदिकविषयौ न निरूपितौ, 'टि, धु' इत्यादयः पारिभाषिकशब्दानामपि नोल्लेखितम् । केषाञ्चित् मते अत्र अष्टावेवाध्यायाः आसन्। अध्यायद्वये स्वरवैदिकविषयं निरूपितमासीत्। सूत्रस्य वृत्तौ एव स्वरप्रक्रियायाः सूचना दृश्यते। केचित् विद्वांसस्तु चन्द्रगोमिनस्य बौद्धत्वेन वैदिकप्रकरणं नोक्तमिति मतं प्रकाशयति।

मूलस्योपरि चन्द्रगोमिनस्य स्वकीयवृत्तिर्लभ्यते। परन्तु वृत्तिः चन्द्रगोमिनस्य न केनापि धर्मदासेन संक्षेपं कृतमिति विदूषां मतम्। बौद्धधर्मस्य पतनेन सह अस्य व्याकरणस्य प्रचलनमपि न्यूनम् अभवत्। तिब्बतदेशे अद्यापि बहुप्रचलनमस्ति इति अनुमीयते।

अग्रगत्याः निरीक्षणम्

प्रश्नः ४ – चान्द्रव्याकरणे कति अध्यायाः सन्ति ?

.....

प्रश्नः ५ – चान्द्रव्याकरणस्य रचयिता कः ?

.....

प्रश्नः६ – चान्द्रव्याकरणस्य वैशिष्ट्यमेकं लिखतु।

.....

४. ५ जैनेन्द्रव्याकरणम्

देवनन्दिना जिनेन्द्रसंज्ञयाऽपि ज्ञातेन रचितं व्याकरणं जैनेन्द्रव्याकरणम्। अत्र पञ्चाध्यायाः सन्ति। अतः व्याकरणमिदं पञ्चाध्यायीनाम्ना अपि ज्ञायते । अप्रामाणिकसन्दर्भेन एतत् ज्ञायते यदस्य रचनं जिनमहावीरेण कृतम्। तदनुसारेण भगवान् हि महावीरः इन्द्राय व्याकरणमिदं प्रोक्तवान् इति अस्य जैनेन्द्रसंज्ञा। देवनन्दीमहाभागं पूज्यपादमिति नाम्ना अपि ज्ञायते। देवनन्दी कर्णाटकप्रदेशवास्तव्य इति तस्मिन् देशीयशिलालेखादिषु प्रशस्तेः वर्णनादनुमीयते।

जैनेन्द्रव्याकरणमपि चान्द्रव्याकरणस्य समकालिकः आसीत् केचित् विद्वांसः व्याकरणमिदं पञ्चमशताब्द्याः पश्चाद्भागे स्थिरीकुर्वन्ति । यतो हि काशिकायां जैनेन्द्रव्याकरणस्य स्थितिः सूच्यते । अस्य व्याकरणस्य बृहल्लघुभेदेन द्वौ पाठौ लभ्येते । सप्तशताधिकत्रिसहस्रसंख्यकश्लोकात्मकः (६७००) बृहत्पाठः दाक्षिणात्येषु प्रसिद्धः लघुपाठे ३०३६ संख्यकसूत्राणि सन्ति । लघुपाठस्य चर्चा अधिकं दृश्यते । तत्र पञ्चाध्याये विंशतिपादाः सन्ति । पाणिनिव्याकरणादितिरिक्तं कात्यायनपतञ्जलि-आदीनामपि संक्षिप्तरूपमिदं व्याकरणम् । जैनेन्द्रव्याकरणं सूत्रपाठ-धातुपाठ-गणपाठ-उणादिपाठ-लिङ्गानुशासनेन सह पञ्चाङ्गयुक्तम् ।

पाणिनिमनुसृत्येव अस्य व्याकरणस्य रचनमभवत् । पाणिनीयप्रत्याहारमपि अस्मिन् व्याकरणे दृश्यते । परन्तु शिवसूत्राणि वैदिकप्रकरणञ्च अस्मिन् व्याकरणे नोपलभ्यते । एकाक्षरसंज्ञया देवनन्दिमहाभागेन व्याकरणमिदं संक्षेपं कृतम् ।

व्याकरणमिदमनुसृत्य बहवः टीकाग्रन्थाः विरचिताः । अधुना केवलं चत्वारः पञ्च वा व्याख्याग्रन्थाः उपलभ्यन्ते । तेषु देवनन्दि-अभयनन्दि-प्रभाचन्द्र-महाचन्द्रादयो प्रधानाः ।

देवनन्दिमहाभागः व्याकरणेऽस्मिन् न्यासमपि स्वयमेव प्रणीतवान् । अधुना न्यासः नोपलभ्यते । अभयनन्दिनः 'महावृत्तिः' इति व्याख्याग्रन्थे द्वादशसहस्रश्लोकाः वर्तन्ते । गुणनन्दीमहाभागः जैनेन्द्रनव्याकरणं यथावश्यकं परिवर्तनं परिवर्धनं च कृत्वा शब्दार्णवनामकं ग्रन्थं प्रणीतवान् । सोमदेवेन शब्दार्णवोपरि शब्दार्णवचन्द्रिकानाम्नी व्याख्या लिखिता । आचार्य प्रभाचन्द्रः जैनेन्द्रव्याकरणस्योपरि शब्दाम्भोजमभास्करन्यास नाम्नी महती व्याख्या रचितवान् । महाचन्द्रः अभयनन्दिनः महावृत्तिमाधारिकृत्य 'लघुजैनेन्द्र' इति व्याख्या रचितवान् । श्रुतकीर्तिना जैनेन्द्रव्याकरणमधिकृत्य पञ्चवस्तु नामक : प्रक्रियाग्रन्थः प्रणीतः।

अग्रगत्याः निरीक्षणम्

प्रश्नः ७-जैनेन्द्रव्याकरणस्य कति पाठाः सन्ति ?

.....

प्रश्नः८- महावृत्तिः इति व्याख्या ग्रन्थस्य रचयिता कः?

.....

प्रश्नः९- जैनेन्द्रव्याकरणस्य अपरो नाम किम् ?

.....

४.६ सारस्वतव्याकरणम्

सारस्वतव्याकरणस्य रचयिता अनुभूतिस्वरूपाचार्यः आसीदिति परम्परया ज्ञायते । सारस्वतं हि व्याकरणं सरस्वतीकृपया अनुभूतिस्वरूपाचार्येण प्राप्तमिति केचित् कथयन्ति । नरेन्द्रनगर्याचार्येणापि व्याकरणमिदं

संबद्धम्। सारस्वतव्याकरणस्य अन्तिमे भागे अनुभूतिस्वरूपाचार्यविरचिते इति पाठेन तस्यैव कर्तृत्वं स्थापयति। परन्तु प्रारम्भिके श्लोके अनुभूतिस्वरूपाचार्येण प्रक्रियासरलीकृतमिति निर्दिष्टम्। तत्र श्लोकमस्ति –

" प्रणम्य परमात्मनं बालधीवृत्तिसिद्धये।
सरस्वतीम् कुर्वे प्रक्रियां नातिविस्तरम्॥" इति।

टिप्पणीकार: क्षेमेन्द्रोऽपि इति नरेन्द्राचार्यकृते सारस्वते क्षेमेन्द्रटिप्पणं समाप्तरिति कथयति। अतः इदमनुमीयते यत् मूलभागं नरेन्द्राचार्येण रचितवान्, शेषः अनुभूतिस्वरूपाचार्येण विरचितः।

वोपदेवेन नोल्लिखितमिति कृत्वा अस्य व्याकरणस्य कालः मुग्धवोधात् पश्चादिति अनुमीयते। परन्तु इसलामीयशासकखिलर्जः (१४६८) पूर्ववर्तिनः इति मन्यते, यतो हि तस्य एक मन्त्रिः पुण्यराजा अस्य व्याकरणस्योपरि प्रक्रिया इति टीकां लिखितवान्। अस्य व्याकरणस्य समयः त्रयोदशशतिका निर्दिष्टम्।

सारस्वतव्याकरणस्य विशेषत्वमस्ति अस्य संक्षिप्तता। ७०० सूत्रेषु एवं समग्रविषयं स्पष्टीकृतम्। अपि च व्याकरणमिदम् अत्यन्तं सरलम्। प्रत्याहारेषु अस्मिन् व्याकरणे अन्त्याः हलवर्णाः परिहीयते। सूत्राणां भाषा अपि सरला। स्वरवैदिकप्रक्रिया अत्र अनुपस्थिताः।

व्याकरणमिदमुत्तरभारतीयप्रान्ते बहुप्रचलितमासीत्। अतः अस्य बहुव्याख्याकर्तारः प्राप्यते। क्षेमेन्द्रस्य टिप्पणः, धनेश्वरस्य क्षेमेन्द्रटिप्पणखण्डनः, अमृतभारत्याः सुबोधिनी, पुञ्जराजस्य प्रक्रिया, सत्यप्रबोधस्य दीपिका इत्यादयः। इतोपरि चन्द्रकीर्तिसूरिः, रघुनाथः, मण्डनः, रामभट्टः इत्यादयोऽपि टीकां विरचितवन्तः।

व्याकरणमिदं कतिपयैः विद्वभिः रूपान्तरीकृतमपि । तर्कतिलकभट्टाचार्येण सारस्वतव्याकरणं रूपान्तरीकृत्य व्याख्यातम् । ततः रामाश्रमाचार्येण व्याकरणमिदं रूपान्तरीकृत्य तस्य सिद्धान्तचन्द्रिकाख्या व्याख्या कृता। तेन हि लघुसिद्धान्तचन्द्रिका अपि प्रणीता। सिद्धान्तचन्द्रिकायाः बहुभागाः प्राप्यन्ते। केचित् सिद्धान्तचन्द्रिकां स्वतन्त्रव्याकरणरूपेण स्वीकरोति। परन्तु युधिष्ठिर-मीमांसकमहाभागे तन्न स्वीकृतम्।

ज्ञातव्यम्

सारस्वतं व्याकरणं प्रक्रियात्मकम् अत्र संज्ञा-सन्धि-सुबन्त-अव्यय-स्त्रीप्रत्यय-कारक-समास-तद्धिताख्यात-कृदन्त-उणादि-इत्यादयः भागाः सन्ति । विषयविन्यासः परवर्तीकाले पाणिनीय सिद्धान्त-कौमुद्यां प्रभावितवान् इति मन्यते।

अग्रगत्याः निरीक्षणम्

प्रश्नः१० सारस्वतव्याकरणे कति सूत्राणि सन्ति ?

.....

प्रश्नः११ सारस्वतव्याकरणस्य एकस्य टीकाकारस्य नाम लिखत ?

.....

प्रश्नः१२ सारस्वतव्याकरणस्य विशेषत्वं किम् ?

.....

४.७ मुग्धबोधव्याकरणम्

द्वादशशतिकायां वोपदेवेन मुग्धबोधव्याकरणं रचितम्। तस्य पिता केशवः। पितामहश्च महादेवः। सश्च धनेश्वरस्य शिष्य आसीत्। सन्दर्भेऽस्मिन् एकः श्लोकः प्राप्यते –

" विद्यद्धनेश्वरच्छात्रो भिषक् केशवनन्दनः।
वोपसेवश्चकारेदं विप्रो वेदपदास्पदम्॥" इति

श्लोकेऽस्मिन् वोपदेवस्य पितुः गुरोः नाम्ना सह तस्य पूर्वजानां वैद्यवृत्तेः अपि उल्लेखनमस्ति। वोपदेवस्य पितृपादाः सिद्धमन्त्रमिति ग्रन्थस्य रचयिता आसीदिति प्राप्यते। वोपदेवस्य जन्मः दौलतावादस्य समीपे अभवत्। वोपदेवेन स्वग्रन्थे वेदपदोकः वेदपदास्पद् इत्यादयः निर्दिश्यते। तेनानुमीयते यत् सः 'वेदपदः' इति स्थानस्य निवासी आसीत्।

वोपदेवः देवगिर्याः यादवनरेशमहादेवस्य रामदेवस्य च सचिवः हेमाद्रेः आश्रितः आसीत्। मल्लिनाथः कुमारसम्भवस्य टीकायां वोपदेवं स्मरतीति तस्य पूर्ववर्तित्व सिद्धति। मल्लिनाथस्य स्थितिकालः १४०० ईसवीये मन्यते।

लघुकायमिदं मुग्धबोधव्याकरणं सर्वत्र समादृतम्। व्याकरणे दश अध्यायाः सन्ति। प्रत्येकेषु अध्यायेषु चतुर्षु पादेषु ११८५ श्लोकाः समाविष्टाः। दशाध्यायात् व्याकरणमिदं 'दशाध्यायी' इत्यपि ज्ञायते। वोपदेवः मुग्धबोधस्य सूत्राणि अतीव सरलतया उपस्थापितवान्। स्वकीयवैशिष्ट्येन स पाणिनीयसूत्राणि गृहीतवान्। वैदिकस्वराणि सूत्राणि च अत्र नोपलभ्यते। अन्यवैशिष्ट्यमस्ति अत्र वस्तुविन्यासक्रमः – संज्ञा, सन्धिः, शब्दः, स्त्रीप्रत्ययः, कारकम्, समासः, तद्धितधातुप्रकरणञ्च सूत्राणां व्याख्यानेऽपि हरिहररामादीनां नामानि दीयते। केषाञ्चित् विदुषां मते वोपदेवस्य व्याकरणे संक्षिप्तकरणं दृश्यते, तेन सः जैनेन्द्रव्याकरणेन अनुप्राणितः इति अनुमीयते। संक्षिप्तकरणात् कदाचित् मुग्धबोधस्य सूत्राणि क्लिष्टानि भवन्ति। तथापि टीकया सह अस्य व्याकरणस्य बहुलप्रचारं वंगदेशे अभवत्।

वोपदेवेने स्वयं वृत्तिरपि प्रणीता आसीत्। तदतिरिक्तम् अन्ये व्याख्याग्रन्थाः सन्ति। तेषु गङ्गाधरस्य सेतुसंग्रहः, वल्लभविद्यावागीशस्य बालबोधिनी, नन्दकिशोरस्य व्याख्या, अज्ञातकर्तृको मुग्धबोधप्रदीपः, दूर्गादासस्य सुबोधटीका प्रधानाः। रामतर्कवागीशेन मुग्धबोधस्य परिवर्द्धनं संक्षिप्तकरणं च कृतम्। तस्य परिवर्द्धितटीकायाः नामो आसीत् 'प्रमोदजननी'। अस्य व्याकरणस्य परिपूरकग्रन्थाः सन्ति। तेषां मध्ये शिवनारायणशिरोमणेः 'बृहन्मुग्धबोधः' गंगाधरकविराजस्य 'महावृत्तिः' इति द्वौ प्रसिद्धौ ग्रन्थौ।

ज্ঞাতব্যম্

ভট্টোজিদীক্ষিততঃ পাণিনিব্যাকরণস্য উত্থানাদনন্তরং মুগ্ধবোধস্য প্রচলনং ন্যূনীভূতমাসীত্ । পরন্তু বংগদেশে অদ্যাপি অস্য ব্যাকরণস্য বহুপ্রচলনং দৃশ্যতে।

অগ্রগত্যাঃ নিরীক্ষণম্

প্রশ্নঃ ১৩ মুগ্ধবোধে কতি অধ্যায়াঃ সন্তি ?

.....

প্রশ্নঃ ১৪ মুগ্ধবোধস্য একায়াঃ টীকায়াঃ নাম লিখতু।

.....

প্রশ্ন : ১৫ বোপদেবস্য পিতৃপাদঃ কঃ আসীত্।

.....

৪.৮ অধ্যায়স্য অসমীয়াভাষায়াং সারাংশঃ

এতিয়া আপোনালোকে ইতিমধ্যে পঢ়ি অহা পাঠ্যাংশৰ থূলমূলকৈ অসমীয়া বর্ণনা পঢ়িবলৈ পাব ।

পাণিনি ব্যাকৰণ সম্প্রদায়ৰ সমান্তৰালভাবে অপাণিনীয় ব্যাকৰণ সম্প্রদায়ো ভাৰতবর্ষত প্রচলিত আছিল । ব্যাকৰণশাস্ত্রৰ ইতিহাসত অপাণিনীয় ব্যাকৰণ সমূহৰ অধ্যয়নো সমানেই প্রয়োজনীয় ।

কাতন্ত্র ব্যাকৰণ - কাতন্ত্র ব্যাকৰণৰ ৰচয়িতা শর্ববর্মা আছিল । ইয়াৰ ৰচনা খৃষ্টীয় ১০০-২০০ ভিতৰত হৈছিল । এই ব্যাকৰণখনিক 'কলাপ' বা 'কৌমাৰ' হিচাবেও জনাযায়, বিভিন্ন পুৰাণত এই ব্যাকৰণৰ ৰচয়িতা নাম ভিন্ন ৰূপত পোৱা যায়। গৰুড়পুৰাণৰ মতে ইয়াৰ ৰচয়িতা কাত্যায়ন, নাৰদীয় পুৰাণৰ মতে এই ব্যাকৰণৰ বক্তা সনন্দন ।

কাতন্ত্র ব্যাকৰণৰ দুটা শাখা পোৱা যায় বাৰৰুচ আৰু দৌর্গ্য শাখা । প্রথমটি উত্তৰ ভাৰতত আৰু দ্বিতীয় ভাগটি বংগদেশত বহুল প্রচলন আছিল। এই ব্যাকৰণ খনি চাৰিটা প্রকৰণত বিভক্ত। সেই প্রকাৰণ চাৰিটা হল - সন্ধি, নাম, আখ্যাত, কৃত্ । প্রথম অধিকৰণত পাঁচটা পাদ, দ্বিতীয় অধিকৰণত ছয়টা পাদ, তৃতীয় অধ্যায়ত আঠটা পাদ আৰু চতুর্থ অধ্যায়ত ছয়টা পাদেৰে মুঠ বিশটা পাদ আছে। পানিনিৰ প্রত্যাহাৰ সমূহ কাতন্ত্রৰ ব্যাকৰণত পোৱা নাযায়। বৈদিকসূত্রসমূহ কাতন্ত্র ব্যাকৰনত নাই।

কাতন্ত্রব্যাকৰণৰ উপলব্ধবৃত্তিসমূহৰ ভিতৰত দূর্গ সিংহৰ বৃত্তি প্রাচীন আৰু প্রামাণিক , ইয়াৰ উপৰিও বর্দ্ধমানৰ 'কাতন্ত্রবিচাৰ' ত্রিলোচন দাসৰ -'কাতন্ত্রবৃত্তিপঞ্জিকা', মহাদেৱৰ 'শব্দসিদ্ধি' আদিয়েই প্রধান ।

চান্দ্র ব্যাকৰণ - চান্দ্রব্যাকৰণ চন্দ্রগোমিনৰ দ্বাৰা ৰচিত । সংস্কৃত-ব্যাকৰণৰ ইতিহাসত চন্দ্র , চন্দ্রগোমী আৰু চন্দ্রাচার্য্য নামেৰে তিনি গৰাকী বৈয়াকৰণৰ নাম পোৱা যায় । তেওঁলোক একে গৰাকীয়েই আছিল নে ভিন্ন, এই বিষয়ে কোনো

উল্লেখ পোৱা নাযায়। বাক্যপদীয়ত চান্দ্র ব্যাকৰণৰ প্ৰাচীনতম উল্লেখ পোৱা যায়। মল্লিনাথেও 'মেঘদূতৰ' টোকাত চান্দ্রব্যাকৰণৰ উল্লেখ কৰিছে।

চান্দ্রব্যাকৰণ আচলতে ত্রিমুনি ব্যাকৰণৰেই সংশোধিত সংস্কৰন। যদিও ব্যাকৰণখনৰ প্ৰাচীন গ্ৰন্থত উল্লেখ কৰা হৈছে । গ্ৰন্থখন দুৰ্লভ আছিল আৰু তিব্বতীয়সংস্কৰণৰ পৰাহে পুনৰুদ্ধাৰ কৰা হৈছে ।

চন্দ্রগোমিনৰ স্থিতিকাল এতিয়াও স্থিৰ হোৱা নাই । তথাপিও আন্তঃ আৰু বহিঃ সাক্ষ্যৰ পৰা এই ব্যাকৰণখনিৰ ৰচনা কাল ৪৩০ খৃষ্টাব্দ বুলি অনুমান কৰা হয়।

চান্দ্রব্যাকৰণত ছটা অধ্যায় আছে । প্ৰত্যেকটো অধ্যায়ত ছটাকৈ পাদ আছে । বিষয়বস্তুৰ ক্ষেএতো চান্দ্রব্যাকৰণৰ পাণিনিব্যাকৰণৰ সৈতে সাদৃশ্য দেখিবলৈ পোৱা যায় । লঘুতা স্পষ্টতা আৰু সম্পূৰ্ণতা এই ব্যাকৰণৰ লক্ষণ । চান্দ্র ব্যাকৰণত স্বৰ আৰু বৈদিক নিয়মসমূহ নিৰূপণ কৰা হোৱা নাই । কোনো কোনোৰ মতে চন্দ্রগোমিন বৌদ্ধ ধৰ্মাৱলম্বী হোৱাৰ বাবে বৈদিক প্ৰকৰণ আলোচিত হোৱা নাই বুলি মত প্ৰকাশ কৰে ।

ব্যাকৰণজনিত সূত্রসমূহৰ ওপৰত চন্দ্রগোমিনৰেই টীকা পোৱা যায় । কিছুমানৰ মতে কিন্তু এই টীকা ধৰ্মদাসৰ বুলি মত প্ৰকাশ কৰে । বৌদ্ধধৰ্মপতনৰ লগে লগে এই ব্যাকৰণৰ প্ৰচলনো কমি আহে । তিব্বতত এতিয়াও এই ব্যাকৰণৰ বহুল প্ৰচলন আছে ।

জৈনেন্দ্রব্যাকৰণ- জৈনেন্দ্রব্যাকৰণ দেৱনন্দীৰ দ্বাৰা বিৰচিত । দেৱনন্দীত জিনেন্দ্র নামেৰেও জনা যায় । অন্য এটা নাম হল পূজ্যপাদ । ব্যাকৰণ খনিত পাঁচটা অধ্যায় থকা বাবে ইয়াৰ অন্য নাম পঞ্চাধ্যায়ী ।

জৈনেন্দ্র ব্যাকৰণ চান্দ্রব্যাকৰণৰ সমকালীন । ব্যাকৰণখনিৰ বৃহৎ আৰু লঘুভেদে দুটা সংস্কৰণ পোৱা যায়। সাতহেজাৰতকৈও অধিক সূত্রবিশিষ্ট বৃহৎপাঠ দাক্ষিণাত্যত প্ৰসিদ্ধ আৰু লঘুপাঠত ৩০৩৬টা সূত্র আছে।

পাণিনি ব্যাকৰণৰ আৰ্হিতেই জৈনেন্দ্রব্যাকৰণ ৰচিত হৈছিল। পাণিনিৰ প্রত্যাহাৰসমূহো এই ব্যাকৰণত উপলব্ধ । কেৱল শিৱসূত্র আৰু বৈদিক প্ৰকৰণৰ উল্লেখ নাই ।

ব্যাকৰণখনিৰ বহুতো টীকা আৰু ব্যাখ্যা গ্ৰন্থ আছিল। বৰ্তমান সকলো উপলব্ধ নহয়। ব্যাখ্যাকৰ্তা সকলৰ ভিতৰত দেৱনন্দী , অভয়নন্দী, প্রজাচন্দ্র , মহাচন্দ্র আদিয়েই প্রধান । শ্রুকীৰ্তিয়ে জৈনন্দ্রব্যাকৰণৰ ওপৰত 'পঞ্চবস্তু' নামৰ প্রক্রিয়া গ্ৰন্থও লিখিছিল।

সাৰস্বত ব্যাকৰণ- পৰম্পৰাগত ভাৱে অনুভূতিস্বৰূপাচার্য্যকেই সাৰস্বত ব্যাকৰণৰ ৰচয়িতা হিচাপে জনা যায়। কিন্তু কোনো কোনো স্থানত সূত্রকাৰ হিচাপে নৰেন্দ্রনগৰাচার্য্যৰ নামো উল্লিখিত হৈছে। এই ব্যাকৰণখনিৰ সময় এয়োদশ শতিকা হিচাপে ধাৰ্য্য কৰা হৈছে।

ব্যাকৰণখনিৰ বৈশিষ্ট্য হৈছে সংক্ষিপ্ততা। সাতশ সূত্রত সমস্ত বিষয় সামৰি লোৱা হৈছে । অত্যন্ত সৰল স্বৰ আৰু বৈদিক প্রক্রিয়া ব্যাকৰণখনিত আলোচিত হোৱা নাই ।

ব্যাকৰণ খনিৰ ব্যাখ্যাকৰ্তা সকলৰ ভিতৰত ক্ষেমেন্দ্র, ধনেশ্বৰ , অমৃতভাৰতী , পুঞ্জৰাজ, চন্দ্রকীৰ্তিসূৰি , ৰঘুনাথ, মণ্ডন , ৰামভট্ট ইত্যাদি প্রধান ।

ব্যাকৰণখনিৰ ৰূপান্তৰিত সংস্কৰণো পোৱা যায়। তৰ্কতিলক ভট্টাচার্য্যদেৱে ব্যাকৰণখনি ৰূপান্তৰিতৰূপত ব্যাখ্যা কৰিছে । ৰামাচার্য্যই সিদ্ধান্তচন্দ্রিকা ৰূপত ব্যাকৰণখনি ৰূপান্তৰিত কৰিছে । সিদ্ধান্তচন্দ্রিকাৰো বহু ব্যাখ্যা পোৱা যায় ।

মুগ্ধবোধ ব্যাকৰণ- দ্বাদশ শতিকাত বোপদেৱে মুগ্ধবোধ ব্যাকৰণ ৰচনা কৰিছিল। বোপদেৱৰ- পিতৃৰ নাম কেশৱ, পিতামহৰ নাম মহাদেৱ আৰু গুৰুৰ নাম ধনেশ্বৰ আছিল।

বোপদেৱৰ দেৱগিৰিৰ যাদৱৰজা মহাদেৱ আৰু ৰামদেৱৰ সচিব হেমাদ্রীযে পৃষ্ঠপোষক আছিল। বোপদেৱৰ পূর্বপুৰষসকল বৈদ্যবৃত্তিৰ সৈতে জড়িত আছিল।

মুগ্ধবোধ ব্যাকৰণখনিত দহটা অধ্যায় আছে । প্রত্যেক অধ্যায়ৰ চাৰিটাকৈ পাদত মুঠ ১১৮৫ টা সূত্র আছে । বোপদেৱে সূত্রসমূহ অত্যন্ত সৰলতাৰে উপস্থাপন কৰিছিল । সূত্রসমূহৰ ব্যাখ্যাত হৰি, হৰ, ৰাম আদিৰ নামেৰে উদাহৰণ দিছে। বোপদেৱে সূত্রসমূহ সংক্ষিপ্ত কৰিবলৈ গৈ কেতিয়াবা ক্লিষ্ট কৰিছে । তথাপিও অসংখ্য টীকাৰে এই ব্যাকৰণৰ বংগদেশত বহুল প্রচলন আছে ।

ব্যাকৰণখনিৰ ওপৰত বোপদেৱৰ স্বকীয় টীকা আছে । ইয়াৰ উপৰিও অন্য ব্যাখ্যা গ্রন্থও আছে । তাৰ ভিতৰত গংগাধৰৰ সেতু সংগ্রহ বল্লভবিদ্যাবাগীশৰ বালবোধিনী , নন্দ কিশোৰৰ ব্যাখ্যা, দূর্গা দাসৰ সুবোধ টীকা প্রধান । ৰামতকীবাগীশে ব্যাকৰণখনিৰ পৰিবর্দ্ধন আৰু সংক্ষিপ্তকৰণো কৰিছিল।

⏱৪.৯ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- अपाणिनीयव्याकरणसम्प्रदायविषये ज्ञातवन्तः ।
- कातन्त्रव्याकरणविषये ज्ञातवन्तः ।
- चान्द्रव्याकरणस्य विषयवस्तुसन्दर्भे परिचयं प्राप्तवन्तः ।
- जैनेन्द्राकरणस्य मुख्यविषयं ज्ञातवन्तः ।
- सारस्वतव्याकरणस्य वैशिष्ट्याणि ज्ञातवन्तः ।
- मुग्धबोधव्याकरणस्य विषयेऽपि ज्ञातवन्तः ।

ৎ৪.১০ ज्ञानाधिक्यम्

१. मीमांसक युधिष्ठिर (१६८४), संस्कृत व्याकरण शास्त्र की कनिधस, रामवाल कपूर ट्रस्ट प्रेस, हरयाणा ।

२. Belvalkar, 3.K, (1915) systems of Sanskrit Grammar, Poona, University of Bombay.

३. सिंह फतह, (१६६७) चान्द्रव्याकरणम्। जोधपुर, राजस्थान प्राच्यविद्या प्रतिष्ठान।

४. Satyavrat, Cultural Heritage of India (2003), Kolkata, Ramkrishna Mission Institute of Indian culture.

✓४.११ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : शर्ववर्मा।

प्रश्नः २ : उत्तरम् : कलापकः।

प्रश्नः ३ : उत्तरम् : चत्वारि।

प्रश्नः ४ : उत्तरम् : षट् अध्यायाः।

प्रश्नः ५ : उत्तरम् : चन्द्रगोमिन्।

प्रश्नः ६ : उत्तरम् : लघुत्वम्।

प्रश्नः ७ : उत्तरम् : द्वौ पाठौ।

प्रश्नः ८ : उत्तरम् : अभयनन्दिः।

प्रश्नः ९ : उत्तरम् : पञ्चाध्यायी।

प्रश्नः १० : उत्तरम् : सप्तशतम्।

प्रश्नः ११ : उत्तरम् : क्षेमेन्द्रः।

प्रश्नः १२ : उत्तरम् : संक्षिप्तता।

प्रश्नः १३ : उत्तरम् : दशाध्यायाः।

प्रश्नः १४ : उत्तरम् : दूर्गादासस्य 'सुबोधटीका'।

प्रश्नः १५ : उत्तरम् : केशवः।

⍰४.१२. अभ्यासप्रश्नाः

(क) **वस्तुधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

प्रश्नः १ : कातन्त्रव्याकरणस्य नामकरणविषये लिखन्तु।

प्रश्नः २ : चान्द्रव्याकरणस्य स्थितिकालविषये संक्षेपेण लिखन्तु।

(ख) **संक्षेपप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

प्रश्नः १ : जैनेन्द्रव्याकरणस्य रचयिताया: व्याख्यानस्य च विषये लिखन्तु।

प्रश्नः २ : चान्द्रव्याकरणस्य वैशिष्ट्यानि लिखन्तु।

(ग) **रचनाधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

प्रश्नः १ : सारस्वतव्याकरणविषये सविस्तरं लिखन्तु।

प्रश्नः २ : मुग्धबोधव्याकरणस्य परिचयं लिखन्तु।

*****

अध्यायः ५ : संज्ञाप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

अध्यायस्य संरचना

५.१ उद्देश्यम्

५.२ परिचयः

५.३ माहेश्वरसूत्राणि शिवसूत्राणि वा

५.४ प्रत्याहारगठनप्रक्रिया

५.५ पाणिनिव्याकरणे प्रयुकाः प्रत्याहाराः

५.६ प्रत्याहारस्य भूमिका

५.७ अध्यायात् किमवगतम्

५.८ ज्ञानाधिक्यम्

५.९ अग्रगत्याः निरूपणम्

५.१० अभ्यासप्रश्नाः

५.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनात्परं भवन्तः -

- पाणिनिव्याकरणे प्रयुक्तानां माहेश्वर-सूत्रैः सह परिचितं भवन्ति ।
- किमर्थम् एतानि सूत्राणि शिवसूत्रम् अक्षरसमाम्नानम् इति उच्यते तस्मिन् विषये ज्ञातुं शक्नुवन्ति ।
- प्रत्याहारगठनप्रक्रियां ज्ञातुं शक्नुवन्ति ।
- पाणिनिव्याकरणे प्रयुक्तप्रत्याहाराणां विषये ज्ञातुं शक्नुवन्ति ।

५.२: परिचयः

संस्कृतव्याकरणस्य इतिहाससम्पर्के भवन्तः पूर्वमेव जानन्ति । संस्कृतव्याकरणक्षेत्रे मुख्यसम्प्रदायद्वयं पाणिनीयं अपाणिनीयं च । पाणिनिकृते अष्टाध्यायीग्रन्थे प्रायः चतुर्सहस्राणि सूत्राणि प्राप्यन्ते । एतानि सूत्राणि आधारीकृत्य कात्यायणेन वार्तिकं रचितम्, तथा च पतञ्जलिना महाभाष्यम् विरचितम् । एवं पाणिनिव्याकरणसम्प्रदायस्य मुख्यक्षेत्रं निर्मितम् । पश्चात् विविधव्याकरणग्रन्थानां माध्यमेन क्षेत्रोऽयं विस्तृतं जातम् । अद्य पाणिनिसमुदाये पाणिनिकृतानि सूत्राणि, कात्यायनेन कृतं वार्तिकं तथा च पतञ्जलिकृतं महाभाष्यम् अन्तर्भूकाः सन्ति । अन्ये ये तु अष्टाध्यायी-वार्तिक-महाभाष्यप्रभृतिनां ग्रन्थानां प्रामाण्यतां न स्वीकुर्वन्ति ते अपाणिनियसम्प्रदाये अन्तर्भूक्ताः सन्ति । यथा शववर्मणस्य कल्पव्याकरणम्

अपाणिनीयसमुदायस्य व्याकरणम् । पाणिनिसमुदाये माहेश्वरसूत्रं शिवसूत्रं वा 'अक्षरसमाम्नायः' इति कथ्यते । अयं अक्षरसमाम्नाय एव पाणिनिसमुदाये प्रयुक्तस्य प्रत्याहारस्य मूलरूपेण स्वीकृतम् । एते प्रत्याहाराः वस्तुतः अष्टाध्यायीव्याकरणे विद्यमानां सूत्राणां प्राणाः । प्रत्याहारस्य सम्यक् ज्ञानं विना पाणिनिसूत्राणां यथार्थाः ज्ञातुं न शक्यन्ते । अतः शिक्षार्थिनां कृते प्रत्याहारस्य ज्ञानम् अतीव महत्त्वपूर्णं वर्तते ।

५.३: माहेश्वरसूत्राणि शिवसूत्राणि वा

पाणिनि महेश्वरात् महादेवात् वा अक्षराणि प्राप्य सम्पूर्णम् अष्टाध्यायीव्याकरणं रचितवान् । तस्य वर्णनं श्लोकरूपेण प्राप्यते यथा-

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥

पाणिनिव्याकरणे व्यवहृतः अक्षरसमुदायः यथा -

१) अ इ उ ण्

२) ऋ ऌ क्

३) ए ओ ङ्

४) ऐ औ च्

५) ह य व र ट्

६) ल ण्

७) अ म ङ ण न म्

८) झ भ य्

९) घ ढ ध ष्

१०) ज ब ग ड द श्

११) ख फ छ ठ थ च ट त व्

१२) क प य्

१३) श ष स र्

१४) ह ल्

एतानि शिवसूत्राणि सामुहिकरूपेण शिवसूत्राणि अथवा माहेश्वसूत्राणि इति कथ्यन्ते । परम्परानुसारं ताण्डवनृत्यात् परं महादेवस्य नवपञ्चवारडम्बरूवादनात् (कुलं चतुर्दशवादनात्) एव शिवसूत्राणां उत्पत्तिः जायते । नन्दिकेश्वरेण उक्तमस्ति यथा -

नृत्यावसाने नटराजराजो ननादढक्कां नवपञ्चवारम् ।

उर्द्धतुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

शिवसूत्रं माहेश्वरसूत्रं वा प्रत्याहारसूत्रमिति कथ्यते । यतो हि पाणिनीयव्याकरणे व्यवहृताः प्रत्याहाराः माहेश्वरसूत्रैः संगठिताः । एतेषां सूत्राणां सामुहिकरूपेण वर्णसमाम्नायः अक्षरसमाम्नायः वा इति उच्यते । माहेश्वरसूत्राणाम् अन्त्यवर्णाः हलचिह्नयुक्ताः । वर्तमानसमये "वर्णमाला" इति अनेन यः बोध्यते, पाणिनिव्याकरणे शिवसूत्रेण एतदेव सूचयते । वस्तुतः शिवसूत्रं माहेश्वरसूत्रं वा पाणिनिव्याकरणस्य प्राणस्वरूपम् ।

५.४: प्रत्याहारसंगठनप्रक्रिया

प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अस्मिन्निति प्रत्याहारः- अनेन संज्ञानुसारेण प्रत्याहारैः संक्षिप्तरूपेण वर्णज्ञानं दीयते इति सूचितमस्ति । अतः प्रत्याहाराः शिवसूत्रे प्रयुक्ताः संक्षिप्तकरणोपायाः । चतुर्दशशिवसूत्रेषु प्रत्येकसूत्रस्य अन्ते यः अन्त्यव्यञ्जनवर्णः अवस्थितः (ण्, क्, ङ् इत्यादयः) तस्य व्यञ्जनवर्णस्य इत्संज्ञा भूत्वा इत्वर्णः इति उच्यते । 'इत्' इति शब्दस्य व्याकरणार्थः लोपः । शिवसूत्रेषु अन्त्यवर्णरूपेण स्थितमानानां हलन्तवर्णानां लोपः भवति । उदाहरणं यथा - 'अ इ उ ण्' इति प्रत्याहारसूत्रे केवलम् अवर्णस्य, इवर्णस्य, उवर्णस्य च ग्रहणं भवन्ति, न तु 'ण्' इति हलन्तवर्णस्य । अस्मिन् सन्दर्भे भट्टोजिदीक्षितेन उक्तमस्ति - "एषाम् अन्त्या इतः " इति । पाणिनिना अष्टाध्यायीग्रन्थे प्रत्याहारसंज्ञा दीयते यथा - " आदिरन्त्येन सहेता" (१/१/७१) इति । यस्य वर्णस्य पूर्वे अन्यवर्णाः न सन्ति तदेव आदिवर्णः, तथा च यस्य वर्णस्य पृष्ठे अन्यवर्णाः न सन्ति स अन्त्यवर्णः । 'इत्' इति पदस्य तृतीया-एकवचने रूपं भवति 'इता' इति । अतएव सूत्रस्य अस्य अर्थोऽस्ति - **अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्** । अर्थात् प्रत्याहारसूत्रे वर्तमानं एकवर्णम् आदिवर्णरूपेण गृहीत्वा तेन सह इत्संज्ञकं हलन्तवर्णम् एकत्रितं कृत्वा एव प्रत्याहारनिर्माणं भवति । यथा - अच्, हल् इत्यादयः । अच् इति प्रत्याहारे अ इति आदिवर्णः, च् इति इत्संज्ञकः हलन्तव्यञ्जनः अन्तिमवर्णः । अच् इति प्रत्याहारे अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ इति एते वर्णाः समायोजिताः। हलन्तव्यञ्जनवर्णानाम् अर्थात ण्, क्, ङ्, च् - इति एतेषां वर्णानां इत्संज्ञा भवति, अर्थात् एते वर्णाः लोपाः जाताः । तदुक्तं यथा - **'प्रत्याहारेषु इतां न ग्रहणम् ।'**

पाणिनिव्याकरणे 'अच्' इति प्रत्याहारेण- स्वरवर्णाः, 'हल्' इति प्रत्याहरेण व्यञ्जनवर्णाः निर्दिष्टाः ।

अग्रगत्याः निरीक्षणम्

प्रश्नः - १ - शिवसूत्राणि माहेश्वसूत्राणि वा कानि सन्ति ?

.....

प्रश्नः - २ - माहेश्वसूत्राणि किमर्थं शिवसूत्राणि माहेश्वसूत्राणि वा कथ्यन्ते ?

.....

प्रश्नः - ३ - 'वर्णसमाम्नाय' 'अक्षरसमाम्नाय' वा इति पदेन कानि निर्दिष्टानि ?

.....

प्रश्नः - ४ - माहेश्वरसूत्राणां अन्त्यवर्णाः कीदृशाः भवन्ति ?

.....

५.५. पाणिनिव्याकरणे प्रयुकाः प्रत्याहाराः

"आदिरन्त्येन सहेता" इति सूत्रस्य व्यवहारेण प्रत्याहारनिर्माणं भवति । अनेन सूत्रानुसारेण शिवसूत्रे वर्तमानम् एकवर्णम् आदिवर्णरूपेण गृहीत्वा इत्सञ्ज्ञकेन हलन्तवर्णेन सह एकः प्रत्याहारनिर्माणं भवति । एतयाः व्याकरणप्रक्रियायाः अनुसरणं कृत्वा पाणिनेः अष्टाध्यायीग्रन्थे एकाधिकानि प्रत्याहारसूत्राणि समायोजितानि । पाणिनेः ४१ प्रकारकाः प्रत्याहाराः निर्दिष्टाः । परन्तु वार्त्तिके प्रयुक्तः 'चम्' इति प्रत्याहारः, उनादिसूत्रे प्रयुक्तः 'जम्' इति प्रत्याहारः च मिलित्वा कुलं ४३ प्रकारकाः प्रत्याहाराः प्रयुक्ताः भवन्ति । ङकारेण, ञकारेण, णकारेण, वकारेण, टकारेण च प्रत्येकेन एकं प्रत्याहारं गठितम् । षकारेण प्रत्याहारद्वयं, ककारेण णकारेण, मकारेण च प्रत्येकेन प्रत्याहारत्रयं, चकारेण चत्वारि, यकारेण चत्वारि, रकारेण पञ्चप्रकारं, शकारेण पञ्चप्रकारं, लकारेण षट्प्रकारम् । ते यथा -

१) ङ् कारनिष्पन्नः प्रत्याहारः एङ् / ङ्

२) ञ् कारनिष्पन्नः प्रत्याहारः यञ् / ञ्

३) ण् कारनिष्पन्नः प्रत्याहारः अण् / ण्

४) व् कारनिष्पन्नः प्रत्याहारः छव् / व्

५)ट् कारनिष्पन्नः प्रत्याहारः अट् / ट्

६) ष् कारनिष्पन्नः प्रत्याहारः झष् / ष्

७) ष् कारनिष्पन्नः प्रत्याहारः भष् / ष्

८) क् कारनिष्पन्नः प्रत्याहारः अक् / क्

९)क् कारनिष्पन्नः प्रत्याहारः इक् / क्

१०) क् कारनिष्पन्नः प्रत्याहारः उक् / क्

११) ण् कारनिष्पन्नः प्रत्याहारः अण् / ण्

१२) ण् कारनिष्पन्नः प्रत्याहारः इण् / ण्

१३) ण् कारनिष्पन्नः प्रत्याहारः यण् / ण्

१४) म् कारनिष्पन्नः प्रत्याहारः अम् / म्

१५) म् कारनिष्पन्नः प्रत्याहारः यम् / म्

१६) म् कारनिष्पन्नः प्रत्याहारः ङम् / म्

१७) च् कारनिष्पन्नः प्रत्याहारः अच् / च्

१८) च् कारनिष्पन्नः प्रत्याहारः इच् / च्

१९) च् कारनिष्पन्नः प्रत्याहारः एच् / च्

२०) च् कारनिष्पन्नः प्रत्याहारः ऐच् / च्

२१) य् कारनिष्पन्नः प्रत्याहारः यय् / यः

२२) य् कारनिष्पन्नः प्रत्याहारः मय् / य्

२३) य् कारनिष्पन्नः प्रत्याहारः झय् / य्

२४) य् कारनिष्पन्नः प्रत्याहारः खय् / य्

२५) र् कारनिष्पन्नः प्रत्याहारः यर् / र्

२६) र् कारनिष्पन्नः प्रत्याहारः झर् / र्

२७) र् कारनिष्पन्नः प्रत्याहारः खर् / र्

२८) र् कारनिष्पन्नः प्रत्याहारः चर् / र्

२९) र् कारनिष्पन्नः प्रत्याहारः शर् / र्

३०) श् कारनिष्पन्नः प्रत्याहारः अश् / श्

३१) श् कारनिष्पन्नः प्रत्याहारः हश् / श्

३२) श् कारनिष्पन्नः प्रत्याहारः वश् / श्

३३) श् कारनिष्पन्नः प्रत्याहारः झश् / श्

३४) श् कारनिष्पन्नः प्रत्याहारः वश् / श्

३५) ल् कारनिष्पन्नः प्रत्याहारः अल् / ल्

३६) ल् कारनिष्पन्नः प्रत्याहारः हल् / ल्

३७) ल् कारनिष्पन्नः प्रत्याहारः वल् / ल्

३८) ल् कारनिष्पन्नः प्रत्याहारः रल् / ल्

३९) ल् कारनिष्पन्नः प्रत्याहारः झल् / ल्

४०) ल् कारनिष्पन्नः प्रत्याहारः शल् / ल्

४१) वार्तिके व्यवहृतः प्रत्याहारः ञम्

४२) अनादिसूत्रे व्यवहृतः प्रत्याहारः ञम्

४३) अतिरिक्तप्रत्याहारः र

द्रष्टव्यं यत् ‘ण्’ कारेण निष्पन्नः यः 'अण्' इति प्रत्याहारः तत्र समग्रे अष्टाध्यायीग्रन्थे अ इ उ ण् - इति शिवसूत्रस्य पूर्ववर्तीणकारः गृहीतः, किन्तु "अणुदित्सवर्णस्य चाऽप्रत्ययः(१/१/६९) - इति सूत्रे व्यवहृतः 'अण्' इति प्रत्याहारे ‘लण्’ इति शिवसूत्रे परवर्तीणकारः गृहीतः भवति।

५.६ प्रत्याहारस्य भुमिकाः

पाणिनिसमुदाये प्रत्याहारस्य भुमिका अतीव महत्वपूर्णा । पाणिनिव्याकरणे प्रत्याहाराणां संयोगैः विविधाः व्याकरणप्रक्रियाः सञ्जाताः । अत एव प्रत्याहाराः पाणिनिसूत्राणां मूलं बीजं वा इति मन्यते ।

प्रत्याहारस्य सर्वप्रथमः भूमिका अस्ति संक्षिप्तकरणम् । प्रत्याहारेण पाणिनिकृतसूत्रस्य संक्षिप्तकरणं भवति । उदाहरणं यथा- 'बृद्धिरादैच्' इति । अस्मिन् सूत्रे' ऐच्' इति प्रत्याहारः । 'ऐच्' इति प्रत्याहारेण अत्र ऐ, औ इति वर्णद्वयं निर्दिष्टम् (च इति इत्संज्ञकस्य व्यञ्जनवर्णस्य लोपः भवति) । अत्र 'ऐ' वर्णः द्विमात्रायुक्तः तथा च 'औ' इति वर्णोऽपि द्विमात्रायुकः । ऐ, औ च एतौ अक्षरौ पृथक् पृथक् रूपेण मात्राचतुर्विधं निर्दिष्टम् । अपरं तु 'ऐच्' इति प्रत्याहारे अस्ति द्विमात्रा अर्धमात्रा च । वस्तुतः दीर्घवर्णरूपेण सान्ध्यक्षररूपेण वा 'ऐ' इति वर्णः द्विमात्रायुक्तः । तथा च 'व्यञ्जनं चार्धमात्रकम्'' इति नियमानुसारेण 'च' इति व्यञ्जनवर्णः अर्धमात्रायुक्तः । एवं केवलं एकस्मिन् एव सूत्रे प्रत्याहारप्रयोगेन अर्धैकमात्रालाघवम् (१/१/२) भवति । प्रत्याहारप्रयोगेन अष्टाध्यायीग्रन्थे मात्रालाघवं भवति । संस्कृतव्याकरणे मात्रालाघवम् अतीव गौरवविषयम् अस्ति । तदुक्तम् - "अर्धमात्रालाघवेन पुत्रोत्सवमिव मन्यन्ते व्यैयाकरणाः ॥" इति ।

प्रत्याहारव्यवहाराणि सूत्राणि यथा -

१) एङ् प्रत्याहारे व्यवहृतं सूत्रम् = एङि पररूपम् (६/१/९४)

२) यञ् प्रत्याहारे व्यवहृतं सूत्रम् = यञश्च (४/१/१६)

३) अण् प्रत्याहारे व्यवहृतं सूत्रम् = केऽनः (७/४/१३)

४) छव् प्रत्याहारे व्यवहृतं सूत्रम् = नश्छव्यप्रशान् ८/३/७)

५) अट् प्रत्याहारे व्यवहृतं सूत्रम् = अट्कुप्वाङ्नुम्व्यवायेऽपि (८/४/१)

६) झष् प्रत्याहारे व्यवहृतं सूत्रम् = झषस्तथोर्धोऽधः (८/२/४०)

७) भष् प्रत्याहारे व्यवहृतं सूत्रम् = एकाचो वशो भष् झषन्तस्यस्ध्वोः (८/२/३७)

८) अक् प्रत्याहारे व्यवहृतं सूत्रम् = ऋत्यक : (६/१/१२८)

९) इक् प्रत्याहारे व्यवहृतं सूत्रम् = इको यणचि (६/१/७७)

१०) उक्प्रत्याहारे व्यवहृतं सूत्रम् = उगिदचां सर्वनामस्थानेऽधातो (७/१/७)

११) अण् प्रत्याहारे व्यवहृतं सूत्रम् = अणुदित्सवर्णस्य चाऽप्रत्ययः (१/१/६९)

१२) इण् प्रत्याहारे व्यवहृतं सूत्रम् = इनः षः (८/३/३९)

१३) यण् प्रत्याहारे व्यवहृतं सूत्रम् = इको यणचि

१४) अम् प्रत्याहारे व्यवहृतं सूत्रम् = पुमः खय्यम्परे (८/३)

१५) यम् प्रत्याहारे व्यवहृतं सूत्रम् = हलो यमां यमि लोप (८/४/६४)

१६) ङम् प्रत्याहारे व्यवहृतं सूत्रम् = ङमो ह्रस्वादचि ङमुण् नित्यः (८/३/३२)।

१७) अच् प्रत्याहारे व्यवहृतं सूत्रम् = अचोऽन्त्यादि टि (१/१/६४)

१८) इच् प्रत्याहारे व्यवहृतं सूत्रम् = इजादेश्च गुरुमतोऽनृच्छुः (३/१/३५)

१९) एच् प्रत्याहारे व्यवहृतं सूत्रम् = एचोऽयवायाव

२०) ऐच् प्रत्याहारे व्यवहृतं सूत्रम् = वृद्धिरादैच् (१/१/१)

२१) यय् प्रत्याहारे व्यवहृतं सूत्रम् = अनुस्वारस्य ययि परसवर्णः (८/४/५८)

२२) मय् प्रत्याहारे व्यवहृतं सूत्रम् = मय उञो वो वा (८/३/३३)

२३) झय् प्रत्याहारे व्यवहृतं सूत्रम् = झयो होऽन्यतरस्याम् (६/१/१८८)

२४) खय् प्रत्याहारे व्यवहृतं सूत्रम् = शरवपूर्वाः खयः (७/४/६१)

२५) यर् प्रत्याहारे व्यवहृतं सूत्रम् = यरोऽनुनासिकेऽनुनासिको वा (८/४/४५)

२६) झर् प्रत्याहारे व्यवहृतं सूत्रम् = झरो झरि सवर्णे (८/४/६५)

२७) खर् प्रत्याहारे व्यवहृतं सूत्रम् = खरवसानोरविसर्ज्जनीयः (८/३/१५)

२८) चर् प्रत्याहारे व्यवहृतं सूत्रम् = अभ्यासे चर् च (८/४/५४)

२९) शर् प्रत्याहारे व्यवहृतं सूत्रम् = ङणोः कुक् टुक् शरि (८/३/२८)

३०) अश् प्रत्याहारे व्यवहृतं सूत्रम् = भोभगोऽघोपूर्वस्ययोऽशि। (८/३/१७)

३१) हश् प्रत्याहारे व्यवहृतं सूत्रम् = हशि च (६/१/११४)

३२) वश् प्रत्याहारे व्यवहृतं सूत्रम् = नेभवशिकृति (७/२/८)

३३) जश् प्रत्याहारे व्यवहृतं सूत्रम् = झलां जशोऽन्ते (८/२/३९)

३४) झश् प्रत्याहारे व्यवहृतं सूत्रम् = झलां जश् झशि (८/४/५३)

३५) वश् प्रत्याहारे व्यवहृतं सूत्रम् = एकाशो वशो भष् (८/२/३७)

३६) अल् प्रत्याहारे व्यवहृतं सूत्रम् = अलोऽन्तस्य (१/१/५२)

३७) हल् प्रत्याहारे व्यवहृतं सूत्रम् = हलः (६/४/२)

३८) वल् प्रत्याहारे व्यवहृतं सूत्रम् = आर्धधातुकस्य इट् वलादेः (७/२/३५)

३९) रल् प्रत्याहारे व्यवहृतं सूत्रम् = रलोव्युपधाद्धलादेः संश्च (१/२/२६)

४०) झल् प्रत्याहारे व्यवहृतं सूत्रम् = नश्चापदान्तस्य झलि (८/७/२४)

४१) शल् प्रत्याहारे व्यवहृतं सूत्रम् = शल इगुपधादनिटः क्सः (३/१/४५)

अग्रगत्याः निरीक्षणम्

प्रश्नः – ५ - पाणिनिव्याकरणे प्रत्याहारगठनसूत्रं किम्?

……

प्रश्नः – ६ - अष्टाध्यायीग्रन्थे प्रयुक्तः अण्प्रत्याहारे व्यवहृतं सूत्रं लिखतु।

……

प्रश्नः – ७ - यकारनिष्पन्नाः पाणिनिप्रत्याहारः के ?

……

प्रश्नः – ८ - प्रत्याहारप्रयोगस्य भूमिका का ?

……

ज्ञातव्यम्

हलन्त्यम् (१/२/२७)

उपदेशेऽन्त्यं हलित्स्यात् । अर्थात् उपदेशे अन्त्यहलवर्णस्य अर्थात् व्यञ्जनवर्णस्य इत्संज्ञा भवति । उपदेश आद्योच्चारणम् । अर्थात् पाणिनि-कात्यायन-पतञ्जलि-प्रभृतिनां पण्डितानां मुखनिसृतः प्रथमोच्चारणः प्रथमः पाठः वा उपदेशः इति कथ्यते । उपदेश इति शब्देन भू-आदि धातवः, अइउणादि सूत्राणि, उणादिसूत्राणि, वार्तिकं, लिङ्गानुशासनं, आगमः, प्रत्ययाः, आदेशः च इति बोध्यन्ते । तदुक्तमस्ति -

धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।

आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥

उकालोऽज्ह्रस्वदीर्घप्लुतः (१/२/२७)

उश्च ऊश्च उ३श्च वः, वाँ काल इव कालो यस्य सोऽच् क्रमाद्, ह्रस्व-दीर्घ-प्लुतसंज्ञः स्यात् ।

उच्चैरुदात्तः – (१/२/२९)

उदात्तसंज्ञाविधायकं संज्ञासूत्रमिदम् । ताल्वादिषु स्थानेषु उर्ध्वभागेषु निष्पन्नः अच् उदात्तः।

नीचैरनुदात्तः –

अनुदात्तसंज्ञाविधायकं संज्ञासूत्रमिदम् । ताल्वादिषु स्थानेषु अधोभागे निष्पन्नोऽच् अनुदात्तः ।

समाहारः स्वरितः -

स्वरितसंज्ञाविधायकं संज्ञासूत्रमिदम् । उदात्तत्वानुदात्तत्वयोः एकत्र समाहारो यत् सोऽच् स्वरितः ॥

तुल्यास्यप्रयत्नं सवर्णम् -

ताल्वादिस्थानम् आभ्यन्तरप्रयत्नः च इति एतत् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ।

अथ स्थानानि

अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङ्णनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य ।

⏱५.७ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- शिवसूत्रस्य अथवा माहेश्वरसूत्रस्य उत्पत्तिविषये ज्ञातवन्तः ।
- पाणिनिः महादेवस्य प्रसादेन प्रत्याहारसूत्राणि लब्धा अष्टाध्यायीग्रन्थः रचितवान् इति विषयेऽपि ज्ञातवन्तः ।
- चतुर्दशप्रत्याहारसूत्रैः संस्कृतवर्णमाला कथं निर्मिता इति विषये ज्ञातवन्तः ।
- प्रत्याहारनिर्माणविषये ज्ञातवन्तः।
- प्रत्याहाराणां प्रयोगविषये अपि च उपयोगविषयेऽपि ज्ञातवन्तः ।

९५.८ ज्ञानाधिक्यम्

१.लघुसिद्धान्तकौमुदी, गोविन्द प्रसाद शर्मा (व्याकरण चौखम्बा सुरभारती प्रकाशन, वारणसी, 2021
२.लघुसिद्धान्तकौमुदी, हरेकान्त मिश्र, (सम्पा), भारतीय विद्या प्रकाशन, दिल्ली, 2017
३.अष्टाध्यायी, नरेश झा (व्याख्या), चौखम्बा सुरभारती प्रकाशन, वारणसी,

✓५.९ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् : चतुर्दशाप्रकाराणि महेश्वरसूत्राणि सन्ति । अ इ उ ण् इत्यादयः ।

प्रश्नः २ : उत्तरम् : एतानि सूत्राणि महादेवस्य आशीर्वादात् प्राप्यन्ते इति कारणात् एतानि सूत्राणि माहेश्वरसूत्राणि इति उच्यन्ते ।

प्रश्नः ३ : उत्तरम् : 'वर्णसमाम्नायः" "अक्षरसमाम्नायः' वा इति पदेन माहेश्वरसूत्राणि निर्दिष्टानि ।

प्रश्नः ४ : उत्तरम् : माहेश्वसूत्राणां अन्त्यवर्णाः इत्संज्ञकाः भवन्ति ।

प्रश्नः ५ : उत्तरम् आदिरन्त्येन सहेताः।

प्रश्नः ६ : उत्तरम् केऽनः

प्रश्नः ७ : उत्तरम् यय्, मय्, झय्, खय्:।

प्रश्नः ८ : उत्तरम् संक्षिप्तकरणम्।

⑦५.१० अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

प्रश्नः - १ : शिवसूत्रेण स्वरवर्णसूचकः प्रत्याहारः किमर्थं गठितमस्ति ?

प्रश्नः - २ : शिवसूत्राणि माहेश्वरसूत्राणि वा क्रमानुसारेण लिखन्तु।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया

प्रश्नः - १ : हलन्त्यम्।

प्रश्नः - २ : उच्चारणस्थानानि।

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

प्रश्नः - १ : प्रत्याहारपदस्य व्याख्यां कृत्वा प्रत्याहारागठनप्रक्रियाविषये लिखन्तु।

*****

अध्यायः ६ : अजन्तपुंलिङ्गप्रकरणम् (संख्यावाचकशब्दः/पुरणवाचकशब्दः)

अध्यायस्य संरचना

६.१ उद्देश्यम्

६.२ परिचयः

६.३ संस्कृतपदानां लिङ्गनिर्णयः

६.४ अजन्तपुंलिङ्गशब्दा:

६.४.१अजन्तशब्दस्यार्थ :

६.४.२ अजन्तपुंलिङ्गशब्दानामुदाहरणानि

६.५ सर्वनामशब्दा:

६.५.१ परिचयः

६.५.२ सर्वनामशब्दानाम् उदाहरणानि

६.६ संख्यावाचकशब्दा:

६.६.१ परिचयः

६.६.२ संख्यावाचकशब्दानाम् उदाहरणानि

६.७ पूरणवाचकशब्दा:

६.७.१ परिचयः

६.७.२ पूरणवाचकशब्दानाम् उदाहरणानि

६.८ अध्यायात् किमवगतम्

६.९ ज्ञानाधिक्यम्

६.१० अग्रगत्याः निरूपणम्

६.११ अभ्यासप्रश्नाः

६.१. उद्देश्यानि:

अस्य अध्यायस्य अध्ययनेन भवान्-

- संस्कृतभाषायां प्रयुक्तानां शब्दरूपाणां निर्माणस्य प्रक्रियाविषये ज्ञास्यति।
- संस्कृतभाषायां प्रयुक्तानां शब्दानां वैशिष्ट्यं ज्ञास्यति।
- संस्कृतपदानां लिङ्गनिर्णयविषये ज्ञास्यति।
- 'अजन्त' इति शब्दस्य अर्थविषये ज्ञास्यति।
- अजन्तपुंलिङ्गशब्दानां वैशिष्टानि रूपाणि च ज्ञास्यति।

- संस्कृतभाषायां प्रयुक्तानां सर्वनामपदानां वैशिष्यानि रूपाणि च अवगच्छति।
- संस्कृतभाषायां प्रयुक्तानां संख्यावाचकशब्दानां वैशिष्टानि रूपाणि च ज्ञास्यति।
- संस्कृतभाषायां प्रयुक्तानां पूरणवाचकशब्दानां परिचयात्मकं ज्ञानं भविष्यति।

६.२ परिचयः

वाक्यम् एकं रचयितुं द्वयोः ततोधिकानां शब्दानां प्रयोजनं भवति। वाक्ये प्रयुक्ताः शब्दाः विभक्तियुक्ताः भवन्ति। प्रातिपदिकानां पश्चात् सप्तविभक्तयः युज्यन्ते। एताः विभक्तयः भवन्ति – प्रथमा (Nominative), द्वितीया (Accusative), तृतीया(Instrumental), चतुर्थी (Dative), पञ्चमी(Ablative); षष्ठी (Genitive) तथा सप्तमी (Locative) शब्दस्यान्ते या विभक्तिः संयोगो भवति। तेषां नाम सुप् विभक्तिः अथवा कारकविभक्तिः अथवा शब्दविभक्तिः कथ्यन्ते। एताभिः सुप्-विभक्तिभिः शब्दरूपाणां निर्माणः क्रियते। प्रत्येकस्यां विभक्त्यां एकः कारकः प्रयुज्यते। कर्तृवाच्ये कर्ताकारके प्रथमाविभक्तिः, कर्मकारके द्वितीयाविभक्तिः, करणकारके तृतीयाविभक्तिः, सम्प्रदानकारके चतुर्थीविभक्तिः, अपादानकारके पञ्चमीविभक्तिः, सम्बन्धकारके षष्ठी विभक्तिः अधिकरणकारके च सप्तमीविभक्तिः भवति। अतः एताः विभक्तयः कारकविभक्तय अपि कथ्यन्ते। भिन्नचिह्नयुक्तानां प्रत्येकविभक्तीनां त्रीणि वचनानि सन्ति – एकवचनम्, द्विवचनम् बहुवचनं च। एवं साकल्येन एकविंशतिः सुप्-विभक्तिः प्राप्यते।

ज्ञातव्यम्

• पाणिनि अष्टाध्यायीग्रन्थे पदस्य संज्ञा एवं वदति- सुप्तिङन्तं पदम्। अर्थात्, सुप्-विभक्तिः तिङ्विभक्ति: च इति विभक्तिद्वयस्य मेलनेन एकस्य पदस्य निर्माणं भवति।

• ये शब्दा: अर्थपूर्ण: किन्तु धातवः प्रत्ययाः वा अपि न भवन्ति ते एव प्रातिपदिकशब्दाः।

सुप्-विभक्ते: आकृति:

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सु(:)	औ	जस्
द्वितीया	अम्	औ	शस्
तृतीया	टाप्	भ्याम्	भिस्
चतुर्थी	ङे	भ्याम्	भ्यस्
पञ्चमी	ङसि	भ्याम्	भ्यस्
षष्ठी	ङस्	ओस्	आम्

सप्तमी ङि ओस् सुप्

प्रथमाविभक्ते: एकवचनस्य 'सु' इति अनेन सह सप्तमीविभक्ते : बहुवचनस्य 'सुप' इत्यस्य 'प्' वर्ण मिलित्वा 'सुप्' इत्यस्य निर्माणं भवति । एताभिः विभक्तिभि: निर्मितानि पदानि एव सुबन्तपदानि कथ्यन्ते । सुबन्तपदानां सम्बोधनं (vocative) नामकम् एकम् अपरं रूपं लभते । सम्बोधने प्रथमा विभक्ति: भवति । अतः अस्य रूपाणि प्रथमा विभक्तिवत् भवन्ति । शब्दानुसारं सम्बोधनस्य एकवचनस्य रूपस्य भिन्नता दृश्यते । व्यक्तिविशेषस्य अथवा वस्तुविशेषस्य सम्बोधनकाले अस्य सम्बोधनस्य प्रयोगो भवति ।

६.३. संस्कृतपदानां लिङ्गनिर्णय:

व्याकरणे पञ्चप्रकाराणि पदानि सन्ति। तानि च - विशेष्य-विशेषण-सर्वनाम-क्रिया-अव्ययपदानि। एतेषां पदानां त्रीणि लिङ्गानि सन्ति- पुंलिङ्गम् (Masculine Gender), स्त्रीलिङ्गम् (Feminine Gender) तथा च नपुंसकलिङ्गम् (Neuter Gender) । साधरणतया संस्कृतभाषायां प्रत्येकशब्दस्य लिङ्गः निर्धारितं भवति तथा एव च शब्दरूपाणि भवन्ति । । त्रयाणां लिङ्गांनाम् उदाहरणानि यथा-

पुंलिङ्गशब्दाः-

नर-देव-बालक-जन-काक-छात्र-सूर्य-चन्द्र-वानर-ऋषि-गिरि-पति-सुधी-सेनानी-साधु-भानु-पितृ-मातृ-रै-गो-नौ-इत्यादयः।

स्त्रीलिंगशब्दा:-

लता-कन्या-गंगा-भार्या-मति-कान्ति-उन्नति-प्रकृति-नदी-जननी-नारी-कुमारी-श्री-स्त्री-धेनु-तनु-वधू-प्रसू-भू-मातृ-दुहितृ-नौ-इत्यादयः।

नपुंसकलिंगशब्दा:-

फल-अन्न-गृह-पुष्प- वारि-अक्षि-दधि- मधु-अम्बु-वधु-इत्यादयः ।

संस्कृतभाषायां कदाचित् भिन्नानाम् अर्थ-प्रकृति-प्रत्यय-शब्दानां गठनानुसारं शब्दानां लिङ्गनिर्धारणं क्रियते । साधरणतया, पुरुषविशेषकं बोधयितुं व्यवहृताः पुलिङ्गशब्दाः, स्त्रीविशेषकं बोधयितुं व्यवहृताः शब्दाः स्त्रीलिङ्गशब्दाः तथा च वस्तुविशेषकं शब्दाः नपुंसका-लिङ्गशब्दाः । परन्तु केषुचित् क्षेत्रेषु एतेषां नियमानां व्यतिक्रमो दृश्यते। उदाहरणस्वरूपेण 'मित्र' इति शब्दस्य व्यवहारः। एषः शब्दः पुंलिङ्गनपुंसकलिङ्गयोः द्वयोः अर्थयोः भवति । यदा मित्रशब्दः सूर्यं बोधयति तदा पुंलिङ्गः, यदा सखायं बोधयति तदा नपुंसकलिङ्गः।

संस्कृतभाषायाम् एकः शब्दः येन वर्णेन समाप्यते तस्योपरि भित्त्वा स्वरान्तं व्यञ्जनान्तं वा निर्धारणं क्रियते। यस्य शब्दस्य अन्तिमवर्ण एकं स्वरं भवति सः स्वरान्तशब्दः तथा च यस्य व्यञ्जनं भवति स एव व्यञ्जनान्तशब्द:। यथा 'नर' इति शब्दस्य अन्तिमवर्णः 'अ' अस्ति, अत अयमेकः स्वरान्तशब्दः। एवं प्रकारेण: 'धनिन्' इति शब्दस्य अन्तिमवर्णः 'न' अत एष: व्यञ्जनान्तशब्द: । साधरणतया, संस्कृतभाषायाम् एकस्मिन् वाक्ये विशेष्यपदस्य या विभक्तिः,यत् लिङ्गं तथा च यत् वचनं तदेव विशेषणपदस्य भवति । यथा – सुन्दरः

पुरुषः, सुन्दरी महिला, सुन्दरं गृहम् । किन्तु केचन शब्दाः सन्ति ये स्वकीयलिङ्गं विशेष्यानुसारं न त्यजन्ति । यथा- अव्ययपदानां सर्वासु विभक्तिषु, सर्वेषु वचनेषु तथा च लिङ्गेषु रूपस्य कोऽपि परिवर्तनं न भवति। उदाहरणं यथा - 'राम अत्र अस्ति; सीता अत्र अस्ति; फलम् अत्र अस्ति । त्रिषु एव उदाहरणेषु 'अत्र' इति अव्ययस्य लिङ्गानुसारं परिवर्तनं न परिलक्ष्यते । संस्कृतव्याकरणस्य नियमानुसारम् अव्ययीभावसमासस्य समाहारद्वन्द्वसमासस्य च समासान्तपदानि सर्वदा नपुंसकलिंगे एकवचने भवन्ति ।

अग्रगतेः निरीक्षणम्

प्रश्नः १ : प्रातिपदिकानां पश्चात् कति प्रकाराणां विभक्तीनां प्रयोगो भवति ?

……..

प्रश्नः २ : सुबन्तपदस्य का संज्ञा ?

……..

प्रश्न : ३ : 'दधि' इति शब्दस्य किं लिङ्गम् ?

……..

प्रश्नः ४ : सप्तम्यां विभक्त्यौ कस्य कारकस्य प्रयोगो भवति ?

……..

६.४. अजन्तपुंलिङ्गशब्दः

६.४.१. अजन्तशब्दस्य अर्थः

अच् अन्तः च एतयोः पदद्वयोः सन्धिं भूत्वा 'अजन्त' इति पदस्य निर्माणं भवति । अजन्तशब्दा अर्थात् 'अच्' इत्यनेन अन्ताः समप्ताः वा शब्दाः । पाणिनिप्रणीते 'अष्टाध्यायी' इति व्याकरणग्रन्थे 'अच्' एकः पारिभाषिकशब्दः । इत्यनेन स्वरवर्णान् बोधयति। अतः येषां शब्दानाम् 'अच्' अन्तिमवर्णः स्वरः ते एव अजन्तशब्दाः ।

ज्ञातव्यम्

- 'अच्' इत्येकः प्रत्याहारः ।
- अष्टाध्यायी इति व्याकरणग्रन्थे चतुर्दश माहेश्वरसूत्राणि प्राप्यन्ते । एतेभ्यः सूत्रेभ्यः प्रत्यहार : क्रियते । सूत्रेषु केनापि आदिवर्णेन सह अन्तिमवर्णस्य मेलनेन प्रत्याहारो भवति- 'आदिरन्तेन सहेता'।
- 'अच्' इति प्रत्याहारेण नवस्वरवर्णाः प्राप्यन्ते- अ, इ, उ, ऋ,ऌ, ए, ओ, ऐ, औ ।

- एवं 'हल्' इति प्रत्याहारेण व्यञ्जनवर्णान् बोधयति।

६.४.२.अजन्तपुलिंगशब्दानाम् उदाहरणानि :

अकारान्त: अथवा अ-कारेण अन्तशब्दः-

नर शब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	नरः	नरौ	नराः
द्वितीया	नरम्	नरौ	नरान्
तृतीया	नरेण	नराभ्याम्	नरैः
चतुर्थी	नराय	नराभ्याम्	नरेभ्यः
पञ्चमी	नरात्	नराभ्याम्	नरेभ्यः
षष्ठी	नरस्य	नरयोः	नराणाम्
सप्तमी	नरे	नरयोः	नरेषु

प्रायश: पुंलिङ्ग-अकारान्तशब्दानां रूपाणि नरशब्दवत् भवन्ति। नरशब्दस्य अनुरूपशब्दा: सन्ति- छात्र-अमात्य-अश्व-असुर-आचार्य-इतिहास-बालक- देव-छाग-पुत्र-गज-मनुष्य-वृक्ष-चन्द्र-सूर्य-शुक-शृगाल-तडाग-काल-दिवस-मृग-काक-कृष्णासार-चटक-चोर-मूर्ख-यज्ञ-रथ-लोक-नायक-शिक्षक-सैनिक-बाल-देश-दोष-मेघ-व्याध-धर्म-केश-इत्यादयः।

ज्ञातव्यम्

- 'मित्र 'इति शब्दः पुंल्लिङ्गं भवति यदि अस्यार्थः सूर्यरूपेण गृह्यते। अन्यथा सखि इत्यर्थे अयं शब्द: नपुंसकलिङ्गं भवति।
- दार-प्राण-लाज-अक्षत-शब्दानां रूपाणि सर्वदा बहुवचने भवन्ति अर्थात् एते शब्दाः नित्यबहुवचनान्तशब्दाः।

आकारान्तः : पुंलिङ्गशब्दः - विश्वपा

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	विश्वपाः	विश्वपौ	विश्वपाः
द्वितीया	विश्वपाम्	विश्वपौ	विश्वपाः

तृतीया	विश्वपा	विश्वपाभ्याम्	विश्वपाभिः
चतुर्थी	विश्वपे	विश्वपाभ्याम्	विश्वपाभ्यः
पञ्चमी	विश्वपः	विश्वपाभ्याम्	विश्वपाभ्यः
षष्ठी	विश्वपः	विश्वपोः	विश्वपाम्
सप्तमी	विश्वपि	विश्वपोः	विश्वपाषु

'विश्वपा' इति शब्दस्य अनुरूपशब्दाः सन्ति- गोपा, सोमपा, धुम्रपा, मधुपा इत्यादय: ।

धातुना निष्पन्नानाम् आकारान्तपुंलिङ्गशब्दानां रूपाणि 'सोमपा' इति शब्दवद् भवति । तद्भिन्नानाम् आकारान्तपुंलिङ्गशब्दानां रूपाणि अन्यथा भवन्ति । यथा 'हाहा' इति शब्दस्य रूपाणि-

शश'-शब्दरूपम्-

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	शशः	शशौ	शशः
द्वितीया	शशम्	शशौ	शशन्
तृतीया	शशा	शशभ्याम्	शशभिः
चतुर्थी	शशे	शशभ्याम्	शशभ्यः
पञ्चमी	शशः	शशभ्याम्	शशभ्यः
षष्ठी	शशः	शशौः	शशम्
सप्तमी	शशे	शशौः	शशसु

इ-कारान्तशब्दस्य रूपाणि

मुनिशब्दः-

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मुनिः	मुनी	मुनयः
द्वितीया	मुनिम्	मुनी	मुनीन्
तृतीया	मुनिना	मुनिभ्याम्	मुनिभिः
चतुर्थी	मुनये	मुनिभ्याम्	मुनिभ्यः
पञ्चमी	मुनेः	मुनिभ्याम्	मुनिभ्यः
षष्ठी	मुनेः	मुनयोः	मुनीनाम्
सप्तमी	मुनौ	मुनयोः	मुनिषु

मुनिशब्दवत् अन्या: शब्दा: यथा – कवि-अग्नि-ऋषि-गिरि-अरि-रवि-अलि-हरि-व्याधि-कपि-विधि-अतिथि-हरि-पाणि-अहि-असि-इत्यादयः । उल्लेखनीयमस्ति यत् 'पति', 'सखि' च इति शब्दद्वयं विहाय सर्वेषाम् इ-कारान्तपुंलिङ्गशब्दानां रूपाणि मुनिवद् भवन्ति।

पतिशब्दः

	एकवचनम्	द्विवचनम	बहुवचनम्
प्रथमा	पतिः	पती	पतयः
द्वितीया	पतिम्	पती	पतीन्
तृतीया	पतिना	पतिभ्याम्	पतिभिः
चतुर्थी	पतये	पतिभ्याम्	पतिभ्यः
पञ्चमी	पत्याः	पतिभ्याम्	पतिभ्यः
षष्ठी	पत्याः	पत्योः	पतीनाम्
सप्तमी	पत्याम्	पत्योः	पतिषु

परन्तु भूपति-नरपति-महीपति-नृपति-इत्यादीनां समासनिष्पन्नानां शब्दानां रूपाणि मुनिवद्भवन्ति । 'सखि' इति शब्दस्य रूपाणि पतिवद् भवति यद्यपि 'प्रथमा तथा च द्वितीया' इति विभक्त्योः रूपाणि सामान्यतया भिन्नानि भवन्ति ।

ई-कारान्तपुंलिङ्गशब्द :

सुधीशब्दः-

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सुधीः	सुधयौ	सुधियः
द्वितीया	सुधियम्	सुधियौ	सुधियः
तृतीया	सुधिया	सुधीभ्याम्	सुधीभिः
चतुर्थी	सुधिये	सुधीभ्याम्	सुधीभ्यः
पञ्चमी	सुधियः	सुधीभ्याम्	सुधीभ्यः
षष्ठी	सुधियः	सुधियोः	सुधीनाम्
सप्तमी	सुधियि	सुधियोः	सुधीषू

सुश्री-हतधी–अपह्नी-इत्यादीनां सर्वेषाम् ई-कारान्तपुंलिङ्गशब्दानां रूपाणि सुधीशब्दवदेव भवति । किन्तु सेनानी-ग्रामणी-अग्रणी-इत्यादीनां शब्दाना रूपाणि सामन्यतया भिन्नानि भवन्ति-

सेनानी-

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सेनानी	सेनान्यौ	सेनान्यः
द्वितीया	सेनान्यम्	सेनान्यौ	सेनान्यः
तृतीया	सेनान्या	सेनानीभ्याम्	सेनानीभिः
चतुर्थी	सेनान्ये	सेनानीभ्याम्	सेनानीभ्यः
पञ्चमी	सेनान्यः	सेनानीभ्याम्	सेनानीभ्यः
षष्ठी	सेनान्यः	सेनान्योः	सेनान्याम्
सप्तमी	सेनान्याम्	सेनान्योः	सेनानीषु

उ-कारान्तपुलिङ्गशब्द :

साधु-

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	साधुः	साधू	साधवः
द्वितीया	साधुम्	साधू	साधून्
तृतीया	साधुना	साधुभ्याम्	साधुभिः
चतुर्थी	साधवे	साधुभ्याम्	साधुभ्यः
पञ्चमी	साधोः	साधुभ्याम्	साधुभ्यः
षष्ठी	साधोः	साध्वोः	साधूनाम्
सप्तमी	साधौ	साध्वोः	साधुषु

साधुशब्दवत् सर्वेषां उ-कारान्तपुंलिङ्गशब्दानां रूपाणि भवन्ति । अस्य अनुरूपशब्दाः भवन्ति- गुरु-पशु-शिशु-तरू-ऋतु-जन्तु-प्रभु-भानु-हेतु-रिपु-वायु-बधु-विष्णु-विभु-पटु-भिक्षु इत्यादयः ।

ज्ञातव्यम्

साधुशब्दस्य एकः अनुरूपशब्दो भवति 'असु'। अस्य रूपाणि सर्वदा बहुवचने भवन्ति । अर्थात् एष एकः नित्यबहुवचनान्तशब्दः । 'असु' इति शब्दस्य रूपाणि यथा –

विभक्ति	बहुवचनम्
प्रथमा	असवः
द्वितीया	असून

तृतीया	असुभिः
चतुर्थी	असुभ्यः
पञ्चमी	असुभ्यः
षष्ठी	असूनाम्
सप्तमी	असुषु
सम्बोधन	असवः

ऊ-कारान्तपुंलिङ्गशब्दः-

प्रतिभू-

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	प्रतिभूः	प्रतिभूवौ	प्रतिभूवः
द्वितीया	प्रतिभूवम्	प्रतिभूवौ	प्रतिभूवः
तृतीया	प्रतिभूवा	प्रतिभूभ्याम्	प्रतिभूभिः
चतुर्थी	प्रतिभूवे	प्रतिभूभ्याम्	प्रतिभूभ्यः
पञ्चमी	प्रतिभूवः	प्रतिभूभ्याम्	प्रतिभूभ्यः
षष्ठी	प्रतिभूवः	प्रतिभूवोः	प्रतिभूवाम्
सप्तमी	प्रतिभूवि	प्रतिभूवोः	प्रतिभूषु

प्रतिभूशब्दवत् अन्याः शब्दाः यथा- स्वभू-स्वयंभू-मनोभू-सुभू-आत्मभू-इत्यादयः। किन्तु सुलू-खलपू-वर्षाभू- पुनर्भू-इत्यादीनां शब्दानां रूपेषु भिन्नता दृश्यते। यथा –

सुलू

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सुलू	सुल्वौ	सुल्वः
द्वितीया	सुल्वम्	सुल्वौ	सुल्वः
तृतीया	सुल्वा	सुलूभ्याम्	सुलूभिः
चतुर्थी	सुल्वे	सुलूभ्याम्	सुलूभ्यः
पञ्चमी	सुल्वः	सुलूभ्याम्	सुलूभ्यः
षष्ठी	सुल्वः	सुल्वोः	सुल्वाम्
सप्तमी	सुल्वि	सुल्वोः	सुलूषु

ऋ-कारान्तपुंलिङ्गशब्द:

पितृ

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पिता	पितरौ	पितरः
द्वितीया	पितरम्	पितरौ	पितॄन्
तृतीया	पित्रा	पितृभ्याम्	पित्रा
चतुर्थी	पित्रे	पितृभ्याम्	पितृभ्यः
पञ्चमी	पितुः	पितृभ्याम्	पितृभ्यः
षष्ठी	पितुः	पित्रोः	पितॄणाम्
सप्तमी	पितरि	पित्रोः	पितृषु

पितृशब्दस्य अनुरूपशब्दाः भातृ-जामातृ-नृ-देव-इत्यादयः । उल्लेखनीयमस्ति यत् 'दातृ' इति शब्दस्य रूपाणि प्रथमा द्वितीया च विभक्तिद्वये सामन्यतया भिन्नानि सन्ति -

दातृ-

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	दाता	दातारौ	दातारः
द्वितीया	दातारम्	दातारौ	दातॄन्

दातृशब्दस्य अनुरूपशब्दा: यथा- विधातृ-ज्ञातृ-कर्तृ-होतृ-धातृ-वक्तृ-श्रोतृ-सवितृ-जेतृ-नप्तृ-इत्यादयः ।

ज्ञातव्यम्

नृ इति शब्दस्य रूपं षट्सु विभक्तिषु बहुवचने नृणाम्, नृणाम् च द्वयोरेव भवति ।

ए-कारान्तशब्दपुंलिङ्गशब्द:

रै- शब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	राः	रायौ	रायः
द्वितीया	रायम्	रायौ	रायः
तृतीया	राया	राभ्याम्	राभिः

चतुर्थी	राये	राभ्याम्	राभ्यः
पञ्चमी	रायः	राभ्याम्	राभ्यः
षष्ठी	रायः	रायोः	रायाम्
सप्तमी	रायि	रायोः	राषु

ओ-कारान्तशब्दपुंल्लिङ्गशब्द:

गो-

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गौः	गावौ	गावः
द्वितीया	गाम्	गावौ	गावः
तृतीया	गवा	गोभ्याम्	गोभिः
चतुर्थी	गवे	गोभ्याम्	गोभ्यः
पञ्चमी	गोः	गोभ्याम्	गोभ्यः
षष्ठी	गोः	गवोः	गवाम्
सप्तमी	गवि	गवोः	गोषु

औ – कारान्तपुंलिङ्गशब्द:

ग्लौ-

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	ग्लौ	ग्लावौ	ग्लावः
द्वितीया	ग्लावम्	ग्लावौ	ग्लावः
तृतीया	ग्लावा	ग्लौभ्याम्	ग्लौभिः
चतुर्थी	ग्लावे	ग्लौभ्याम्	ग्लौभ्यः
पञ्चमी	ग्लावः	ग्लौभ्याम्	ग्लौभ्यः
षष्ठी	ग्लावः	गावोः	ग्लावाम्
सप्तमी	ग्लावि	गावोः	ग्लौषु

निरीक्षणम्

प्रश्न: : ५ : 'अजन्तशब्दः' इत्यनेन कि बुध्यते ?

……..

प्रश्नः : ६ : 'पति' इति शब्दस्य तृतीया-विभक्तौ एकवचने किं रूपं भवति ?

……..

प्रश्नः : ७ : पितृ-शब्दस्य अनुरूपशब्दद्वयं लिखत ?

……..

प्रश्नः : ८ : ऊ-कारान्त पुंलिङ्गशब्दस्य उदाहरणमेकं लिखत ?

……..

६.५. सर्वनामशब्दः

६१.५.. परिचय :

संज्ञायाः स्थाने प्रयुज्यमानाः शब्दा एव सर्वनामशब्दा: । एतेषां सर्वनामशब्दानां प्रयोग: कस्यचित् शब्दस्य, वाक्यस्य, वाक्यांशस्य वा स्थाने भवति । विशेाष्यरूपेण विशेषणरूपेण च द्वयोरेव प्रकारेण सर्वनाम्नः प्रयोगो भवति । सर्वादि-गणस्य अन्तर्गतान् पञ्चत्रिंशत्-शब्दान् सर्वनाम इति उच्यते । एते पञ्चत्रिंशत् शब्दाः यथा- सर्व-विश्व-उभ-उभय-डतर-डतम्-अन्य-अन्यतर-इतर-त्वत्-त्व-सम-सिम-सेम-पूर्व-पर-अवर-दक्षिण-उत्तर-अपर-अधर-स्व-अन्तर-त्यद-तद्-यद्-एतद्-इदम्-अदस्-एक-द्वि-युष्मद्-अस्मद्-भवत्-किम्-शब्दा: । एतेषु सर्वनामशब्देषु सर्वतः सेमपर्यन्तं प्रथमचतुर्दशशब्दा: नित्यसर्वनामशब्दाः, पूर्वत: अन्तरपर्यन्तं नवशब्दाः विकल्पसर्वनामशब्दा: तथा च अवशिष्टा: द्वादशशब्दाः अर्थात् 'त्यद्' इति शब्दतः किम्पर्यन्तमपि नित्यसर्वनामशब्दा: । सर्वनामशब्दा: षट्सु भागेषु विभक्ताः -

क) व्यक्तिबोधक: यथा- अस्मद्- युष्मद्-भवत्-स्व-इत्यादयः।

ख) सम्बन्धबोधकः, यथा- यद्,

ग) प्रश्नबोधकः, यथा- किम्,

घ) साक्षात्बोधकः,यथा- सर्व,अन्य,अन्यतर, इतर, तद्, एतद्, अदस्, इदस् च,

ङ) संख्याबोधकः, यथा- एक, द्वि, उभ, उभय च,

च) दिक्सूचकः, यथा- पूर्व, पश्चिम, उत्तर, दक्षिण, पर, अपरं च उल्लेखनीयमस्ति यत् सर्वनामशब्दस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

६.५.२ . सर्वनामशब्दानाम् उदाहरणानि :

<u>सर्व- (पुंलिङ्गम्)</u>

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सर्वः	सर्वौ	सर्वे
द्वितीया	सर्वम्	सर्वौ	सर्वान्
तृतीया	सर्वेण	सर्वाभ्याम्	सर्वैः
चतुर्थी	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पञ्चमी	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
षष्ठी	सर्वस्य	सर्वयोः	सर्वेषाम्
सप्तमी	सर्वस्मिन्	सर्वयोः	सर्वेषु

सर्व- (स्त्रीलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सर्वा	सर्वे	सर्वाः
द्वितीया	सर्वाम्	सर्वे	सर्वाः
तृतीया	सर्वया	सर्वाभ्याम्	सर्वाभिः
चतुर्थी	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
पञ्चमी	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
षष्ठी	सर्वस्याः	सर्वयोः	सर्वासाम्
सप्तमी	सर्वस्याम्	सर्वयोः	सर्वासु

सर्व- (नपुंसकलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सर्वम्	सर्वाणि	सर्वाणि
द्वितीया	सर्वम्	सर्वाणि	सर्वाणि
तृतीया	सर्वेण	सर्वाभ्याम्	सर्वैः
चतुर्थी	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पञ्चमी	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
षष्ठी	सर्वस्य	सर्वयोः	सर्वेषाम्
सप्तमी	सर्वस्मिन्	सर्वयोः	सर्वेषु

सर्व-शब्दवत् अन्या: सर्वनामशब्दाः यथा- विश्व, उभ, उभय, एका, एकतर, सम, सिम, त्वत्, त्व च ।

पूर्व (पुंलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पूर्वः	पूर्वौ	पूर्वे
द्वितीया	पूर्वम्	पूर्वौ	पूर्वेण
तृतीया	पूर्वेण	पूर्वाभ्याम्	पूर्वैः
चतुर्थी	पूर्वस्मै	पूर्वाभ्याम्	पूर्वेभ्यः
पञ्चमी	पूर्वस्मात्	पूर्वाभ्याम्	पूर्वेभ्यः
षष्ठी	पूर्वस्य	पूर्वयोः	पूर्वेषाम्
सप्तमी	पूर्वस्मिन्	पूर्वयोः	पूर्वेषु

पूर्वशब्दस्य नपुंसकलिङ्गस्य स्त्रीलिङ्गस्य च रूपाणि सर्वसदृशं भवन्ति।

यद्-(पुंलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	यः	यौ	ये
द्वितीया	यम्	यौ	यान्
तृतीया	येन	याभ्याम्	यैः
चतुर्थी	यस्मै	याभ्याम्	येभ्यः
पञ्चमी	यस्मात्	याभ्याम्	येभ्यः
षष्ठी	यस्य	ययोः	येषाम्
सप्तमी	यस्मिन्	ययोः	येषु

यद्-(स्त्रीलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	या	ये	याः
द्वितीया	याम्	ये	याः
तृतीया	यया	याभ्याम्	याभिः
चतुर्थी	यस्यै	याभ्याम्	याभ्यः

पञ्चमी	यस्याः	याभ्याम्	याभ्यः
षष्ठी	यस्याः	ययोः	यासाम्
सप्तमी	यस्याम्	ययोः	यासु

यद्-(नपुंसकलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	यत्	ये	यानि
द्वितीया	यत्	ये	यानि
तृतीया	येन	याभ्याम्	यैः
चतुर्थी	यस्मै	याभ्याम्	येभ्यः
पञ्चमी	यस्मात्	याभ्याम्	येभ्यः
षष्ठी	यस्य	ययोः	येषाम्
सप्तमी	यस्मिन्	ययोः	येषु

तद्-(पुंलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सः	तौ	ते
द्वितीया	तम्	तौ	तान्
तृतीया	तेन	ताभ्याम्	तैः
चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः
पञ्चमी	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठी	तस्य	तयोः	तेषाम्
सप्तमी	तस्मिन्	तयोः	तेषु

तद्-(स्त्रीलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सा	ते	ताः
द्वितीया	ताम्	ते	ताः
तृतीया	तया	ताभ्याम्	ताभिः

चतुर्थी	तस्यै	ताभ्याम्	ताभ्यः
पञ्चमी	तस्याः	ताभ्याम्	ताभ्यः
षष्ठी	तस्याः	तयोः	तासाम्
सप्तमी	तस्याम्	तयोः	तासु

तद्-(नपुंसकलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	तत्	ते	तानि
द्वितीया	तत्	ते	तानि
तृतीया	तेन	ताभ्याम्	तैः
चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः
पञ्चमी	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठी	तस्य	तयोः	तेषाम्
सप्तमी	तस्मिन्	तयोः	तेषु

एतद्-(पुंलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषः	एतौ	एते
द्वितीया	एतम्, एनम्	एतौ	एतान्, एनान्
तृतीया	एतेन	एताभ्याम्	एतैः
चतुर्थी	एतस्मै	एताभ्याम्	एतेभ्यः
पञ्चमी	एतस्मात्	एताभ्याम्	एतेभ्यः
षष्ठी	एतस्य	एतयोः	एतेषाम्
सप्तमी	एतस्मिन्	एतयोः	एतेषु

तद्-(स्त्रीलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एषा	एते	एताः

द्वितीया	एताम्	एते	एताः
तृतीया	एतया	एताभ्याम्	एताभिः
चतुर्थी	एतस्यै	एताभ्याम्	एताभ्यः
पञ्चमी	एतस्याः	एताभ्याम्	एताभ्यः
षष्ठी	एतस्याः	एतयोः	एतासाम्
सप्तमी	एतस्याम्	एतयोः	एतासु

तद्-(नपुंसकलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एतत्	एते	एतानि
द्वितीया	एतत्	एते	एतानि
तृतीया	एतेन	एताभ्याम्	एतैः
चतुर्थी	एतस्मै	एताभ्याम्	एतेभ्यः
पञ्चमी	एतस्मात्	एताभ्याम्	एतेभ्यः
षष्ठी	एतस्य	एतयोः	एतेषाम्
सप्तमी	एतस्मिन्	एतयोः	एतेषु

इदम्-(पुंलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अयम्	इमौ	इमे
द्वितीया	इमम्	इमौ	इमान्
तृतीया	अनेन	आभ्याम्	एभिः
चतुर्थी	अस्मै	आभ्याम्	एभ्यः
पञ्चमी	अस्मात्	आभ्याम्	एभ्यः
षष्ठी	अस्य	अनयोः	एषाम्
सप्तमी	अस्मिन्	अनयोः	एषु

इदम्-(स्त्रीलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	इयम्	इमे	इमे
द्वितीया	इमाम्	इमे	इमाः
तृतीया	अनया	आभ्याम्	आभिः
चतुर्थी	अस्यै	आभ्याम्	आभ्यः
पञ्चमी	अस्याः	आभ्याम्	आभ्यः
षष्ठी	अस्याः	अनयोः	आसाम्
सप्तमी	अस्याम्	अनयोः	आसु

इदम्-(नपुंसकलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	इदम्	इमे	इमानि
द्वितीया	इदम्	इमे	इमानि
तृतीया	अनेन	आभ्याम्	एभिः
चतुर्थी	अस्मै	आभ्याम्	एभ्यः
पञ्चमी	अस्मात्	आभ्याम्	एभ्यः
षष्ठी	अस्य	अनयोः	एषाम्
सप्तमी	अस्मिन्	अनयोः	एषु

अदस्-(पुंलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	असौ	अमू	अमी
द्वितीया	अमुम्	अमू	अमून्
तृतीया	अमुना	अमूभ्याम्	अमीभिः
चतुर्थी	अमुस्मै	अमूभ्याम्	अमीभ्यः
पञ्चमी	अमुस्मात्	अमूभ्याम्	अमीभ्यः
षष्ठी	अमुस्य	अमूयोः	अमीषाम्

सप्तमी	अमुस्मिन्	अमूयोः	अमीषु

अदस्-(स्त्रीलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	असौ	अमू	अमूः
द्वितीया	अमुम्	अमू	अमूः
तृतीया	अमुया	अमूभ्याम्	अमूभिः
चतुर्थी	अमुष्यै	अमूभ्याम्	अमूभ्यः
पञ्चमी	अमुष्याः	अमूभ्याम्	अमूभ्यः
षष्ठी	अमुष्याः	अमूयोः	अमूषाम्
सप्तमी	अमुष्याम्	अमूयोः	अमुषु

अदस्-(पुंलिङ्गम्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अदः	अमू	अमूनि
द्वितीया	अदः	अमू	अमूनि
तृतीया	अमुना	अमूभ्याम्	अमीभिः
चतुर्थी	अमुस्मै	अमूभ्याम्	अमीभ्यः
पञ्चमी	अमुस्मात्	अमूभ्याम्	अमीभ्यः
षष्ठी	अमुस्य	अमूयोः	अमीषाम्
सप्तमी	अमुस्मिन्	अमूयोः	अमीषु

ज्ञातव्यम्

- इदम्, एतत्, अदस्, तद् च एतेषां चतुर्णां सर्वनामशब्दानाम् अर्थविषये भेदो दृश्यते।
- हस्तस्य समीपे वर्तमानं व्यक्तिं वस्तु वा सूचयितुं 'इदम्' इति सर्वनाम प्रयुज्यते।
- अधिकसमीपे वर्तमानं व्यक्तिं वस्तु वा सूचयितुं 'तद्' इति सर्वनाम प्रयुज्यते।
- दूरे वर्तमानं व्यक्तिं वस्तु वा सूचयितुं अदस् इति सर्वनाम प्रयुज्यते।

- कस्यचित् व्यक्ते: वस्तुनः वा अभावं (अदृश्यत्वं) सूचयितुं 'तद्' इति सर्वनाम प्रयुज्यते-
  "इदमस्तु सन्निकृष्टं समीपतरवर्त्तिचैतदो रूपम्।
  अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥
- 'इदम्' 'अदस्' च इति शब्दद्वयोः प्रयोग: सामन्यतया विशेषणरूपेण भवति।

किम्-पुलिङ्गम्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कः	कौ	के
द्वितीया	कम्	कौ	कान्
तृतीया	केन	काभ्याम्	कैः
चतुर्थी	कस्मै	काभ्याम्	केभ्यः
पञ्चमी	कस्मात्	काभ्याम्	केभ्यः
षष्ठी	कस्य	कयोः	केषाम्
सप्तमी	कस्मिन्	कयोः	केषु

किम्-स्त्रीलिङ्गम्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	का	के	काः
द्वितीया	काम्	के	काः
तृतीया	कया	काभ्याम्	काभिः
चतुर्थी	कस्यै	काभ्याम्	काभ्यः
पञ्चमी	कस्याः	काभ्याम्	काभ्यः
षष्ठी	कस्याः	कयोः	कासाम्
सप्तमी	कस्याम्	कयोः	कासु

किम्-नपुंसकलिङ्गम्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	किम्	के	कानि
द्वितीया	किम्	के	कानि

तृतीया	केन	काभ्याम्	कैः
चतुर्थी	कस्मै	काभ्याम्	केभ्यः
पञ्चमी	कस्मात्	काभ्याम्	केभ्यः
षष्ठी	कस्य	कयोः	केषाम्
सप्तमी	कस्मिन्	कयोः	केषु

किम् इति पदं सर्वनामपदं न भवति, अव्ययपदमिदम् ।

अस्मद् -

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अहम्	आवाम्	वयम्
द्वितीया	माम्,मा	आवाम्	अस्मान्
तृतीया	मया	आवाभ्याम्	अस्माभिः
चतुर्थी	मह्यम्,मे	आवाभ्याम	अस्मभ्यम्
पञ्चमी	मत्	आवाभ्याम्	अस्मत्
षष्ठी	मम,मे	आवयोः	अस्माकम्
सप्तमी	मयि	आवयोः	अस्मासु

युस्मद् -

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	त्वम्	युवाम्	यूयम्
द्वितीया	त्वाम्,त्वा	युवाम्	युस्मान्
तृतीया	त्वया	युवाभ्याम्	युस्माभिः
चतुर्थी	तुभ्यम्,ते	युवाभ्याम्	युस्मभ्यम्
पञ्चमी	त्वत्	युवाभ्याम्	युस्मत्
षष्ठी	तव	युवयोः	युस्माकम्
सप्तमी	त्वयि	युवयोः	युस्मासु

द्रष्टव्यमस्ति यत् वाक्यारम्भे 'युष्मद्' इति शब्दस्य त्वा, ते, वाम्, वः तथा च 'अस्मद्' इति शब्दस्य मा, मे, नौ, न – इति अष्टशब्दानां प्रयोग: न भवति । सम्बोधनस्य पश्चात् तथा च, वा, ह, एव – एतेभ्य अव्ययेभ्यः पश्चात् अपि 'अस्मद् युष्मद्' इत्यनयोः अष्टपदानां प्रयोगो न भवति ।

ज्ञातव्यम्

- 'उभ' इति शब्द: द्विवचने एव प्रयुज्यते ।
- 'उभय' इति शब्द: एकवचने द्विवचने च प्रयुज्यते ।
- 'एक' इति शब्द: वस्तुत: संख्यावाचकः । परन्तु यदा अयं शब्द: प्रथम-प्रधान-अल्प-केवल-सामान्य-अर्थेषु प्रयुज्यते, तदा सर्वनाम भवति तथा च अस्य रूपाणि 'सर्व'शब्दवत् त्रिषु लिङ्गेषु भवन्ति।

अग्रगत्या: निरीक्षणम्

प्रश्न: ९ : सर्वनामपदस्य का संज्ञा ?

.....

प्रश्न: १० : सर्वनामपदानि कति सन्ति ?

.....

प्रश्न: ११ : प्रश्नबोधकं सर्वनामपदं किमस्ति ?

.....

प्रश्न: १२ : 'तद्' इति शब्दस्य स्त्रीलिंगे पञ्चमी-बहुवचने किं रूपं भवति ?

.....

६.६. संख्यावाचकशब्द:

६.६.१ परिचय :

'एक', 'द्वि', 'त्रि', 'चतुर' – इत्यादयान् संख्याबोधकान् शब्दान् एव संख्यावाचकशब्दा: । साधरणतया संख्यावाचकशब्दः विशेष्यपदस्य विशेषणरूपेण प्रयुज्यते । 'एक'(१) इति संख्यावाचकशब्द एकवचनान्त: 'द्वि' (२) इति शब्दः च द्विवचनान्तः । 'त्रिं'(३) इति शब्दतः अष्टादश(१८) शब्दपर्यन्तं शब्दा: बहुवचनान्ताः। एक, द्वि, त्रि, चतुर (४) – एतेषां च चतुर्णां शब्दानां संयुक्तविशेष्यपदं भित्वा लिङ्गः प्रयुज्यते । अर्थात् त्रिषु लिङ्गेषु चतुर्णां पदानां रूपाणि भिन्नानि सन्ति । यथा- 'त्रयः बालकाः', 'त्रिस्रः बालिकाः', 'त्रीणि फलानि' च । अत्र बालकशब्दः पुंलिङ्गः, बालिका स्त्रीलिङ्ग:, फलम् इति नपुंसकलिङ्गशब्दः । किन्तु 'पञ्चन्'- शब्दत: अवशिष्टानां शब्दानां लिङ्गानुसारं परिवर्तनं न जायते । 'पञ्च बालकः', 'पञ्च बालिका', 'पञ्च फलानि' च । एतदुपरि, ऊणविंशतिशब्दतः (१९) परवर्तीशब्दाः एकवचनान्ताः। अतः, एतैः संख्यावाचकपदैः सह संयुक्तानि विशेष्यपदानि यदि बहुवचने अपि भवन्ति तथापि उक्तसंख्यावाचकपदानि एकवचने एव भवन्ति ।

६.६.२ संख्यावाचकशब्दानां रूपाणि

एक- शब्दरूपम्

	पुंलिङ्गम्	स्त्रीलिंङ्गम्	नपुंसकलिंङ्गम्
	एकवचनम्	एकवचनम्	एकवचनम्
प्रथमा	एकः	एका	एकम्
द्वितीया	एकम्	एकाम्	एकम्
तृतीया	एकेन	एकया	एकेन
चतुर्थी	एकस्मै	एकस्यै	एकस्मै
पञ्चमी	एकस्मात्	एकस्याः	एकस्मात्
षष्ठी	एकस्य	एकस्याः	एकस्य
सप्तमी	एकस्मिन्	एकस्याम्	एकस्मिन्

ज्ञातव्यमस्ति यत् 'एक' द्वि' च इति शब्दौ सर्वनामशब्दौ । 'एक' इति शब्दस्य रूपाणि सर्वशब्दवत् भवन्ति । किन्तु 'द्वि' इति शब्दस्य सर्वनामगतं कीदृशं वैशिष्ट्यं न परिलक्ष्यते । अपि तु अस्य शब्दस्य स्त्रीलिङ्गे नपुंसकलिङ्गे च रूपाणि सादृशानि सन्ति ।

द्वि- शब्दरूपम्

पुंलिङ्गम्	स्त्रीलिंङ्गम्	नपुंसकलिंङ्गम्
द्विवचनम्	द्विवचनम्	द्विवचनम्

प्रथमा	द्वौ	द्वे	द्वि
द्वितीया	द्वौ	द्वे	द्वि
तृतीया	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
चतुर्थी	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
पञ्चमी	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
षष्ठी	द्वयोः	द्वयोः	द्वयोः
सप्तमी	द्वयोः	द्वयोः	द्वयोः

त्रि- शब्दरूपम्

	पुंलिङ्गम्	स्त्रीलिंङ्गम्	नपुंसकलिंङ्गम्
	बहुवचनम्	बहुवचनम्	बहुवचनम्
प्रथमा	त्रयः	तिस्रः	त्रीणि
द्वितीया	त्रीन्	तिस्रः	त्रीणि
तृतीया	त्रीभिः	तिसृभिः	त्रीभिः
चतुर्थी	त्रीभ्यः	तिसृभ्यः	त्रीभ्यः
पञ्चमी	त्रीभ्यः	तिसृभ्यः	त्रीभ्यः
षष्ठी	त्रयाणाम्	तिसृणाम्	त्रयाणाम्
सप्तमी	त्रिषु	तिसृसु	त्रिषु

चतुर- शब्दरूपम्

	पुंलिङ्गम्	स्त्रीलिंङ्गम्	नपुंसकलिंङ्गम्
	बहुवचनम्	बहुवचनम्	बहुवचनम्
प्रथमा	चत्वारः	चतस्रः	चत्वारि
द्वितीया	चतुरः	चतस्रः	चत्वारि
तृतीया	चतुर्भिः	चतसृभिः	चतुर्भिः
चतुर्थी	चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः
पञ्चमी	चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः
षष्ठी	चतुर्णाम्	चतसृणाम्	चतुर्णाम्
सप्तमी	चतुर्षु	चतसृसु	चतुर्षु

ज्ञातव्यम्

यदि 'एक' इति शब्दः 'किञ्चित्' इत्यर्थे प्रयुज्यते तदा अयं शब्दः बहुवचनान्तो भवति। यथा – एकेषां पण्डितानान् इदं मतम्।

पञ्चन् (५), षट् (६), अष्टन्- एते शब्दाः नित्यबहुवचनान्ताः। तदुपरि त्रिषु लिङ्गेषु एतेषां शब्दानां रूपाणि समानानि सन्ति।

पञ्चन्- शब्दरूपम्

पुंलिङ्गम् , स्त्रीलिंङ्गम्, नपुंसकलिंङ्गम्

	बहुवचनम्
प्रथमा	पञ्च
द्वितीया	पञ्च
तृतीया	पञ्चभिः
चतुर्थी	पञ्चभ्यः
पञ्चमी	पञ्चभ्यः
षष्ठी	पञ्चानाम्
सप्तमी	पञ्चसु

षट्- शब्दरूपम्

पुंलिङ्गम् , स्त्रीलिंङ्गम्, नपुंसकलिंङ्गम्

	बहुवचनम्
प्रथमा	षट्
द्वितीया	षट्
तृतीया	षड्भिः
चतुर्थी	षड्भ्यः
पञ्चमी	षड्भ्यः
षष्ठी	षन्नाम्
सप्तमी	षट्सु

अष्टन्- शब्दरूपम्

पुंलिङ्गम् , स्त्रीलिंङ्गम्, नपुंसकलिंङ्गम्

	बहुवचनम्
प्रथमा	अष्टौ
द्वितीया	अष्टौ
तृतीया	अष्टाभिः
चतुर्थी	अष्टाभ्यः
पञ्चमी	अष्टाभ्यः
षष्ठी	अष्टानाम्
सप्तमी	अष्टासु

सप्तन् (७), नवन् (९), दशन् (१०), एकादशन् (११),द्वादशन् (१२), त्रयोदशन् (१३), चतुर्दशन् (१४), पञ्चदशन् (१५), षोडशन् (१६), सप्तदशन् (१७) अष्टादशन् (१८) च एतेषां संख्यावाचकशब्दानां रूपाणि पञ्चन्-शब्दवत् भवन्ति तथा च सर्वे एव बहुवचनान्ताः।

विंशति (२०) , षष्टिः (६०), सप्ततिः (७०) अशीतिः(८०), नवतिः (९०) – एतेषां शब्दानां रूपाणि क्तिन्-प्रत्ययान्त इ-कारान्त-मतिवत् भवति। यथा-

विशतिः	एकवचनम्
प्रथमा	विंशतिः
द्वितीया	विंशतिम्
तृतीया	विंशत्या
चतुर्थी	विंशत्यै
पञ्चमी	विंशत्याः
षष्ठी	विंशत्याः
सप्तमी	विंशत्याम्

व्यञ्जनान्ताः एकवचनान्ता: त्रिंशत्(३०), चत्वारिंशत् (४०),पञ्चाशत्(५०) एते शब्दा: स्त्रीलिङ्गा: तथा च रूपाणि 'भूभृत्' इति 'शब्दवद्' भवन्ति।

त्रिंशत्

	एकवचनम्
प्रथमा	त्रिंशत्
द्वितीया	त्रिंशतम्
तृतीया	त्रिंशता

चतुर्थी	त्रिंशते
पञ्चमी	त्रिंशतः
षष्ठी	त्रिंशतः
सप्तमी	त्रिंशति

संस्कृतसंख्यावाचक – शत (१००) – सहस्र (१०००) – अयुत(१००००) - लक्ष(१०००००) – शब्दानां रूपाणि अकारान्त – नपुंसकलिङ्ग– फलशब्दवत् भवन्ति। यथा –

शतं शब्दरूपम्

	एकवचनम्
प्रथमा	शतम्
द्वितीया	शतम्
तृतीया	शतेन
चतुर्थी	शताय
पञ्चमी	शतात्
षष्ठी	शतस्य
सप्तमी	शते

ज्ञातव्यम्

- 'कोटि' इति शब्द: नपुंसकलिङ्गम् अस्य रूपाणि च मति शब्दवत् भवति।
- अर्वुदः (दशकोटिः) शंकुः (दश-लक्ष-कोटिः) च शब्दद्वयस्य लिङ्गं पुंलिङ्गम्।

संस्कृते केचन शब्दा: सन्ति ये संख्यानां परिमाणं बोधयति। यथा- कति, यति, तति च। एते केवलं बहुवचने प्रयुज्यते तथा त्रिषु लिङ्गेषु रूपाणि समानानि भवन्ति।

कति- शब्दरूपम्

	एकवचनम्
प्रथमा	कति
द्वितीया	कति
तृतीया	कतिभिः

चतुर्थी	कतिभ्यः
पञ्चमी	कतिभ्यः
षष्ठी	कतीनाम्
सप्तमी	कतिषु

यति तति च अनयो शब्दयो: रूपाणि कतिसदृशं भवन्ति ।

अग्रगत्या: निरीक्षणम्

प्रश्न: : १३ : पञ्चन्' इति संख्यावाचकशब्दस्य रूपाणि लिखत ।

.....

प्रश्न: : १४ : त्रिंशत् इति शब्दस्य किं लिङ्गम् ?

.....

प्रश्न: : १५ : १००००० इत्ययं शब्दे लिखत।

.....

६.७ पूरणवाचकशब्द:

६.७.१ परिचय :

संस्कृतभाषायां केचन पुरणवाचकशब्दा: सन्ति । पूर्णस्य अर्थ अस्ति यत् यस्मात् काऽपि विशेषसंख्या पूर्णा भवति । एते शब्दा: प्रत्यक्षभावेन संख्यांन सूचयन्ति, तथापि संख्यया एव निर्धारणं कुर्वन्ति एते शब्दाः। एतेषां शब्दानां निर्माणाय एका विशेषा प्रक्रिया प्रयुज्यते यत्र निर्दिष्टस्य संख्याबोधकपदस्य प्राध्यान्यं तिष्ठति । यथा – 'एक' इति संख्यावाचकशब्दं सूचयितुं व्यवहृत: पुर्णवाचकशब्दो भवति प्रथमः (प्रथ+ अमच्) । पूरणवाचकशब्दाः विशेषणरूपेण व्यवह्रियन्ते । पुरणवाचकपदं पुंलिङ्गः स्त्रीलिङ्ग: नपुंसक लिङ्गः- एतेषु त्रिषु लिङ्गेषु विशेषरूपेण व्यवहार: भवन्तं द्रष्टुं शक्यते। उल्लेखनीयमस्ति यत् पुरणवाचकशब्द एकवचने प्रयुज्यते – प्रथमः बालकः, तृतीया विभक्ति : इत्यादय:।

६.७.२ पुराणवाचकशब्दानाम् उदाहरणानि

कतिपयानां पूरणवाचकशब्दानाम् उदाहरणानि त्रिषु लिङ्गेषु यथा-

	पुंलिङ्गम्	स्त्रीलिंङ्गम्	नपुंसकलिंङ्गम्
प्रथमः	प्रथमः	प्रथमा	प्रथमम्

	एकतमः	एकतमा	एकतमम्
द्वितीयः	द्वितीयः	द्वितीया	द्वितीयम्
तृतीयः	तृतीयः	तृतीया	तृतीयम्
चतुर्थः	चतुर्थः	चतुर्थी	चतुर्थम्
पञ्चमः	पञ्चमः	पञ्चमी	पञ्चमम्
षष्ठः	षष्ठः	षष्ठी	षष्ठम्
सप्तमः	सप्तमः	सप्तमी	सप्तमम्
अष्टमः	अष्टमः	अष्टमी	अष्टमम्
नवमः	नवमः	नवमी	नवमम्
दशमः	दशमः	दशमी	दशमम्
विंशः	विंशः	विंशी	विंशम्
त्रिंशः	त्रिंशः	त्रिंशी	त्रिंशम्
चत्वारिंशः	चत्वारिंशः	चत्वारिंशी	चत्वारिंशम्
पञ्चाशः	पञ्चाशः	पञ्चाशी	पञ्चाशम्
षष्ठितमः	षष्ठितमः	षष्ठितमी	षष्ठितमम्
सप्ततितमः	सप्ततितमः	सप्ततितमी	सप्ततितमम्
अशीतितमः	अशीतितमः	अशीतितमी	अशीतितमम्
नवतितमः	नवतितमः	नवतितमी	नवतितमम्
शतम्	शततमः	शततमी	शततमम्
सहस्रतमः	सहस्रतमः	सहस्रतमी	सहस्रतमम्

६.८. अध्यायात् किमवगतम्

अस्मिन् अध्याये वयं निम्नलिखितान् विषयान् आलोचितवन्तः-

- संस्कृतभाषायां प्रयुक्तानां शब्दानां वैशिष्ट्यानि ज्ञातवन्तः ।
- संस्कृतपदानां लिङ्गविषये ज्ञातवन्तः ।
- अजन्तपुंलिङ्गशब्दानां वैशिष्टानि रूपाणि च ज्ञातवन्तः ।
- सर्वनामपदानां रूपाणि वैशिष्टानि च ज्ञातवन्तः ।
- संख्यावाचकपदानां वैशिष्टानि रूपाणि च ज्ञातवन्तः ।
- पूरणवाचकशब्दानां वैशिष्टानि उदाहरणानि च ज्ञातवन्तः ।

६.९ ज्ञानाधिक्यम्

१. विद्यासागर: ईश्वरचन्द्र: (२०००); व्याकरणकौमुदी, कलकाता, देव साहित्य कुटीर प्राइभेट लिमिटेद

२. शर्मा, राजेन्द्रनाथ: (२०१८) संस्कृत व्याकरण सुरभिः, गुवाहाटी, एम.एल. पाव्लिकेछन।

३. शास्त्री, खगेन्द्रनाथः (१९८५); सस्कृत प्रवेश व्याकरण, गुवाहाटी, ग्रन्थपीठः।

४. चक्रवर्ती, सत्यनारायणः (२०१०); पाणिनीय शब्दशास्त्र ,कलकता ,संस्कृत पुस्तक भाण्डार।

६.१० अग्रगत्याः निरूपणम्

प्रश्न: १ : उत्तरम्: सप्त।

प्रश्नः २ : उत्तरम् : 'सुप' विभक्तिभिः निर्मितानि पदानि एव सुबन्तपदानि भवन्ति।

प्रश्नः ३ : उत्तरम् : नपुंसकलिङ्गम्।

प्रश्नः ४ : उत्तरम् : अधिकरणकारकस्य।

प्रश्नः ५: उत्तरम् : स्वरवर्णेन समाप्तं शब्दम्।

प्रश्नः ६ : उत्तरम्: पत्या।

प्रश्नः ७ : उत्तरम् :भातृ 'जामातृ' च।

प्रश्नः ८ : उत्तरम् : 'प्रतिभू'।

प्रश्नः ९ : उत्तरम् : संज्ञाया: स्थाने प्रयुज्यमानाः शब्दाः सर्वनामशब्दाः।

प्रश्नः १० : उत्तरम् : पञ्चत्रिंशत् (३५)।

प्रश्नः ११ : उत्तरम्: किम्।

प्रश्नः १२ : उत्तरम् : तस्या:।

प्रश्न : १३ : उत्तरम् - पञ्चन – शब्दस्य रूपाणि लेखनीयानि।

प्रश्नः १४ : उत्तरम् – स्त्री-लिङ्गम्।

प्रश्नः १५ : उत्तरम् – लक्षम्।

६. ११ अभ्यासप्रश्नाः

(क) **वस्तुधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

प्रश्नः १: मुनि – शब्दस्य रूपाणि लिखत।

प्रश्नः २: दातृ – शब्दस्य रूपाणि लिखत।

(ख) **संक्षेपप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

प्रश्नः १: एक, द्वि, त्रि, चतुर-शब्दानां रूपाणि लिखत।

प्रश्नः२. इदम्- शब्दस्य रूपाणि सर्वेषु लिङ्गेषु लिखत।

(ग) **रचनाधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

प्रश्नः १. सर्वनामपदानां वैशिष्ट्यानि लिखत।

प्रश्नः २. पुरणवाचक-संस्कृतसंख्याबोधकशब्दानां विषये लिखत।

*****

अध्यायः ७ : धातुरूपाणि

अध्यायस्य संरचना

७.१ उद्देश्यम्

७.२ परिचयः

७.३ संस्कृतभाषायां व्यवहृतानां कतिपयानां धातूनां साधारणधारणा

७.३.१ धातूनां प्रकारभेदाः

७.३.२ धातुरूपाणां पुरुषैः सह सम्बन्धः

७.३.३ क्रियायाः कालः लकारश्च

७.४ गुणानुसारं भिन्नधातूनां धारणा रूपाणि च

७.४.१ भ्वादिगणीयधातूनां रूपाणि

७.४.२ अदादिगणीयधातूनां रूपाणि

७.४.३ दिवादिगणीयधातूनां रूपाणि

७.५ अध्यायात् किमवगतम्

७.६ ज्ञानाधिक्यम्

७.७ अभ्यासप्रश्नाः

७.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनेन भवान् –

- संस्कृतभाषायां प्रयुक्तानां धातूनां विषये ज्ञास्यति।
- धातूनां विविधप्रकाराणां विषये ज्ञास्यति।
- क्रियायाः काल-लकारयोः विषये ज्ञास्यति।
- गणविषये ज्ञानं लप्स्यते।
- विविधेषु गणेषु अन्तर्भूतानां धातूनां रूपाणि ज्ञास्यति।

७.२ परिचयः

संस्कृतभाषायाः द्वे उपादाने स्तः - शब्दरूपाणि धातुरूपाणि च। शब्दरूपाणां धातुरूपाणां च विषये ज्ञानं यदि न भवति तर्हि संस्कृतभाषायां पदप्रयोगं कर्तुं न शक्यते। शब्दरूपवद् संस्कृतभाषायां व्यवहृतम् अन्यदेकं विषयं धातुरूपम्। विविधप्रकारपदानां मध्ये क्रियापदं बोधयितुं धातुरूपं व्यवह्रियते। केषाञ्चन पण्डितानुसारं सर्वेषां शब्दानां मूलतः एकः धातुः तिष्ठति। अर्थात् शब्दस्य अर्थं निर्णेतुं शब्दे विद्यमानं धातुम् उद्धर्तव्यम्। धातोः सहैव प्रत्ययः, विभक्तिः, वचनम् आदि संयुज्य भिन्नशब्दाः रचयितुं शक्यन्ते। एकस्मात् धातोः एकाधिकानां

शब्दानां सृष्टिः कर्तुं न शक्यते। संस्कृतभाषायाः ज्ञानार्थं धातोः विषये अध्ययनं कर्तुम् अत्यन्तं आवश्यकम्। एतम् अध्यायं पठित्वा भवान् संस्कृतभाषायां व्यवहृतानां धातूनां विषये ज्ञानं लप्स्यते। तदनन्तरं धातोः प्रकारभेदः, क्रियायाः कालः, पुरुषश्च इति धातुरूपाणां वैचित्र्यस्य विषये अपि भवान् ज्ञानं लप्स्यते। तदुपरि गणस्य विषये, भिन्नेषु लकारेषु धातोः रूपाणां विषये अपि भवान् अवगतः भविष्यति।

७.३ संस्कृतभाषायां प्रयुक्तानां कतिपयानां धातूनां साधारणधारणा

भाषायाः साधारणनियममनुरुध्य संस्कृतभाषायाः वाक्यगठने क्रियापदस्य अत्यन्तं महत्वपूर्णा भूमिका अस्ति। क्रियापदविहीनं वाक्यं कदापि सम्पूर्णं न मन्यते। क्रियापदस्य विषये ज्ञातुं संस्कृतभाषायां प्रयुक्तानां धातुरूपाणां विशालवैचित्र्यस्य विषये अध्ययनं कर्तव्यम्। महर्षिपाणिना 'भू'इत्यादयं धातवः कथ्यन्ते। धातोः विषये तेन रचितं सूत्रं भवति 'भूवादयो धातवः'। सरलभाषया वक्तुं चेत् क्रियावाचकप्रकृतिः अथवा मूलमेव धातुः। यथा - गम्, भू, पठ् इत्यादयः। गमनार्थके क्रियापदे गम्-धातुः प्रयुज्यते। 'भवति' इति अर्थे क्रियापदे भू-धातुः प्रयुज्यते तथा पठनक्रियां बोधयितुं पठ्-धातुः प्रयुज्यते। शब्दरूपवद् धातुभिः सह विविधाः विभक्तयः संयुज्य क्रियापदं निर्मीयते । एताः विभक्तयः धातुविभक्तयः इति कथ्यन्ते। एताः विभक्तयः 'तिप्' इति पदेन आरभ्यन्ते 'महिङ्' इति पदेन समाप्यन्ते। 'तिप्' इति पदस्य 'ति' तथा 'महिङ्' इति पदस्य 'ङ्' इत्येतयोः संयोजनेन यत् 'तिङ्' इति पदं प्राप्यते तदेव समग्ररूपेण धातुविभक्तिं बोधयति। यथा 'सुप्' शब्दविभक्तेः प्रतीकः, 'तिङ्' तथैव संस्कृते धातुविभक्तेः प्रतीकः इति। 'तिङ्' इत्यस्य अन्तर्गताः विभक्त्याकृतयः संयुज्य क्रियायाः काल-वचन-पुरुषानुसारेण विविधानां धातूनां रूपाणि निर्धार्यन्ते। एतानि रूपाणि वाक्ये क्रियापदरूपेण प्रयुज्यन्ते।

७.३.१ धातूनां प्रकारभेदाः

संस्कृतभाषायां प्रयुक्तानां विविधानां धातूनां त्रयः भागाः सन्ति। ते परस्मैपदी, आत्मनेपदी, उभयपदी च। अर्थात् संस्कृतभाषायां प्रयुक्ताः केचन धातवः परस्मैपदिनः, केचन आत्मनेपदिनः, केचन उभयपदिनः। परन्तु विशेषविशेषक्षेत्रेषु अस्य अपवादोऽपि दृश्यते। यथा- निर्दिष्टनियमानुसारं कदाचित् परस्मैपदी धातुः आत्मनेपदी, आत्मनेपदी धातुः परस्मैपदी अथवा उभयपदी धातुः केवलमात्रम् आत्मनेपदी अथवा केवलमात्रं परस्मैपदी भवति। पाणिनिः तस्य व्याकरणे एते नियमाः सूत्ररूपेण लिखितवन्तः। यस्य विशेषनियमस्य अनुसारेण प्रकृतेन आत्मनेपदी न भवति सः धातुः आत्मनेपदविभक्तिं गृह्णाति (अर्थात् आत्मनेपदी भवति)। इदम् आत्मनेपदविधानम् इति कथ्यते। एवमेव यस्य विशेषनियमस्य अनुसारेण प्रकृतेन परस्मैपदी न भवति सः धातुः परस्मैपदविभक्तिं गृह्णाति (अर्थात् परस्मैपदी भवति) । इदम् परस्मैपदविधानम् इति कथ्यते। एतादृशविधानस्य अनुसारेण उभयपदी धातुः केवलम् आत्मनेपदी अथवा केवलम् परस्मैपदी भवति इति दृश्यते। पुरुष-वचनानुसारं परस्मैपदस्य नव(९) आत्मनेपदस्य च नव(९) रूपाणि प्राप्यन्ते निश्चिते ल-कारे।

७.३.२ धातुरूपाणां पुरुषैः सह सम्बन्धः

संस्कृत-व्याकरणे पुरुष इति एकः विशेषः विषयः। पुरुषशब्देन संस्कृते व्यक्तिं बोधयति । पुरुषस्य त्रयः प्रकाराः सन्ति- प्रथम पुरुषः (Third Person), मध्यम पुरुषः (Second Person), तथा उत्तम पुरुषः (First Person)। प्रत्येकस्य पुरुषस्य त्रीणि वचनानि अपि सन्ति । यथा- एकवचनम्, द्विवचनम् बहुवचनम् च। त्रयाणां पुरुषाणां त्रीणि रूपाणि भवन्ति - एवं कृत्वा साकल्येन ३ x ३ = ९ धातुविभक्तीनां रूपाणि प्राप्यन्ते। नव रूपाणि परस्मैपदस्य, नव रूपाणि आत्मनेपदस्य च प्राप्यन्ते, अतः सर्वं मिलित्वा अष्टादश (१८) धातुविभक्तीनां रूपाणि दृश्यन्ते। धातुना सह एतानि रूपाणि संयुज्य वाक्ये क्रियापदानि रचयन्ति ।

७.३.३ क्रियायाः कालः लकारश्च

क्रियापदेन कार्यं बोध्यते, कार्यं च कालसापेक्षम् अस्ति | यत् कार्यं निश्चिते समये सम्पद्यते तत् कार्यस्य कालः उच्यते | अतः क्रियायाः अपि कालः भवति | कालानुसारं क्रियापदस्य धातोः रूपाणि भिन्नानि भवन्ति | यथा - "गम्" धातोः वर्तमानकालिकं रूपं भिन्नम्, अतीतकालिकं रूपं भिन्नम् | संस्कृतभाषायां धातुरूपाणि ज्ञातुं क्रियाकालस्य ज्ञानम् आवश्यकम् | अत्र लकारस्य प्रसङ्गः आगच्छति | महर्षिपाणिनिना दश लकाराः स्वीक्रियन्ते | यथा - लट्, लोट्, लङ्, लिङ्, लिट्, ल्युट्, लृङ्, लृट्, लृङ्, लेट् | एतेषु "लेट्" लकारः केवलं वैदिकसंस्कृते एव प्रयुज्यते | "लिङ्" इति शब्दः विधिलिङ्, आशीर्लिङ् च बोधयति | सर्वेषु लकारेषु "ल" इति वर्णः अस्ति, अतः एते "लकाराः" इति उच्यन्ते | एतेषु दशलकारेषु क्रियायाः वर्तमानकालं बोधनार्थं "लट्", सामान्य-अतीतकालं बोधनार्थं "लङ्", भविष्यत्कालं बोधनार्थं "लृट्" इति लकाराः प्रयुज्यन्ते | "विधिलिङ्" इति लकारः विधिं, प्रश्नं, प्रार्थनां, सम्भावनां च बोधयति | "लोट्" लकारः आज्ञां बोधयति | एतेषां पञ्चलकाराणां रूपाणां पुरुष-वचन-अनुसारं परिचयः अत्र दीयते |

लट् - परस्मैपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	ति	सि	मि
द्विवचनम्	तस्	थस्	वस्
बहुवचनम्	अन्ति	थ	मस्

लोट् - परस्मैपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः

एकवचनम्	तु	हि	आनि
द्विवचनम्	ताम्	तम्	आव
बहुवचनम्	अन्तु	त	आम

लङ्- परस्मैपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	द	स्	अम्
द्विवचनम्	ताम्	तम्	व
बहुवचनम्	अन्	त	म

विधिलिङ्-परस्मैपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	यात्	यास्	याम्
द्विवचनम्	याताम्	यातम्	याव
बहुवचनम्	युस्	यात	याम

लृट्-परस्मैपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः

एकवचनम्	स्यति	स्यसि	स्यामि
द्विवचनम्	स्यतः	स्यथः	स्यावः
बहुवचनम्	स्यन्ति	स्यथ	स्यामः

लट् -आत्मनेपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	ते	से	ए
द्विवचनम्	आते	आथे	वहे
बहुवचनम्	अन्ते	ध्वे	महे

लोट् -आत्मनेपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	ताम्	स्व	ऐ
द्विवचनम्	आताम्	आथाम्	आवहै
बहुवचनम्	अन्ताम्	ध्वम्	आमहै

लङ्-आत्मनेपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	त	थास्	इ

द्विवचनम्	आताम्	आथाम्	वहि
बहुवचनम्	अन्त	ध्वम्	महि

विधिलिङ् आत्मनेपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	ईत	ईथास्	ईय
द्विवचनम्	ईयाताम्	ईयाथाम्	ईवहि
बहुवचनम्	ईरन्	ईध्वम्	ईमहि

लृट् आत्मनेपदम्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	स्यते	स्यसे	स्ये
द्विवचनम्	स्येते	स्येथे	स्यावहे
बहुवचनम्	स्यन्ते	स्यध्वे	स्यामहे

ज्ञातव्यम्

लिट्-लकारः – लिट्-लकारस्य प्रयोगः तादृशी घटनायाः वर्णनं कर्तुं भवति या अस्माकं नेत्रयोः समक्षं न जाता स्यात्, एतिहासिकी च स्यात्।

यथा - रामः रावणं जघान।

लुट्-लकारः - भविष्यत्कालस्य क्रियायाः व्यक्तीकर्तुं लुट्-लकारस्य प्रयोगः क्रियते। किन्तु एषः कालः अद्यतनः न भवेत्।

लेट्-लकारः – अयं लकारः वेदे एव प्रयुक्तो भवति। लौकिकसंस्कृतस्य अस्य अभावः। अनेन लकारेन अनेक-कालानां तथा अनेक मनोभावनानां प्रकाशः जायते ।

ल्युट्-लकारः – सामान्य-भूतकालस्य क्रियायाः व्यक्तकरणार्थं लुट्-लकारस्य प्रयोगः क्रियते।

यथा - पुरा राजा नलः अभवत्।

लृङ्-लकारः - भाषायां कदाचित् एतादृशी स्थितिः अपि आगच्छति यदा कस्याश्चित् एकस्याः क्रियायाः अविद्यमाने द्वितीयायां क्रियायां सफलता न प्राप्यते। तादृश्यां स्थितौ लृङ्-लकारस्य प्रयोगः भवति।

यथा - यदि वर्षा अभविष्यत् तर्हि दुर्भिक्षं नाभविष्यत्।

७.४ गणानुसारं विभिन्नधातूनां धारणा रूपाणि च

संस्कृत भाषायां प्रयुक्तधातूनां रूपवैशिष्ट्यं भिन्नं भिन्नम्। धातुसमूहानां रूपाणां वैशिष्ट्यानाम् उपरि भित्तिं कृत्वा एतानि दशसु भेदेषु विभक्तानि। एते भेदाः 'गणाः' इति कथ्यन्ते। अतः समग्रधातवः दशसु गणेषु विभक्ताः। प्रत्येकस्मिन् गणे एकं साधारणं धातुं प्रतीकं कृत्वा तस्य धातोः भित्तौ गणस्य नामकरणं कृतम्। तेन हि गणाः सन्ति –

भू-धातुं प्रधानं कृत्वा- भ्वादिगणः (भू +आदिः = भ्वादिः)

अद्-धातुं प्रधानं कृत्वा- अदादिगणः(अद् +आदिः = अदादिः)

हु-धातुं प्रधानं कृत्वा- जुहोत्यादिगणः(हु +आदिः = जुहोत्यादिः)

दिब्-धातुं प्रधानं कृत्वा- दिवादिगणः(दिब् +आदिः = दिवादिः)

सु-धातुं प्रधानं कृत्वा- स्वादिगणः(सु +आदिः = स्वादिः)

तुद्-धातुं प्रधानं कृत्वा- तुदादिगणः(तुद् +आदिः = तुदादिः)

रुध्-धातुं प्रधानं कृत्वा- रुधादिगणः(रुध् +आदिः = रुधादिः)

तन्-धातुं प्रधानं कृत्वा- तनादिगणः(तन् +आदिः = तनादिः)

क्री-धातुं प्रधानं कृत्वा- क्र्यादिगणः(क्री+आदिः = क्र्यादिः)

चुर्-धातुं प्रधानं कृत्वा- चुरादिगणः(चुर् +आदिः = चुरादिः)

एतेषु ह्वादिगणं जुहोत्यादिगणः अपि कथ्यते। एतेषाम् गणानां विषये एकः प्रचलितः श्लोकः उपलभ्यते। सः एवम् अस्ति –

भ्वाद्यदादी जुहोत्यादर्दिवादिः स्वादिरेव च ।

तुदादिश्च रुधादिश्च तनक्र्यादि चुरदयः ॥

ज्ञातव्यम्

- महामुनिः पाणिनिः "अष्टाध्यायी" नामकं विशालं ग्रन्थं रचितवान्। समग्रविश्वेऽपि व्याकरणक्षेत्रे अस्य ग्रन्थस्य अनवद्यः योगदानम् अस्ति। अस्मिन् ग्रन्थे अष्टौ अध्यायाः सन्ति। तस्मादेव अस्य नाम "अष्टाध्यायी"। प्रत्येकस्मिन् अध्याये चत्वारः पादाः सन्ति। अतः समग्र "अष्टाध्यायी" ग्रन्थे सर्वमपि द्वात्रिंशत् (३२) पादाः सन्ति। प्रत्येकस्मिन् पादे विविधाः सूत्राः अन्तर्भुक्ताः सन्ति।
- पाणिनेः सूत्राणां पृष्ठतः प्रथमतः अध्यायसंख्या, तत्पश्चात् पादसंख्या, अन्ते च सूत्रसंख्या दीयते। यथा, "भूवादयो धातवः" इति सूत्रम् अष्टाध्यायीग्रन्थस्य प्रथमाध्यायस्य तृतीयपादस्य प्रथमं सूत्रम्। अतः अस्य सूत्रस्य अवस्थानचिह्नरूपेण (१.३.१) इयं संख्या व्यवह्रियते। अस्य नियमानुसारं "भूवादयो धातवः" (१.३.१) इत्येवं लिख्यते।

अग्रगत्याः निरीक्षणम्

प्रश्नः १ : धातोः का संज्ञा ?

……..

प्रश्नः २ : कति लकाराः सन्ति ?

……..

प्रश्नः ३ : धातवः केषु गणेषु विभक्ताः?

……..

७.४.१ भ्वादिगणीयधातूनां रूपाणि

भू-धातुः परस्मैपदी भवति । अस्य धातोः रूपाणि यथा-

लट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	भवति	भवसि	भवामि
द्विवचनम्	भवतः	भवथः	भवावः
बहुवचनम्	भवन्ति	भवथ	भवामः

लोट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	भवतु	भव	भवानि
द्विवचनम्	भवताम्	भवतम्	भवाव
बहुवचनम्	भवन्तु	भवत	भवाम

लङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	अभवत्	अभवः	अभवम्
द्विवचनम्	अभवताम्	अभवतम्	अभवाव

बहुवचनम्	अभवन्	अभवत	अभवाम

विधिलिङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	भवेत्	भवेः	भवेयम्
द्विवचनम्	भवेताम्	भवेतम्	भवेव
बहुवचनम्	भवेयुः	भवेत	भवेम

लृट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	भविष्यति	भविष्यसि	भविष्यामि
द्विवचनम्	भविष्यतः	भविष्यथः	भविष्यावः
बहुवचनम्	भविष्यन्ति	भविष्यथ	भविष्यामः

हस्-गम्-पठ्-खाद्-नम्-पत्-गै-इत्यादयः भ्वादिगणीय-परस्मैपदिनः धातवः। अस्मिन् गणे अन्तर्गतः सेव् इति धातुः आत्मनेपदी। अस्य धातोः रूपाणि यथा-

लट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	सेवते	सेवसे	सेवे

द्विवचनम्	सेवेते	सेवेथे	सेवावहे
बहुवचनम्	सेवन्ते	सेवध्वे	सेवामहे

लोट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	सेवताम्	सेवस्व	सेवै
द्विवचनम्	सेवेताम्	सेवेथाम्	सेवावहै
बहुवचनम्	सेवन्ताम्	सेवध्वम्	सेवामहै

लङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	असेवत	असेवथाः	असेवे
द्विवचनम्	असेवेताम्	असेवथाम्	असेवावहि
बहुवचनम्	असेवन्त	असेवध्वम्	असेवामहि

विधिलिङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	सेवत	सेवेथाः	सेवेय

द्विवचनम्	सेवेयाताम्	सेवेयाथाम्	सेवेवहि
बहुवचनम्	सेवेरन्	सेवेध्वम्	सेवेमहि

लृट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	सेवस्यते	सेवस्यसे	सेवस्ये
द्विवचनम्	सेवस्येते	सेवस्येथे	सेवस्यावहे
बहुवचनम्	सेवस्यन्ते	सेवस्यध्वे	सेवस्यामहे

लभ्-सह्-भाष्-त्रै-इत्यादयः भ्वादिगणीय-आत्मनेपदिनः धातवः।

७.४.२ अदादिगणीयधातूनां रूपाणि

अद्-धातुः परस्मैपदी भवति ।अस्य धातोः रूपाणि यथा-

लट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	अत्ति	अत्सि	अद्मि
द्विवचनम्	अत्तः	अत्थः	अद्वः
बहुवचनम्	अदन्ति	अत्थ	अद्मः

लोट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः

एकवचनम्	अत्तु	अद्धि	अदानि
द्विवचनम्	अत्ताम्	अत्तम्	अदाव
बहुवचनम्	अदन्तु	अत्त	अदाम

लङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	आदत्	आदः	आतम्
द्विवचनम्	आत्ताम्	आत्तम्	आद्व
बहुवचनम्	आदन्	आतेत	आत्म

विधिलिङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	अद्यात्	अद्याः	अद्याम्
द्विवचनम्	अद्याताम्	अद्यातम्	अद्याव
बहुवचनम्	अद्युः	अद्यात	अद्याम

लृट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः

एकवचनम्	अत्स्यति	अत्स्यसि	अत्स्यामि
द्विवचनम्	अत्स्यतः	अत्स्यथः	अत्स्यावः
बहुवचनम्	अत्स्यन्ति	अत्स्यथ	अत्स्यामः

या-हन्-शास्-विद्-ब्रु-इत्यादयः अदादिदिगणीय-परस्मैपदिनः धातवः। अस्मिन् गणे अन्तर्गतः आस् इति धातुः आत्मनेपदी। अस्य धातोः रूपाणि यथा-

लट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	आस्ते	आस्से	आसे
द्विवचनम्	आसाते	आसाथे	आस्वहे
बहुवचनम्	आसते	आध्वे, आद्धे	आस्महे

लोट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	आस्ताम्	आस्स्व	आसै
द्विवचनम्	आसाताम्	आसाथाम्	आसावहै
बहुवचनम्	आसताम्	आध्वम्,आद्धम्	आसामहै

लङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	आस्त	आस्थाः	आसि
द्विवचनम्	आसाताम्	आसाथाम्	आस्वहि
बहुवचनम्	आसत	आध्वम्, आद्धम्	आस्महि

विधिलिङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	आसीत	आसीथासः	आसीय
द्विवचनम्	आसीयाताम्	आसीयाथाम्	आसीवहि
बहुवचनम्	आसीरन्	आसीध्वम्	आसीमहि

लृट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	आसिष्यते	आसिष्यसे	आसिष्ये
द्विवचनम्	आसिष्येते	आसिष्यथे	आसिष्यावहे
बहुवचनम्	आसिष्यन्ते	आसिष्यध्वे	आसिष्यामहे

वस्-शी-चक्ष्- इत्यादयः अदादिदिगणीय-आत्मनेपदिनः धातवः।

७.४.४ दिवादिगणीयधातूनां रूपाणि

दिव्-धातुः परस्मैपदी भवति। अस्य धातोः रूपाणि यथा-

लट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	दीव्यति	दीव्यसि	दीव्यामि
द्विवचनम्	दीव्यतसः	दीव्यथः	दीव्यावः
बहुवचनम्	दीव्यन्ति	दीव्यथ	दीव्यामः

लोट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	दीव्यतु	दीव्य	दीव्यानि
द्विवचनम्	दीव्यताम्	दीव्यतम्	दीव्यव
बहुवचनम्	दीव्यन्तु	दीव्यत	दीव्यम

लङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	अदीव्येत्	अदीव्यः	अदीव्यम्
द्विवचनम्	अदीव्यताम्	अदीव्यतम्	अदीव्याव
बहुवचनम्	अदीव्यन्	अदीव्यत	अदीव्याम

विधिलिङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	दीव्येत्	दीव्येः	दीव्येयम्
द्विवचनम्	दीव्येताम्	दीव्येतम्	दीव्येव
बहुवचनम्	दीव्येयुः	दीव्येत	दीव्येम

लृट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	देविष्यति	देविष्यसि	देविष्यामि
द्विवचनम्	देविष्यतः	देविष्यथः	देविष्यावः
बहुवचनम्	देविष्यन्ति	देविष्यथ	देविष्यामः

भ्रम्-नृत्-स्निह्-सिव्- इत्यादयः दिवादिगणीय-परस्मैपदिनः धातवः। अस्मिन् गणे अन्तर्गतः जन् इति धातुः आत्मनेपदी। अस्य धातोः रूपाणि यथा-

लट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	जायते	जायसे	जाये
द्विवचनम्	जायेते	जायथे	जायावहे
बहुवचनम्	जायन्ते	जायध्वे	जायामहे

लोट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	जायताम्	जायस्व	जायै
द्विवचनम्	जायेताम्	आथाम्	जायावहै
बहुवचनम्	जायन्ताम्	जायध्वम्	जायामहै

लङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	अजायत	अजायथाः	अजाये
द्विवचनम्	अजायेताम्	अजायथाम्	अजायावहि
बहुवचनम्	अजायन्त	अजायध्वम्	अजायामहि

विधिलिङ्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	जायेत	जायेथाः	जायेय
द्विवचनम्	जायेयाताम्	जायेयाथाम्	जायेवहि
बहुवचनम्	जायेरन्	जायेध्वम्	ईमहि

लृट्

	प्रथमपुरुषः	मध्यमपुरुषः	उत्तमपुरुषः
एकवचनम्	जनिष्यते	जनिष्यसे	जनिष्ये
द्विवचनम्	जनिष्येते	जनिष्यथे	जनिष्यावहे
बहुवचनम्	जनिष्यन्ते	जनिष्यध्वे	जनिष्यामहे

विद्-दीप्-मन्-इत्यादयः दिवादिगणीय-आत्मनेपदिनः धातवः ।

अग्रगत्याः निरीक्षणम्

प्रश्नः ४ : शी-धातुः कस्मिन् गणे अन्तर्भुक्तः?

.....

प्रश्नः ५ : सेवेरन् इति रूपं कस्मिन् लकारे अस्ति ?

.....

प्रश्नः ६ : पत् धातोः विधिलिङ्-लकारस्य रूपाणि लिखत ।

.....

७.५ अध्यायात् किमवगतम्

अस्य अध्यायस्य अध्ययनं कृत्वा वयम् -

- संस्कृतभाषायां प्रयुक्तानां धातूनां विषये ज्ञातवन्तः ।
- धातोः लक्षणम्, भाषायां अस्य प्रयोजनियता, अस्य विभक्तीनां विषये अपि ज्ञातवन्तः ।
- तदुपरि धातोः प्रकारभेदम्, धातोः रूपैः सह पुरुषस्य सम्बन्धम्, क्रियायाः कालः, ल-कारस्य विषये ज्ञातवन्तः ।

- ततः परम् अष्टादश धातुविभक्तयः, गणानां नामानि, विविधानां गणानाम् अन्तर्गतं परस्मैपदी-आत्मनेपदी-धातूनां रूपाणां विषये अवगतवन्तः ।

✓७.६ ज्ञानाधिक्यम्

क) शर्मा, राजेनेद्रनाथः(२०१४); संस्कृत व्याकरण सुरभि, गुवाहाटी, एम् एल् पाव्लिकेछन

ख) विद्यासागर, ईश्वरचन्द्रः ; समग्र व्याकरण कौमुदी , कोलकाता, देव साहित्य कुटीर प्राइभेट् लिमिटेड

ग) भट्टाचार्य, हरिचन्द्रः (१९९६); संस्कृत व्याकरण प्रभा ,गुवाहाटी , बरुवा एजेन्सि

घ) शास्त्री, खगेन्द्रनाथ (१९८५); संस्कृत प्रवेश व्याकरण, गुवाहाटी , ग्रन्थपीठ

⍰७.७ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु) ।

प्रश्नः १: संस्कृतभाषायां प्रयुक्तानां धातूनां विषये टिप्पणीं लिखत ।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु) ।

प्रश्नः १: ल-कारः इति अनेन किं बुध्यते? आत्मनेपदे प्रयुक्तानां पञ्चानां ल-काराणां धातुविभक्तीः लिखत ।

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु) ।

प्रश्नः १: भू-रुद्-गम्-दृश्-त्रै-विद्-दिव्- हन्-शी-धातूनां रूपाणि सर्वेषु लकारेषु लिखत ।

*****

अध्यायः ८ : सन्धिप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

अध्यायस्य संरचना

८.१. उद्देश्यम्

८.२. परिचयः

८.३. अच्-सन्धिप्रकरणम्

८.४. हल्-सन्धिप्रकरणम्

८.५. विसर्गसन्धिप्रकरणम्

८.६. अध्यायात् किमवगतम्

८.७ . ज्ञानाधिक्यम्

८.८. अग्रगत्याः निरूपणम्

८.९. अभ्यासप्रश्नाः

८.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनादनन्तरं भवन्तः –

- लघुसिद्धान्तकौमुद्यनुसारं सन्धिविषये ज्ञातुं शक्नुवन्ति।
- अच्-सन्धिविषये उदाहरणपूर्वकं ज्ञानं भविष्यन्ति।
- हल्-सन्धिविषये उदाहरणपूर्वकं ज्ञानं भविष्यन्ति।
- विसर्गसन्धिविषये उदाहरणपूर्वकं ज्ञानं भविष्यन्ति।

८.२ परिचयः

सम्-उपसर्गपूर्वकाद धा (डुधाञ्-धारणपोषणयो) इत्यस्माद्धातोः 'उपसर्गे घोः किः' (अष्टाध्यायी-३.३.९) इति सूत्रेण कि-प्रत्यये भूते सति अनुबन्धलोप 'सन्धि' इति शब्दो निष्पद्यते। शब्दोऽयं पुंलिङ्गे प्रयुज्यते। वस्तुतो वर्णद्वये समीपस्थे सति यत्र विकारः परिवर्तनं वा उत्पद्यते, तत्र स एव विकार: सन्धिरित्युच्यते। तच्च परिवर्त्तनं रूपत्रये परिलक्षितं भवति -

१. कुत्रचित् उभयोः वर्णयोः परिवर्त्तनं भवति। यथा- वाक्+हरिः = वाग्घरि (अत्र क्-स्थाने ग् तथा ह्-स्थाने घ्)

२. कुत्रचित् एकस्मिन्नेव वर्णे परिवर्त्तनं भवति। यथा- दधि+आनय = दध्यानय (अत्र इ स्थाने य्)

३. कुत्रचित् द्वयोःवर्णयोः स्थानेऽपरो वर्णः समायाति। यथा- गण+ईशः = गणेशः (अत्र अ-ईइत्यनयोः स्थाने)

अपि च सन्धेरपरं नाम 'संहिता' वर्त्तते। महर्षिपाणिनिना अष्टाध्याय्यां तदेव सूत्रितं यत्- "परःसन्निकर्षः संहिता"(अष्टाध्यायी-४.१०१) अर्थात् वर्णनाम् अतिशयसान्निध्यं 'संहिता' इति कथ्यते। सा च संहिता(सन्धिः) कुत्र अनिवार्यरूपेण कर्तव्या, कुत्र च विकल्पत्वेन इति जिज्ञासायाम् उच्यते एकया कारिकया -

संहितैकपदे नित्या नित्या धातूपसर्गयोः।

नित्या समासे वाक्ये सा तु विवक्षामपेक्षते ॥

अस्याः कारिकायाः अर्थः अयम्-

१.एकस्मिन् पदे विद्यमानेषु वर्णेषु संहिता नित्या भवति। यथा-

हरे+ए = हरये

पै+अकः = पावकः

२. धातूपसर्गयोः मध्ये संहिता नित्य भवति। यथा-

अधि + इते = अधीते।

प्रति + अर्पयति = प्रत्यर्पयति।

३. समासे च संहिता नित्या भ। यथा-

राज्ञः + अश्वः=राजाश्वः।

धर्मश्च + अर्थश्च = धर्मार्थौ।

४. वाक्ये च सा संहिता वक्तुरिच्छाधीना भवति। यथा 'ब्रह्म सत्यं जगन्मिथ्या' इत्यत्र जगन्मिथ्येत्यतयोः शब्दयोः शब्दरस्ति। अत्र इत्थमपि वक्तुं शक्यते- 'जगत् मिथ्या' इति। एवं हि एकस्मिन् पदे, धातूपसर्गयं समासे च संहिता नित्या, भवति। केवलं वाक्ये सा सन्धिः वक्तुः = उच्चारयितुः इच्छाधीना जायते।

मूलतः सन्धेस्त्रयो भेदाः वर्तन्ते।

१. अच्सन्धिः/स्वरसन्धिः यदा स्वरद्वयस्य अतिशयसामिप्ये स्वरे विकार उत्पद्यते तदा सः स्वरसन्धि उच्यते। यथा – विद्या + आलयः = विद्यालयः।

२. व्युजनसन्धिः/हल्-सन्धिः यदा व्यञ्जनान्तरं स्वरो व्यञ्जनो वा तिष्ठति तदा यो व्यञ्जनगतो विकार उत्पद्यते स एव व्यञ्जनसन्धिः।

यथा - वाक् + ईशः = वागीशः।

जगत् + नाथः = जगन्नाथः।

३. विसर्गसन्धिः विसर्गानन्तरं यदा कश्चित्स्वरो व्यञ्जनो वा समायाति तदा विसर्गे यो विकारो जायते। स विकारो विसर्गसन्धि अभिधीयते। यथा-

बालकः + अवदत् = बालकोऽवदत्।

रामः + हसति = रामो हसति।

अध्यायेऽस्मिन् एतेषां सन्धीनां विषये लघुसिद्धान्तकौमीद्यनुसारं यथाक्रमं यथाग्रन्थं प्रतिपाद्यते । लघुसिद्धान्तकौमुदीनामकस्य व्याकरणग्रन्थस्य रचयिता वर्त्तते वरदराजाचार्यः। तस्य गुरुः आसीत् भट्टोजिदीक्षितः । तस्य गुरुणा वैयाकरणसिद्धान्तकौमुदी रचिता । यतोहि व्याकरणग्रन्थोऽयं प्रारम्भिकच्छात्रा कृते कष्टकरं वर्त्तते , अतः अनायासबोधाय भट्टोजिदीक्षितस्य शिष्यो वरदराजाचार्यः पाणिनीयाष्टाध्यायाः १२७५ सूत्राणि समादाय अत्यन्तसरलरीत्या लघुसिद्धान्तकौमुदीम् अरचयत् ।

८.३ अच्-सन्धिप्रकरणम्

लघुसिद्धान्तकौमुदीग्रन्थे प्रदत्ताः सन्धिभेदाः एवं विधाः -

(क) यण्-सन्धिः

(ख) अयादिसन्धिः

(ग) गुणसन्धिः

(घ) वृद्धिसन्धिः

(ङ) पूर्वरूपसन्धिः

(च) दीर्घसन्धिः

(छ) पररूपसन्धिः

(ज) प्रकृतिभावसन्धिः

(झ) अवङ्सन्धिः

(क) यण्-सन्धिः-

यण्-सन्धि विधायको विधिसूत्रमस्ति 'इकोयणचि'इति। अर्थात् इकः स्थाने यण् भवति अचि परे सति संहितायां विषये । 'इक्' इत्यनेन इक्-प्रत्याहारः बुद्ध्यते । तत्र इ, उ, ऋ, लृ एते वर्णाः भवन्ति । तथा च यण्

इत्यनेन 'य्, व्, र्, ल्' एते वर्णाः ज्ञायन्ते। अपि च अत्र 'इकः' इति पदेन 'इ, उ, ऋ, ऌ' एतेषां वर्णानां इ-उ-ऋ-वर्णानां ह्रस्वदीर्घप्लुतादयः अष्टादशभेदाः, तथा ऌकारस्य द्वादशभेदाः ज्ञेयाः। अपि च उदाहरणत्वेन सुधी + उपास्य इत्यत्र यद्यपि बहवः इकः सन्ति, तथापि अत्र 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रेण धकारोत्तरवर्तिनः ईकारस्य स्थाने एव यणादेशो भवति। तथा च 'इको यणचि' इति सूत्रस्य नियमकरणाय 'स्थानेऽन्तरतमः' इति सूत्रं प्रर्वतते येन-

१) इकारस्य स्थाने 'य्'

२) उकारस्य स्थाने 'व्'

३) ऋकारस्य स्थाने 'र्'

४) ऌकारस्य स्थाने 'ल' आदेशो भवति।

उदाहरणत्वेन यथा -

सुधी + उपास्यः = सुध्युपास्यः।

मधु + अरिः = मध्वरिः।

धातु + अंशः = धात्रंशः।

ऌ + आकृतिः = लाकृतिः।

नदी + अत्र = नद्यत्र।

यदि + अपि = यद्यपि।

प्रति+ एकम् = प्रत्येकम्।

गुरु + आज्ञा = गुर्वाज्ञा।

पितृ+ आज्ञा = पित्राज्ञा।

मातृ+ आज्ञा = मात्राज्ञा।

भानु +आभा = भान्वाभा।

दुहितृ + ईशः = दुहित्रीशः।

कामिनी + उद्यः=कामिन्युदयः।

लृ+आकारः = लाकारः।

विशेषः- 'अनचि च' इति सूत्रेण द्वित्त्वं विधीयते येन सुद्ध्युपास्यः, मद्ध्वरिः, धात्त्रंशः इति रूपमपि भवति। यणसन्धिविधाने सहकारिभूतानि सूत्राणि क्रमेण यथा– इको यणचि, तस्मिन्निति निर्दिष्टे पूर्वस्य, स्थानेऽन्तरतमः, अनचि च, झलां जशं झशि, संयोगान्तस्य लोपः, अलोऽन्तस्य। वातिकञ्च-'यणः प्रतिषेधे वाच्य' इति।

(ख) अयादिसन्धिः

१. अयादिसन्धिविधायकं विधिसूत्रं एचोऽयवायावः इति। अर्थात् एचः क्रमाद् अय्, अव्, आय्, आव् एते स्युरचि। 'एच्' इत्यनेन ए, ओ, ऐ, औ इत्येते वर्णाः बुद्ध्यन्ते। एवं हि ए, ओ, ऐ, औ इत्यादिवर्णाद् अनन्तरं यदि अच्-वर्णाः (स्वरवर्णाः) भवन्ति, तर्हि एचः स्थाने क्रमेण अय्, अव्, आय्, आव्, भवन्ति। एवं वक्तुं शक्यते -

एस्थाने अय्

ओस्थाने अव्

ऐस्थाने आय्

औस्थाने आव्

उदाहरणरूपेण यथा-

हरे + ए =हरये (हर्+अय्+ए)।

विष्णो + ए =विष्णवे (विष्ण्+अव्+ए)।

नै + अकः = नायकः (न्+आय्+अकः)।

पौ + अकः = पावकः (प्+आव्+अकः)।

करौ + एतौ = करावेतौ।

नरौ+ उदारौ = नरावुदारौ।

शे + अयनम् = शयनम्।

वागथौ + इव = वागर्थाविव।

तौ + एकदा = तावेकदा।

कवे + ए = कवये।

भो + अति = भवति।

२. 'वान्तो यि प्रत्यये' इति सूत्रेण यकारादौ, प्रत्यये परे आदौतो अव् आव् भवतः । यथा-

गो + यम् = गव्यम् (ग्+ अव् + यम्)।

नौ + यम् = नाव्यम् (न् + आव् + यम्)

अत्र आदौतोः अर्थात् 'ओ''औ' इत्यनयोः परे 'ाय'-प्रत्ययत्वात् अव्, आव् एतौ आदेशप्राप्तौ ।

३. 'अध्वपरिमाणे च' इति वार्तिकेन अपि अवादेशो भवति । यथा-

गो+ यूतिः = गव्यूतिः।

४. 'लोपः शाकल्यस्य' इति सूत्रेण अवर्णात् / आवर्णात् परस्य पदान्तवकारस्य पदान्तयकारस्य च संहितायाम् अश्-वर्णे परे शाकल्यस्यमतेन लोपो भवति विकल्पेन । यथा-

हरे + एहि = हर एहि (अय्-यलोपः)।

विष्णो+ इह = विष्ण इह (अव्-वलोपः)।

विकल्पाभावे हरयिह, विष्णविह इत्येव भवति।

(ग) गुणसन्धिः-

संस्कृतव्याकरणे 'अ, ए, ओ' इत्येते त्रयो वर्णाः गुणसंज्ञकाः । तत्र सूत्रं वर्त्तते – 'अदेङ् गुणः' इति । गुणसन्धिविधायकं विधिसूत्रं वर्त्तते 'आद्-गुणः' इति अर्थात् अवर्णादचि परे पूर्वपरयोः एको गुण आदेशः स्यात् । अवर्णाद् (अ स्वरवर्णे परे पूर्वपरयोः स्थाने गुणादेशो भवति । यथा-

अ/आ + इ/ई = ए

उप + इन्द्रः (उप् अ+इन्द्रः) = उपेन्द्रः।

गज + इन्द्रः (गज् अ + इन्दः) = गजेन्द्रः।

गण + ईशः (गण् अ + ईशः) = गणेशः।

सुर + ईशः (सुर् अ + ईशः) = सुरेशः।

महा + इन्द्रः (मह् आ + इन्द्रः) = महेन्द्रः।

लता + इव (लत् आ + इव) = लतेव।

उमा+ ईशः (उम् आ + ईशः) = उमेशः।

अ/आ + उ/ऊ = ओ

सूर्य + उदयः (सूर्य् अ + उदयः) = सूर्योदयः।

ज्ञान + उदयः (ज्ञान् अ+उदयः) ज्ञानोदयः।

जल + ऊर्मिः (जल् अ+ ऊर्मिः)= जलोर्मिः।

नव + ऊढा (नव् अ + ऊढा) = नवोढा।

गङ्गा + उदकम् (गङ्ग् आ + उदकम्) = गङ्गोदकम्।

महा + उत्सवः (मह् आ+ उत्सवः) = महोत्सवः।

अ/आ + ऋ/ॠ= अर्

कृष्ण +ऋद्धि : (कृष्ण् अ + ऋद्धिः) = कृष्णद्धि।

ब्रह्म + ऋषिः = ब्रह्मर्षिः।

महा + ऋषिः = महर्षिः।

राजा + ऋषिः = राजर्षिः।

अ/आ + ऌ = अल्

तव + ऌकारः= तवल्कारः।

मम + ऌकार: =ममल्कारः।

(घ) वृद्धिसन्धिः-

अयं सन्धिः गुणापवादं करोति। 'वृद्धिरादैच्' इति सूत्रेण 'आ, ऐ ,औ इत्यते वर्णाः वृद्धिसंज्ञकाः भवन्ति। वृद्धिसन्धिविधायकं सूत्रमस्ति- 'वृद्धिरेचि'। आदेचि परे वृद्धिरेकादेशः स्यात्। यथा -

अ/आ+ ए/ऐ = ऐ

कृष्ण+ एकत्वम् (कृष्ण् अ + एकत्वम्) = कृष्णैकत्वम्।।

तव + एव = तवैव।

देव + ऐश्वर्यम् = देवैश्वर्यम्।

सुर + ऐश्वर्यम् = सुरैश्वर्यम्।

सदा + एव = सदैव।

तथा + एव = तथैव।

अ/आ + ओ/औ = औ

उष्ण + ओदनम् = उष्णोदनम्।

वन + ओषधिः= वनौषधिः।

गङ्गा + ओघः = गङ्गौघः ।

महा + ओषधिः = महौषधिः।

कृष्ण + औत्कण्ठयम् = कृष्णौत्कण्ठ्यम्।

दिव्य + औषधम् = दिव्यौषधम्।

तथा + औत्सुक्यम् = तथौत्सुक्यम्।

(ख) 'एत्येधत्यूठ्सु

अवर्णाद् इण्-धातोः एध्-धातोः च एच्-वर्णे परे तथा ऊठ्-शब्दे परे संहितायां पूर्वपरयो स्थाने एकः वृद्धिरादेशो भवति । यथा-

उप + एधते = उपैधते।

उप + एति= उपैति।

प्रष्ठ + ऊहः =प्रष्ठौहः।

विश्व + ऊहः = विश्वौहः।

(ग) वार्तिकम् - 'अक्षादूहिन्यामुपसंख्यानम्'

अक्षशब्दात् ऊहिनी परे वृद्धिरेकादेश स्थात्। यथा - अक्ष + ऊहिनी = अक्षौहिणी ।

(घ) वार्तिकम् - प्रादूहोढोढ्येषैष्येषु

'प्र-शब्दात्' ऊहः, ऊढः, ऊढिः, एषः, एष्यश्च शब्दानां वृद्धिरेकादेशः स्यात् ।

(ङ) सूत्रम्- उपसर्गादृतिः धातौ

अवर्णान्तात् उपसर्गात् ऋकारदौ(ऋकारः आदिर्यस्य, तस्मिन्) धातौ परे वृद्धिरेकादेशः स्थात् । यथा-

प्र+ ऋच्छति = प्रार्च्छति।

उप + ऋच्छति= उपार्च्छति।

(च) वार्तिकम् - ऋते च तृतीयसमासे

अवर्णात् ऋत-शब्दे परे सति पूर्वपरयोः स्थाने, वृद्धिरेकदेशो भवति यदि तृतीयातत्पुरुषो भवति। यथा-

सुखेन + ऋतः = सुखार्तः।

धनेन + ऋतः = धनार्तः।

तृतीयातत्पुरुषसमासो न भवति चेत् गुणादेश एव भवति । यथा-

परम + ऋतः = परमर्तः।

(छ) वार्तिकम्- प्रवत्सतरकम्बलवसनार्णदशानामृणे-

'प्र, वत्सतर, कम्बल, वसन, ऋण, दश' इत्येतेषु वर्णानामनन्तरं ऋणशब्दो भवति चेत् पूर्वपरयोः स्थाने वृद्धिसंज्ञक एकादेशो भवति । यथा–

प्र + ऋणम् = प्रार्णम्।

वत्सतर + ऋणम् = वत्सतरर्णाम्।

वसन + ऋणम् = वसनार्णम्।

कम्बल + ऋणम् = कम्बलार्णम्।

ऋण +ऋणम् = ऋणार्णम्।

दश + ऋणम् = दशार्णम्।

(ङ) पररूपसन्धिः-

१. पररूपविधायकं विधिसूत्रमस्ति 'एङि पररूपम्' इति। अवर्णान्तात् उपसर्गात् एकारादि-ओकारादि-धातुरूपे परे पूर्वपरयोः एकं पररूपम् आदेशो भवति। यथा-

प्र + एजते = प्रेजते।

उप + ओषति = उपोषति।

२. वार्तिकम्-'शकन्ध्वादिषु पररूपं वाच्यम्' – अर्थात् 'शकन्धु' इत्यादिशब्देषु पररूपमेकादेशो भवति। यथा-

शक + अन्धु = शकन्धु।

कर्क + अन्धुः = कर्कन्धुः।

कुल + अटा = कुलटा।

मनस् (मन) + ईशा = मनीषा।

सार + अङ्ग = सारङ्ग।

मृत + अण्ड = मृतण्डः।

मार्त + अण्ड = मार्तण्डः।

विशेषः- एतद्वार्तिकं दीर्घसन्धेः अपवादकमस्ति। दीर्घसन्धिविषयेऽग्रे आलोच्यते।

३. 'आमाडोश्च' – इत्यनेन सूत्रेण वर्णात् ओम्-शब्दे परे आङ्-शब्दे च परे संहितायां पूर्वपरयोः एकं पररूपं आदेशो भवति। यथा -

शिवाय + ओं नमः = शिवायों नमः।

शिव + एहि= शिवेहि।

(च) दीर्घसन्धिः-

दीर्घसन्धिविधायकं विधिसूत्रमस्ति '**अकः सवर्णे दीर्घः**'। अकः (अ, इ, उ, ऋ ,लृ) सवर्णे अचि परे पूर्वपरयोः दीर्घ एकादेश स्थात्। वस्तुतः 'अ, इ, उ, ऋ, लृ' एते अक्-वर्णाः सन्ति। एतेषां वर्णानामनन्तरं यदि सवर्णाः अ/आ, इ/ई, उ/ऊ, ऋ/ॠ, लृ वर्णाः भवन्ति तर्हि पूर्वपरयोः स्थाने दीर्घ एव भवति। यथा-

अ+ अ = आ

दैत्य + अरि = दैत्यारि।

सुर + अरि = सुरारि।

तव + अपि = तवापि।

धन + अर्थी = धनार्थी।

न्याय+ अधीशः = न्यायाधीशः।

अ + आ = आ

गणेश + आदिः = गणेशादिः।

देव + आलयः = देवालयः।

औषध + आलयः = औषधालयः।

राम+ आज्ञा = रामाज्ञा।

आ + अ = आ

विद्या + आलयः = विद्यालयः।

कृपा + आधारः=कृपाधारः।

इ+इ = ई

कवि + इन्द्रः = कवीन्द्रः।

कपि + इन्द्रः = कपीन्द्रः।

इ+ ई = ई

कवि + ईश्वरः= कवीश्वरः।

कपि + ईश्वरः = कपीश्वरः।

ई+ इ= ई

शची + इन्द्रः = शचीन्द्रः ।

फणी + इन्द्रः = फणीन्द्रः ।

ई+ ई = ई

श्री + ईशः = श्रीशः।

लक्षी + ईश्वरः = लक्ष्मीश्वरः।

उ + उ = ऊ

भानु + उदयः = भानूदयः।

सु + उक्तिः = सूक्तिः।

उ + ऊ = ऊ

लघु + ऊर्मिः = लघूर्मिः।

धेनु + ऊधस्यम् = धेनूधस्यम्।

ऊ+ऊ = ऊ

वधू + उत्सवः = वधूत्सवः।

वधू + उल्लासः = वधूल्लासः।

ऋ + ऋ = ॠ

होतृ + ऋकारः = होतॄकारः।

पितृ + ऋणम् = पितॄणम्।

(छ) पूर्वरूपसन्धिः-

पूर्वरूपसन्धिविधायकं विधिसूत्रं 'एङः पदान्तादति' इति । पदान्त–एङ् वर्णा ह्रस्वे-अकारे परे पूर्वपरयोः एकः पूर्वरूपादेशः भवति । 'एङ्' अर्थात् 'ए, ओ' वर्णौ । अर्थात् पदान्ते विद्यमानात् ए-ओवर्णात् परे यदि ह्रस्वः अवर्णो तिष्ठति तर्हि पूर्वरूपम् एकादशा भवति ।

विशेषः- इदं सूत्रं अयादिसन्धेः अपवादकमस्ति । यथा-

हरे + अव = हरेऽव।

वने + अत्र = वनेऽत्र।

विष्णो + अव = विष्णोऽव।

गृहे + अपि=गृहेऽपि।

विष्णो + अत्र = विष्णोऽत्र।

ब्रह्मणे + अस्मै = ब्रह्मणेऽस्मै।

वने + अस्मिन्= वनेऽस्मिन्।

(ज) अवङ्-सन्धिः

अवङ्-सन्धिविधायकं विधि-सूत्रमस्ति -'अवङ् स्फोटायनस्य' । अयं सन्धिस्तु विकल्पात्मकेव । अस्य सूत्रस्य अर्थो यत्- पदसंज्ञकस्य गोशब्दस्य अचि परे संहितायां विकल्पेन 'अवङ्'- आदेशो भवति । यथा–

गो + अग्रम् = गवाग्रम्।

(झ) प्रकृतिभावः सन्धिः-

१.प्रकृति-भावविधायकं विधिसूत्रमस्ति **'प्लुतप्रगृह्या अचि नित्यम्'** इति । अर्थात् 'प्लुतवर्णेभ्यः प्रगृह्यसंज्ञकेभ्यः अनन्तरं संहितायां यदि स्वरवर्णो विद्यते चेत् तत्र प्रकृतिभाव-सन्धिः भवति। अर्थात् तत्र सन्धिर्न भवति इत्यर्थः । प्रगृह्यविषये अग्रे आलोच्यते । एवं प्लुतवर्णानाम् अचि परे प्रकृतिभावः ।

एहि कृष्ण३+ अत्र गोश्चरति।

ज्ञातव्यम्
लघुसिद्धान्तकौमुद्यां ह्रस्व-दीर्घ-प्लुतानां विवेचनं संज्ञाप्रकरणे एव कृतमस्ति तत्र प्लुतस्तु त्रिमात्रिकः उच्चारणकालः ।

२. **ऋत्यकः-** ऋति परे पदान्ता अकः प्राग्वद्वा । इदं तु सूत्रं विकल्पात्मकं वर्त्तते । यथा –

ब्रह्मा + ऋषिः = ब्रह्म ऋषिः , विकल्पाभावे 'ब्रह्मर्षि' इति भवति ।

३. ईदूदेद्-द्विवचनं प्रगृह्यम्-

ईकारान्तं द्विवचनं, ऊकारान्तं द्विवचनं, एकारान्तं द्विवचनं च प्रगृह्यसंज्ञकं भवति । अतः 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण उक्तानां प्रगृह्यसंज्ञकानां वर्णानामनन्तरं स्वरवर्णो भवति चेत् प्रकृतिभावसन्धिः भवति । अर्थात् स्वरूपं तिष्ठति । यथा-

ईकारान्तद्विवचनम् - हरी + एतौ= हरी एतौ।

मुनी + इमौ = मुनी इमौ।

ऊकारान्तद्विवचनम् - विष्णू + इमौ = विष्णू इमौ ।

भानू + उद्गच्छतः = भानू उद्गच्छतः।

एकारान्तद्विवचनम् - गङ्गे + अमू= गङ्गे अमू।

४. अदसो मात् –

'अदस्'- शब्दस्य येषां रूपाणाम् अन्ते 'मी', 'मू', 'मे' इति वर्णसमुदायो विद्यते, तेषां प्रगृह्यसंज्ञा भवति तथा च 'प्लुतप्रगृह्य अचि नित्यम्' इति सूत्रेण तत्र प्रकृतिभावसन्धि:। यथा-

अमी + ईशाः = अमी ईशाः।

रामकृष्णावमू + आसाते = रामकृष्णवामू आसाते।

५. निपात एकजनाङ् –

इति सूत्रेण 'आङ्' इति वर्जयित्वा अन्यव्यञ्जनविरहिताः एकाचः निपाता: प्रगृह्यसंज्ञकाः भवन्ति। तत्र प्रकृतिभावः भवति । यथा-

इ+ इन्द्रः = इ इन्द्रः।

उ + उमेशः = उ उमेशः।

६. 'ओत'-

इति सूत्रेण ओकारान्त-निपाताः प्रगृह्यसंज्ञकाः भवन्ति । तत्रापि प्रकृतिभावसन्धिः । यथा-

अहो + ईशाः = अहो ईशाः।

नो + इदानीम् = नो इदानीम्।

७. **"सम्बुद्धौ शाकल्यस्येतावनार्षे"**

इति सूत्रेण सम्बोधन-एकवचनान्तरूपस्य ओकारः अवैदिके 'इति'-शब्दे परे शाकल्यस्य मतेन प्रगृह्यसंज्ञको भवति विकल्पेन । तत्रापि प्रकृतसूत्रेण 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृति भावः । यथा –

विष्णो+ इति = विष्णो इति।

विकल्पाभावे विष्णविति अयादिसन्धिः ।

विशेषः- उपर्युक्तस्थलेषु यत्र यत्र प्रगृह्यसंज्ञा जाता, तत्र तत्र प्रकृतभावः सन्धिः भवति । अत: सन्धिकार्यं न भवति। वस्तुतः प्रकृतिभावशब्देन तु सन्ध्यभाव एव मन्यते ।

ज्ञातव्यम्

सन्धि प्रकरणाध्ययनाद् पूर्वम् अवश्यमेव संज्ञाप्रकरणम् अधीतव्यम् । विशेषतया अत्र प्रत्याहारज्ञानं तु नितान्तमेव प्रयोजनीयम् । प्रत्याहार-विधायकसंज्ञासूत्रं तु 'आदिरन्त्येन सहेता' इति । एवं हि प्रत्याहारज्ञानं सम्यक् भवति चेत् सन्धिप्रकरणस्थ- सूत्रोक्तप्रत्याहाराणां वर्णप्रतीतिः शीर्घं भविष्यति । तेन सन्धिकार्यं सरलतया सम्पन्नं भविष्यति ।

अच्सन्धिप्रकरणे प्राप्तानां प्रत्याहाराणां केषाञ्चन विषये अत्र दीयते -

अच् = अ, इ, उ, ऋ, लृ, ए,ओ, ऐ, औ।

इक् = इ, उ, ऋ, लृ।

अक् = अ, इ, उ, ऋ, लृ।

एच् = ए, ओ, ऐ, औ।

एङ् = ए, ओ।

जश् = ज्, ब्, ग्, ड्, द्।

अग्रगत्याः निरीक्षणम्

१. अधःस्थानां पदानां सन्धिविच्छेदं कुरु-

(क) नद्यत्र

(ख) प्रत्येकम्

(ग) अस्त्या

(घ)पित्राज्ञा

(ङ) खल्वत्र

(च) लाकारः

(छ) गव्यम्

(ज) लक्ष्मीश्वरः

(झ) कवीन्द्रः

(ञ) महोत्सवः

(ट) महर्षिः

(ठ)गणेशः

(ड)सदैव

(ढ) वनौषधिः

२. अधोलिखितानां पदानां सन्धिकार्यं कुरु-

क) वागर्थो + इव

ख) हरे + ए

ग) रमा + अत्र

घ) हरे + अव

ङ) करौ+एतौ

च) तौ + एकदा

छ) प्र+ ऋच्छति

ज) हरी + एतौ

८.४ हल्सन्धिप्रकरणम्

हल्सन्धेरपरं नाम व्यञ्जनसन्धिः । सञ्जनेन साकं व्यञ्जनस्य स्वरस्य वा मेलनं व्यञ्जने परिवर्तनञ्च व्यञ्जनसन्धिः उच्यते । व्यञ्जनसन्धेः सूक्ष्मरूपेण लघुसिद्धान्तकौमुद्यनुसारम् एते भेदाः सन्ति -

(क) श्चुत्व सन्धिः

(ख) ष्टुत्वसन्धिः

(ग) जश्त्वसन्धिः

(घ) अनुनासिकसन्धिः

(ङ) अनुस्वारसन्धिः

(च) परसवर्णसन्धिः

(छ) पूर्वसवर्णसन्धिः

(ज) छत्वसन्धिः

(झ) चर्त्वसन्धिः

(ञ) मत्वसन्धिः

(ट) कुक्टुकसन्धिः

(ठ) धुट्सन्धिः

(ड) तुक्सन्धिः

(ढ) ङमुटसन्धिः

(ण) रुत्वसन्धिः

(त) जिह्वामूलीयोपध्मानीयसन्धिः च।

क) श्चुत्वसन्धिः-

श्चुत्वसन्धि विधायकं सूत्रमस्ति 'स्तोः श्चुना श्चुः' इति। सकारतवर्गयो शकारचवर्गाभ्यां योगे शकारचवगौ स्तः। यथा –

रामस् + शेते (स् - श्) = रामश्शेते।

हरिस् + शेते (स् - श्) = हरिश्शेते।

दुस् + चरित्रः (स् - श्) = दुश्चरित्रः।

रामस् + चिनोति (स् - श्) = रामश्चिनोति।

सत् + चित् (त् - च्) = सच्चित्।

सद् + जनः (द् - ज्) = सज्जनः।

याच्+ ना (न्+ ञ) = याच्ञा।

शार्ङ्गिन् + जय (न् - ञ्) = शार्ङ्गिञ्जयः।

अपवादः - ' शात्' इति सूत्रेण शकरात् परस्य तवर्गीयवर्णस्य श्चुत्वं न भवति। यथा –

विश् + नः = विश्नः।

प्रश् + नः = प्रश्नः।

ख) ष्टुत्वसन्धि: -

ष्टुत्वविधायकं विधिसुत्रमस्ति 'ष्टुना ष्टुः' अर्थात् सकार-तकवर्गयोः षकारटवर्गाभ्यां योगे संहितायां षकारटवर्गो भवतः। यथा-

रामस् + षष्ठः (स् - ष्) = रामष्षष्ठः।

रामस् + टीकते (स् - ष्) = रामष्टीकते।

षष् + थः (थ् - ठ्) = षष्ठः।

इष् + तः (त् - ट्)= इष्टः।

तत् + टीका (त् - ट्) = तट्टीका।

चक्रिन् + ढौकसे (न् -ण्) = चक्रिण्ढौकसे।

अपवादः –

१)'न पदान्ताट्टोरनाम' इति सूत्रेण पदान्तटवर्गीयवर्णात् परस्य सकारस्य तवर्गीयवर्णस्य च ष्टुत्वं न भवति । यथा-

षट् + सन्तः = षट् सन्तः।

षट् + ते = षट् ते।

तथा च अनाम्नवतिनगरीणामिति वाच इति वार्तिकेन पदान्तटवर्गात् अनन्तरं विद्यमानान् नाम- नवति-नगरीशब्दान् विहाय तद्भिनानां शब्दानां सकारस्य तवर्गस्य च ष्टुत्वं न भवति। केवलं पदान्तटवर्गात् अनन्तरं विद्यमानानां नाम-नवति-नगरी-शब्दानामेव नकारस्य ष्टुत्वणकारो भवति । यथा-

षड् + नाम (न् - ण्) = षण्णाम्।

षड् + नवतिः (न् - ण्) = षण्णवतिः।

षड् + नगर्यः (न् - ण्) = षण्णगर्यः।

(२) 'तोः षि' इति सूत्रेण तवर्गस्य षकारे परे ष्टुत्वं न भवति । यथा -

सन् + षष्ठः = सन्षष्ठः।

ज्ञातव्यम्

संस्कृतवर्णमालायां पञ्च वर्गाः सन्ति । ते च यथा कवर्गः, चवर्गः, टवर्गः, तवर्गः, पवर्गश्च । व्याकरणे एते वर्गा: कुचुटुतुपु इति उच्यते ।

कवर्गः = क्, ख्, ग्, घ्, ङ्।

चवर्गः = च्, छ्, ज्, झ् , ञ्।

टवर्गः = ट्, ठ्, ड्, ढ्, ण्।

तवर्गः = त्, थ्, द्, ध्, न्।

पवर्गः = प्, फ्, ब्, भ्, म्।

(ग) जशत्वसन्धिः-

जशत्वविधायकं विधिसूत्रमस्ति 'झलां जशोऽन्ते' इति । अर्थात् पदान्ते विद्यमानस्य झल्-वर्णस्य जश् आदेशो भवति ।

झल् = वर्गचतुर्थाः + वर्गतृतीयाः + वर्गद्वितीयः।

जश् = वर्गतृतीयः (ज्, ब्, ग्, ड्, द्) ।

यथा = वाक् + ईशः (क्- ग्) बागीशः।

अच् + अन्तः (च्-ज्) अजन्तः।

षट् + आननः (ट्- ड्) षडाननः।

जगत् + ईशः (त- द्) जगदीशः।

सुप् + अन्तम् (प्+ब्) सुबन्तम्।

(घ) अनुनासिकसन्धिः-

(१) अनुनासिकादेशविधायकं विधिसूत्रं वर्त्तते 'यरोऽनुनासिकेऽनुनासिको वा' इति । अस्य सूत्रस्यार्थो यत्- पदान्ते विद्यमानस्य यस्वर्णस्य अनुनासिके परे विकल्पेन अनुनासिकादेशो भवति । 'यर्' हकारं विहाय सर्वे व्यञ्जनवर्णाः। अनुनासिक वर्णाः - ञ्, म्, ङ्, ण्, न् ।

उदाहरणम्-

एतद् + मुरारिः(द-न्)= एतन्मुरारिः।

वाक् + महिमा (क-ङ्) =वाङ्महिमा।

दिक् + नागः (क्-ङ्) = दिङ्नागः।

वार्तिकम् - 'प्रत्यये भाषायां नित्यम्' इति वार्तिकन लौकिके प्रयोगे तु नित्यम् अनुनासिको भवति। यथा-

तत् + मात्रम् (त् -न्) = तन्मात्रम्।

चित् + मयम् (त् - न्) = चिन्मयम्।

वाक् + मयम् (त् - न्) = वाङ्मयम्।

२. 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रेण अत्र रुप्रकरणे रोः पूर्वस्य अनुनासिको विकल्पेन भवति। यथा-

सम् + स्कारः = सँस्स्कारः।

सम् + स्कृतिः = सँस्स्कृतिः।

(ङ) अनुस्वारसन्धिः -

(१) 'अनुनासिकात्परोऽनुस्वारः' इति सूत्रेण अनुस्वारो विधीयते। अस्य अर्थः एतद्यत् रूत्वप्रकणरणस्य सूत्रै: सिद्धः यः पदान्त - रुँ शब्दः, तस्मात् पूर्वं विद्यमानात् निरनुनासिकात् परः अनुस्वारस्यागमो भवति। यथा-

सम् + स्कर्ता (म् - रु: , रोः पूर्वं (.) अनुस्वारागमः, तदनन्तरं विसर्गे सत्वे संस्स्कर्ता इति।

(२) 'मोऽनुस्वारः' - इति सूत्रेण अपि अनुस्वारो विधीयते। अस्य अर्थो यत् - पदान्तमकारस्य संहितायाम् व्यञ्जने परे अनुस्वारादेशः भवति। यथा-

हरिम् + वन्दे [म् - (.)] = हरिं वन्दे।

भारतम् + वन्दे = भारतं वन्दे।

रामम् + नमामि = रामं नमामि।

सत्यम् + वद = सत्यं वद।

धर्मम् + चर = धर्मं चर।

(३) **"नश्चापदान्तस्य झलि"** इति सूत्रेण अपदान्तमकारस्य अपदान्तनकारस्य च झल्- वर्णे परे संहितायाम् अनुस्वारदेशं भवति। यथा-

यशान् + सि [न्- (.)] = यशांसि।

आक्रम् + स्यते = आक्रंस्यते।

(च) परसवर्णसन्धिः-

(१)"अनुस्वारस्य ययि परसवर्णः" इति सूत्रेण यय्-वर्णे परे परसवर्णादेशो भवति। (यय् - 'श्, ष्, स् ह्' एतान् वर्णाः विहाय अन्यव्यञ्जनवर्णाः) यथा -

शां + तः = शान्तः।

कं + ठः = कण्ठः।

शं + का = शङ्का।

गुं + फितः = गुम्फितः।

अं+ चितः = अञ्चितः।

(२) 'वा पदान्तस्य' - इति सूत्रेण पदान्ते विद्यमानस्य यय्-वर्णे परे विकल्पेन परसवर्णादेशो भवति। यथा-

त्वं + करोषि = त्वङ्करोषि, त्वं करोषि।

फलं + चिनोति = फलञ्चिनोति , फलं चिनोति।

(३) 'तोर्लि' इति सूत्रेण तवर्गीयवर्णस्य लकारे परे संहितायां परसवर्णो भवति। यथा-

तत् + लयः (त्- ल्) = तल्लयः।

तद् + लीनः (द् - ल्) = तल्लीनः।

विद्युत् + लता (त् - ल्) = विद्युल्लता।

(छ) पूर्वसवर्णसन्धिः -

१.**'उदः स्थास्तम्भोः पूर्वस्य'**- इति सूत्रेण उद्-उपसर्गात् परस्य स्था-धातोः स्तम्भधातोः च पूर्वसवर्णादेशो भवति। यथा –

उद् + स्थानम् (स् - थ्) = उत्थानम्।

उद्+ स्तम्भनम् (स् - त्) = उत्तम्भनम्।

अत्र क्रमशः थकारस्य तकारस्य च लोपः 'झरो झरि सवर्णे' इति सूत्रेण विधाय 'खरि च' इति सूत्रेण दस्य चर्त्त्वम्।

२.**'झयो होऽन्यतरस्याम्'** इति सूत्रेण झयः परस्य हस्य विकल्पेन पूर्वसवर्णः आदेशः भवति। (झय् = वर्गप्रथमाः, वर्गद्वितीयाः, वर्गतृतीयाः, वर्गचतुर्थाः वर्णाः)। यथा-

वाक् + हरिः (ह् - घ्)= वाग्घरिः।

अप् + हविः (ह् -भ्) = अब्भिविः।

तद् + हितः (ह - ध्) = तद्धितः।

अज् + हीनम् (ह् - झ्)= अज्झीन।

(ज) छत्त्वसन्धिः -

'शशछोऽटि' इति छत्वविधायकं विधायकं वैकल्पिकं विधिसूत्रम्। अस्य अर्थो यथा- झय्-वर्णात् परस्य शकारस्य अट्-वर्णे परे विकल्पेन छकारादेशो भवति। (अट् = स्वरवर्णाः, हकारः, यकारः, वकारः, रेफश्च)। यथा –

तद् (तच्) + शिवः (श् - छ) = तच्छिवः/तच्शिवः।

सत् (सच्) + शीलः (श् - छ)= सच्छीलः/सच्शीलः।

वार्तिकम् -'छत्वमिति वाच्यम्' इति नियमेन इयः परस्य शकारस्य विकल्पेन छकारादेशो भवति अमि परे सति। यथा- तद् (तच्) + श्लोकेन (श्- छ्)= तच्छलोकेन/तच्श्लोकेन।

(झ) चर्त्वसन्धिः -

(१) **'खरि च'** इति सूत्रेण खरि परे झलां चरः स्युः। (खर्- वर्गद्वितीयाः, वर्गप्रथमा, श, ष, स्)। यथा-

सद् + कारः (द् - त्) = सत्कारः।

उद्+ पन्नः (द् - त्) = उत्पन्नः।

उद्+ साहः (द् - त्) = उत्साहः।

दिग् + पालः (ग् - क्) = दिक्पालः।

(२) **'वाऽवसाने'** इति सूत्रेण अवसाने परे झलां चरः विकल्पेन भवन्ति। यथा -

रामाद् (द् - त्) = रामात् , रामाद् ।

(चर् = वर्गप्रथमाः + श्+ष्, स्) ।

(ञ) मत्वसन्धि: -

(१) **'मो राजि समः क्वौ'** इति सूत्रेण 'सम्'-उपसर्गपूर्वक-राज-धातोः क्विप्-प्रत्ययो विधीयते चेत् सम् - उपसर्गस्य मकारस्य (अनुस्वारं बाधित्वा) मकारादेश एव भवति । यथा- सम् + राट्(म् - म्) = सम्राट्

(२) **'हे मपरे वा'** इति सूत्रेण पदान्तमकारात् अनन्तरं संहितायां 'ह्+ म्' इति वर्णसमुदायो वर्त्तते चेत् पदान्तमकारस्य 'मोऽनुस्वारः' इति सूत्रेण प्राप्तं नित्यम् अनुस्वारादेशं बाधित्वा विकल्पेन मकारादेशो भवति । यथा-

किम् + ह्मलयति = किम् ह्मलयति / किं ह्मलयति।

(ट) कुक्टुक-सन्धिः-

(१) कुक्टुक्सन्धिविधायकं सूत्रम् अस्ति **'ङ्णोः कुक्टुक्शरि'** । अर्थात् अनेन सूत्रेण पदान्ते विद्यमानस्य ङकारस्य णकारस्य च संहितायां शर्-वर्णे परे यथासङ्ख्यम् विकल्पेन कुक् तथा टुक् च इत्यनयोः आदेशो भवति। (शर् = श्, ष्, स्) ।

वार्तिकम् - 'चयो द्वितीयाः शरि पौष्करसादौ वाच्यम्' इति नियमेन पौष्करसाद्याचार्याणामतानुसारेण चय्-प्रत्याहारस्य स्थाने स्ववर्गस्यैव द्वितीयवर्णस्यादेशो भवति। शर्-प्रत्याहारे परे सति । यथा-

प्राङ् + षष्ठः (प्राङ् क् षष्ठः, प्राङ् क् - ख् षष्ठः) = प्राङ्खषष्ठः।

सुगण्+ षष्ठः (सुगण् ट् षष्ठः, सुगण् ट्- ठ्षष्ठः)= सगुण्ठ्षष्ठः।

(ठ) धुट्-सन्धिः -

(१) **'डः सि धुट्'** इति सूत्रेण पदान्तडकारात् परस्य सकारस्य संहितायां विकल्पेन धुडागमः भवति । यथा-

षड् + सन्तः (षड्ध् सन्तः, षड्ध्- त् सन्=षट्त्सन्तः) ।

(२) **'नश्च'**- इति सूत्रेण पदान्तनकारात् परस्य सकारस्य संहितायां विकल्पेन धुडागम: भवति । यथा-

सन् + सः (सन् ध् सः, सन् ध् - तः सः) = सन्त्सः ।

(ड) तुक्-सन्धिः-

१. **'शि तुक्'**- इति सूत्रेण पदान्ते विद्यमानस्य नकारस्य शकारे परे संहितायां विकल्पेन तुगागमो भवति। यथा -

सन् + शम्भुः (सन् त् शम्भुः) , सन् त् = च् शम्भुः,

सन् - ञ् च शम्भुः,

सञ् च् - शम्भुः = सञ्च्शम्भुः

लोपविकल्पे – सञ्च्छम्भुः।

(२) **'छे च'**- इति सूत्रेण ह्रस्वस्वरस्य छकारे परे संहितायां तुगागमो भवति। यथा -

शिव + छाया (शिव त् छाया, शिव त् -च् छ् = शिवच्छाया।

स्व+ छाया = स्वच्छाया।

(३) **'पदान्ताद्वा'** इति सूत्रेण पदान्ते विद्यमानस्य दीर्घस्वरस्य छकारे परे संहितायां विकल्पेन तुगागमो भवति। यथा - लक्ष्मी + छाया = लक्ष्मीच्छाया।

(४) **'आङ्माङोश्च'** इति 'आङ्' इत्यस्य माङ् इत्यस्य च छकारे परे संहितायां तुगागमो भवति। यथा-

आ + छादयति = आच्छादयति।

मा + छिदत् = माच्छिदत्।

(ढ) ङमुट-सन्धिः-

(१) **'ङमो ह्रस्वादचि ङमुण् नित्यम्'** इति सूत्रेण ह्रस्वस्वरात् परः पदान्ते विद्यमानः यः ङ् /ण् /न् - वर्णः, तस्मात् परस्य अच्-वर्णस्य संहितायां डुट् /णुट् /नुट् आगमो भवति। यथा –

प्रत्यङ् + आत्मा (प्रत्यङ् ङ आत्मा) = प्रत्यङ्ङात्मा।

सुगुण् + ईशः = सगुण्णीशः।

सन् + अच्युतः = सन्नच्युतः।

(ण) रुत्वसन्धि: -

(१) **'समः सुटि'** - इति सूत्रेण सम् उपसर्गस्य मकारस्य 'सुट्'-आगमे परे रुँ-आदेशो भवति। यथा-

सम् + स्कृतम् = सँस्स्कृतम् / संस्स्कृतम्।

(२) **'पुमः ख य्यम्परे'** इति सूत्रेण 'पुम्-शब्दात् परः संहितायां खय्-वर्णः,तस्मात् परः च अम्-वर्णो विद्यते चेत् पुम्-शब्दस्य मकारस्य रुँ आदेशो भवति। यथा –

पुम् + कोकिलः = पुँस्कोकिलः/ पुंस्कोकिलः।

(३) **'नश्छव्यप्रशान्'** इति सूत्रेण 'प्रशान्' इति शब्दं वर्जयित्वा, अन्यत्र पदान्तनकारात् परः संहितायां छव्-वर्णः, तस्मात् परः च अम्-वर्णो विद्यते चेत् नकारस्य रुँ आदेशो भवति। यथा-

चक्रिन् + त्रायस्व = चक्रिँस्त्रायस्व /चक्रिंस्त्रायस्य।

कस्मिन् + चित् = कस्मिँश्चित् / कस्मिंश्चित्।

धीमान् + च = धीमाँश्च / धीमांश्च।

(४) **'कानाम्रेडते'** इति सूत्रेण नकारस्य आम्रेडिते (कान्-शब्दे) परे रूँत्वां भवति। यथा-

कान् + कान् = काँस्कान् / कांस्कान्।

(५) **'नॄन् पे'** इति सूत्रेण 'नॄन्'-शब्दस्य अन्तिमनकारस्य पकारे परे संहितायां विकल्पेन रुत्वं भवति।

(६) **'कुप्वोः ∪क ∪ पौ च '** इति सूत्रेण विसर्गस्य ककारे/खकारे परे जिह्वामूलीयः विसर्गः वा भवतः। विसर्गस्य पकारे/फकारे परे उपध्यामानीयः विसर्गः वा भवतः। यथा-

अनुनासिकपक्षे- नॄन् + पाहि = नॄँ पाहि।

अनुस्वारपक्षे = नॄँ पाहि।

विसर्गपक्षे = नॄँ :पाहि, नॄ : पाहि।

रुत्वविकल्पे = नॄन् पाहि।

अपवादसूत्रम्-

'कस्कादिषु च' सूत्रेण कस्कादिगणे निर्दिष्टानां शब्दानां विषये विसर्गस्य सकारादेशः भवति। इण्-वर्णात् परः तु षकारादेशः भवति। यथा -

सर्पिः + कुण्डिका = सर्पिष्कुण्डिका।

धनुः + कपालम् = धनुष्कपालम्।

अग्रगत्याः निरीक्षणम्

३. अधःस्थानां सन्धिविच्छेदं कुरुत -

(क) तच्छिवः

ख) रामश्शेते

(ग) याच्ञा

(घ) वागीशः

ङ) दिङ्नागः

(च) तल्लीनः

(छ) शिवच्छाया

(ज) धीमांश्च

८.५ विसर्गसन्धिः

यदा विसर्गानन्तरं कश्चित् स्वरो व्यञ्जनो वा वर्णः समायाति तदा विसर्गे यो विकार उत्पद्यते स एव विकारो विसर्गसन्धिरुच्यते। विसर्गसन्धेः प्रमुखाः भेदाः यथा-

(क) सत्वसन्धिः

(ख) षत्त्वसन्धिः

(ग) रुत्वसन्धिः

(घ) उत्त्वसन्धिः

(ङ) यत्वविधिलोपसन्धिः

(च) रेफसन्धिः

(छ) रेफलोपसन्धिः

(ज) सुलोपसन्धिः

(क) सत्त्वसन्धिः-

(१) **'विसर्जनीयस्य सः'** - इति सूत्रेण पदान्ते विद्यमानस्य विसर्गस्य संहितायां खर-वर्णे परे सकारादेशः भवति। यथा -

विष्णुः + त्राता = विष्णुस्त्राता।

रामः + तिष्ठति= रामस्तिष्ठति।

देवाः + तिष्ठन्ति = देवास्तिष्ठन्ति।

अपवादसूत्रम्-

'वा शरि' = शर्-वर्णे परे विसर्गस्य विकल्पेन विसर्गादेश एव भवति। यथा-

हरिः + शेते =हरिः शेते।

विकल्पे विसर्गस्य सत्वादिकार्ये हरिश्शेते।

देवः + स्वपिति = देवः स्वपिति।

विकल्पे सत्त्वकार्ये देवशस्स्वपिति।

(ख) षत्वसन्धिः-

'इणः ष' - इति सूत्रेण इण्-वर्णात् परस्य विसर्गस्य पाश-कल्प-क-काम्येषु परेषु षकारो भवति। यथा-

सर्पिः + पाशम् = सर्पिष्पाशम्।

सर्पिः + कल्पम् = सर्पिष्कल्पम्।

सर्पिः + कम् = सर्पिष्कम्।

सर्पिः + काम्यति = सर्पिष्काम्यति।

(ग) रुत्वसन्धिः-

'ससजुषो सः' इति सूत्रेण पदान्तसकारस्य सजुष् शब्दस्य च रुत्वं भवति यथा –

साधुस् + अवदत् = साधुरवदत्।

हरिस् + आगच्छति = हरिरागच्छति।

वधूस् + आयाति = वधूरायाति।

मातुस् + इच्छा = मातुरिच्छा।

(घ) उत्वसन्धिः-

(१) **'अतो रोराप्लुतादप्लुते'** इति सूत्रेण अप्लुत ह्रस्व-अकारात् परस्य 'रु'-इत्यस्य अप्लुत-ह्रस्व-अकारे परे उकारादेशो भवति। यथा -

शिवस्(र्) + अर्च्यः (र्+उ) = शिव (अ उ - ओ) पूर्वरूपं (शिवोऽर्च्यः)

देवस् + अयम् = देवोऽयम्।

सस् + अपि = सोऽपि।

रामस् + अवदत् = रामोऽवदत्।

विशेषः - (स्) रु- स्थाने उ-जाते 'आद्गुणः' इति सूत्रेण अत्र 'ओ' जातः। पश्चात् 'एङ्ः पदान्तादति' इति सूत्रेण पूर्वरूपं भूत्वा प्रयोगसिद्धिः भवति।

२) **'हशि च'** इति सूत्रेण अप्लुत-ह्रस्व-अकारात् परस्य रु- इत्यस्य हश्-वर्णे परे उकारादेशो भवति। अनन्तरं पूर्ववत् गुणादेशः। (हश्- वर्गतृतीयाः वर्गचतुर्थाः, वर्गपञ्चमाः, अन्तःस्थाः हकारश्च)। यथा -

शिवस् (र्) + वन्द्यः = शिवो वन्द्यः।

कृष्णस् (र्) + वदति = कृष्णो वदति।

बालकस् + हसति - बालको हसति।

देवस् + गच्छति = देवो गच्छति।

(ड.) यत्वविधिलोपसन्धिः-

१. **'भोभगोअघोअपूर्वस्य योऽशि'** इति सूत्रेण भोस्, भगोस्, अघोस् - एतेषाम् अन्ये विद्यमानस्य पदान्त-रु-वर्णस्य, तथा च अवर्णात् अनन्तरं विद्यमानस्य पदान्त-रुवर्णस्य संहितायाम् अश्-वर्णे परे यकारादेशः भवति। पुनः 'हलि सर्वेषाम्' इति सूत्रेण यकारलोपो भवति। (अश्- सर्वे स्वराः, वर्गतृतीयचतुर्थपञ्चमाः, अन्तस्थाः, हकारः)। यथा-

भोस् (र्)+ देवाः (र्+य्) (य्-लोपः) = भो देवाः।

भोस् + लक्ष्मि = भो लक्ष्मि।

भगोस् + नमस्ते = भगो नमस्ते।

अघोस्+ याहि = अघो याहि।

देवास् + हसन्ति = देवा हसन्ति।

(च) रेफसन्धिः-

(१) **'रोऽसुपि'** इति सूत्रेण 'अहन्'- इत्यस्य नकारस्य पदान्ते रेफादेशो भवति, परन्तु सुप-प्रत्यये परे न भवति। यथा –

अहन् + अहः (न्-र्) = अहरहः।

अहन् + गणः (न्+ र्) = अहर्गणः।

(छ) रेफलोपसन्धिः-

(१) **'रो रि'** इति सूत्रेण रेफस्य संहितायां रेफे परे लोपो भवति। तत्र 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रेण ढलोपनिमित्तके ढकारे परे। ढकारलोपे कृते, रलोपनिमित्तके रेफे परे रलोपे कृते वा, तस्मात् पूर्वस्य अण्- वर्णस्य दीर्घो भवति। यथा -

पुनर+रमते (र्-लोपः) (अ-आ)= पुना रमते।

अन्तर् + राष्ट्रियः = अन्ता राष्ट्रियः।

हरिर्+ रम्यः= हरी रम्यः।

शम्भुर्+ राजते = शम्भू राजते ।

(ज) सुलोप सन्धिः-

(१) **'एतत्तदो सुलोपोऽकोरनञ्समासे'** इति सूत्रेण नञ्-समासं विहाय अन्यत्र अकार-ककाररहितात् एतद् /तद्-शब्दात् परस्य सु-प्रत्ययस्य व्यञ्जने परे संहितायाः विषये लोपो भवति। यथा-

एषस् + विष्णुः (स् लोपः) = एष विष्णुः।

एषस् + सखा = एष सखा।

सस् + शम्भुः = स शम्भुः ।

सस् + लिखति = स लिखति।

(२) **'सोऽचि लोपे चेत्पादपूरणम्'** - इति सूत्रेण 'सः' इत्यत्र विद्यमानस्य सुप्रत्ययस्य संहितायाम् अचि परे पादपूरणार्थं लोपः भवति, यदि तादृशमेव पादपूरणं सम्भवति । यथा -

सस्+ इमामविड्ढि प्रभृतिम् (स् - लोपः) (गुणः)= सेमामविड्ढि प्रभृतिम्।

सस्+ एष दाशरथी रामः (सन्लोपः) (वृद्धिः) = सैष दाशरथी रामः।

अग्रगत्याः निरीक्षणम्

४. अधः स्थानां पदानां सन्धि विच्छेदं कुरुत-

(क) विष्णुस्त्राता

(ख) सर्पिष्कम्

(ग) साधुरवदत्

(घ) देवोऽयम्

(ङ) अहरहः

(च) एष सखा

८.६. अध्यायात् किमवगतम्-

अस्य अध्यायस्य अध्ययनं कृत्वा वयम् –

- संस्कृतभाषया: सन्धिविषये ज्ञातवन्तः ।
- सन्धिनाम अच् – हल् - विसर्गादि विभागानां विषये ज्ञातवन्तः ।
- स्वर-व्यञ्जन-विसर्गसन्धिनां भेदविषयं ज्ञातवन्तः ।
- सन्धिस्थलेषु किं किं सूत्रं प्रवर्तते तद्विषये ज्ञातवन्तः ।
- सन्धिनां सूत्रसहितम् उदाहरणानि ज्ञातवन्तः ।

८.७. ज्ञानाधिक्यम्

१. लघुसिद्धान्तकौमुदी, गोविन्द प्रसाद शर्मा (व्याख्या) चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०२०

२. लघुसिद्धान्तकौमुदी, हरेकान्त मिश्र(टीका), भारतीयविद्या प्रकाशन, वाराणसी,२०१७

३.अष्टाध्यायी, नरेश झा (व्याख्या), चौखम्बा सुरभारती प्रकाशन, वाराणसी

८.८. अग्रगत्याः निरूपणम्

प्रश्न: : १ : उत्तराणि-

(क) नदी+ अत्र ।

(ख) प्रति + एकम् ।

(ग) अस्ति+ आत्मा।

(घ) पितृ+ आज्ञा ।

(ङ) खलु+ अत्र।

(च) लृ+ आकार ।

(छ) गो+ यम् ।

(ज) लक्ष्मी+ ईश्वरः ।

(झ) कवी+ इन्द्रः ।

(ञ) महा+ उत्सवः ।

(ट) महा+ ऋषिः ।

(ठ) गण + ईशः ।

(ड) सदा + एव ।

(ढ) वन+ औषधि।

प्रश्नः २ : उत्तराणि -

(क) वागर्थौ।

(ख) हरये ।

(ग) रमात्र ।

(घ) हरेऽव।

(ङ) करावेतौ ।

(च) तावेकदा।

(छ) प्रार्च्छति ।

(ज) हरी एतौ।

प्रश्नः ३ : उत्तराणि -

(क) तत्+ शिव: ।

(ख) रामः + शेते।

(ग) याच् + ना।

(घ) वाक्+ईश: ।

(ङ) दिक्+ नाग: ।

(च) तत्+ लीन: ।

(छ) शिव + छाया ।

(ज) धीमान्+ च ।

प्रश्न: ४ : उत्तराणि

(क) विष्णु: + त्राता ।

(ख) सर्पि:+ कम्।

(ग) साधु: + अवदत्।

(घ) देव: + अयम् ।

(ङ) अहन् + अह: ।

(च) एषः+ सखा।

⑦८.९. अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

(१) शिक्षार्थी इत्यत्र कः सन्धि: ?

(२) सुध्युपास्य इत्यत्र कः सन्धि:?

(३) महोदयः इत्यत्र कः विग्रहः?

(४) पररूपविधायकं सूत्रं लिखत ।

(५) श्चुत्वविधायकं सूत्रं किम् ?

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

१. इको यणचि

२. वृद्धिरादैच

३. ष्टुना ष्टुः

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

१. अच्सन्धिविषये एको लेखः प्रस्तुयताम्।

२. हल् - सन्धेः पञ्चप्रयोगाः ससुत्रोदाहरणं प्रदर्शनीया।

३. विसर्गसन्धेः पञ्चप्रयोगाः ससूत्रं लेखनीयाः।

*****

अध्यायः ९ : कारकप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

अध्यायस्य संरचना

९.१. उद्देश्यम्

९.२. परिचयः

९.३. कारकसंज्ञा

९.४. कारकविभक्ति उपपदविभक्तेः वलीयसी

९.५. कारकप्रकाराः

९.५.१ कर्ताकारकः प्रथमाविभक्तिश्च

९.५.२. कर्मकारकः द्वितीया विभक्तिश्च

९.५.३ करणकारकः तृतीयाविभक्तिश्च

९.५.४ सम्प्रदानकारकः चतुर्थीविभक्तिश्च

९.५.५ अपादानकारकः पञ्चमीविभक्तिश्च

९.५.६ सम्बन्धपदः षष्ठीविभक्तिश्च

९.५.७ अधिकरणकारकः सप्तमीविभक्तिश्च

९.६ अध्यायात् किमवगतम्

९.७ ज्ञानाधिक्यम्

९.८ अग्रगत्याः निरूपणम्

९.९ अभ्यासप्रश्नाः

९.१. उद्देश्यम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान्

- कारकस्य परिभाषां ज्ञास्यति।
- कारकस्य प्रकारान् ज्ञास्यति।
- कारकस्य विभक्तेः च सम्बन्धविषये ज्ञास्यति।
- कारकस्य विभक्तेः च सम्यक् प्रयोगेन वाक्यनिर्माणं करिष्यति।

९.२. परिचयः

अस्मिन् अध्याये भवन्तः कारकस्य परिभाषां, कारकस्य प्रकाराः, कारकस्य विभक्तेः च सम्बन्धः, कारकविशेषे विभक्तिविशेषस्य प्रयोगः इत्यादि विषयाः उदाहरणेन सह अध्ययनं कर्तुं शक्यते। कारकविभक्तेः सम्यक् ज्ञानेन वाक्यनिर्माणमपि सहजं जातम्।

९.३. कारकसंज्ञा

क्रियया सह सम्बन्धितं पदमेव कारकम् । व्याकरणे "क्रियान्वयि कारकम्" इति कारकस्य परिभाषा अस्ति। पुनः "क्रियाजनकत्वं कारकम्" इति कारकस्य अन्यमेका परिभाषा प्राप्यते।

९.४. कारकविभक्ति उपपदविभक्तेः वलीयसी

उपपदविभक्तेः कारकविभक्तिर्वलीयसी उपर्युक्तविमर्शात् भवन्तः कारकपरिभाषां ज्ञातवन्तः । क्रियायोगे निष्पन्नो विभक्ति कारकविभक्ति इत्युच्यते । यथा- चन्द्रं पश्यति बालकः । अत्र ' पश्यति' इति क्रियायोगे 'बालकः' इति पदे प्रथमाविभक्ति भवति। अत एव एषः कारकविभकिः।

शब्दयोगेऽपि विभक्तिप्रयोगः भवति । शब्दयोगे प्रयुक्तविभकिं उपपदविभक्ति इति उच्यते । यथा- कृष्णाय नमः । नमशब्देन यस्मै अभिवादनं सम्बोधितं तत्र चतुर्थीविभक्तिः भवति ।

नमशब्दस्य कृधातोः अनुवर्तते स्यात्। अथ नमशब्दः "नमस्करोति स्यात्, क्रियापदं भवतीत्यर्थः। अत्र "नमः' इति शब्दे चतुर्थी विभक्तिः न स्यात्, किन्तु द्वितीयाविभक्तिः भवति कृधातोः योगे। अत एव - "वासुदेवाय नमः" - अत्र 'नमस्' इति शब्दयोगे वासुदेवशब्दात् परं चतुर्थीविभक्ति स्यात्। किन्तु "वासुदेवं नमस्करोति" अत्र नमस्' शब्दात् परं कृधातोः योजितः, धातोः अर्थे द्वितीयाविभक्तिः एव भवति। यदा कस्मिंश्चित् प्रसङ्गे उपपदविभकिः कारकविभक्तिः च उभयोः व्यवहारः करणीयः, तदा उपपदस्य स्थाने केवलं कारकविभक्तेः प्रत्योगः करणीयः। अत एव उक्तमस्ति- "उपपदविभक्ते कारकविभक्तिर्वलीयसी "।

९.५. कारकप्रकाराः

कारकाः षड्विधाः यथा कर्ताकारकः, कर्मकारकः, करणकारकः, सम्प्रदानकारकः, आपादानकारकः, अधिकरणकारकः च। प्रत्येककारकस्य निबन्धनविभक्तिः अस्ति। कर्ताकारकः प्रथमा विभक्तियुक्तः, कर्मकारकः द्वितीयाविभक्तियुक्तः, करणकारकः तृतीयाविभक्तियुक्तः, सम्प्रदानकारकः चतुर्थीविभक्तियुक्तः, आपादानकारकः पञ्चमीविभक्तियुक्तः, अधिकरणकारकः सप्तमीविभक्तियुक्तः।

अग्रगत्याः निरूपणम्

१. कारकस्य का परिभाषा ?

.....

२. कारकः कतिप्रकारकः ?

.....

९.५.१ कर्ताकारकः प्रथमा विभक्तिश्च

यः मुख्यतया कार्यं करोति स एव कर्ता इत्युच्यते । स्वतन्त्रतया कार्यं करोति इति कर्ता । अत एव उच्यते यत् " स्वतन्तः कर्ताः" इति। उदाहरणं यथा- "माधवः लिखति"। अत्र माधवः तु स्वतंत्र कर्ता यः "लिख" धात्वान्तर्गतः लिखनकार्यः स्वयमेव करोति इति।

कर्तरि प्रथमा- कर्तापदे प्रथमा भवति । उदाहरणं यथा- मयुरः नृत्यति । अत्र मयुरः स्वतन्तकर्ता, यत्र प्रथमा विभक्तिः भवति।

क) "प्रातिपदिकार्थलिङ्गपरिमाणबचनमात्रे प्रथमा।" अर्थात् प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे संख्यामात्रे च प्रथमाविभक्तिः भवति ।

प्रातिपदिकार्थमात्रे उदाहरणं यथा- उच्चैः । कृष्णः । श्री । ज्ञानम् ।

लिङ्गमात्रे उदाहरणं यथा- ततः, ततौ, ततम् ।

परिमाणमात्रे उदाहरणं यथा- द्रोणो व्रीहिः ।

संख्यामात्रे उदाहरणं यथा- एकः, द्वौ, बहवः ।

(ख) सम्बोधने च । अर्थात् सम्बोधने अपि प्रथमा विभक्तिः भवति । उदाहरणंयथा - हे राम ।

९.५.२. कर्मकारकः द्वितीया विभक्तिश्च

(क) कर्तुरीप्सिततमं कर्म :- कर्तुः क्रियया आप्तुम् इष्टतमं कारकं कर्मसंज्ञं स्यात् । अर्थात् वाक्ये यत् वस्तु वा कर्ता क्रियापदद्वारा अधिकतया कामयते तत् कर्म उच्यते । कर्मणि सर्वदा द्वितीयाविभक्ति भवति । अत एव उक्तमस्ति- अनुक्ते कर्मणि द्वितीया स्यात्। उदाहरणं यथा- हरिं भजति। बालकः अन्नं खादति। अत्र बालकः इति कर्तापदेन अन्नमिति कर्मपदम् अधिकतया कामयते। अतः "अन्नम्" इति पदे द्वितीया विभक्ति भवति।

(ख) अकथितं च-अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। अप्रधानकर्मेव अकथितं कर्म इत्युच्यते। यत्र अपादानादिकारकाणाम् अर्थः व्युत्पद्यमानः सन्नपि कर्तारं तस्य प्रयोगः अभीष्टः न भवतु तत् अकथितम् इत्युच्यते। एतेषां अकथितधातूनां संख्या १६ सन्ति। एतेषां समानार्थिशब्दानामपि अकथितसंज्ञा भवति, तैः सह चापि कर्मकारकसंज्ञा विधीयते। 'दुहयाच्पच्चदण्डरूधिप्रच्छिचिब्रुशासुजिमथ् मुषाम् कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।' अनेन सूत्रानुसारेण १६ धातवाः सन्ति- दुह्, याच्,पच्, दण्ड्, रुधि, प्रच्छ, चि, ब्रु, शास्,जी, मथ,मुष्, नी, हृ, कृष्,वह्। गां दोग्धि पयः। बलिं याचते वसुधाम्। तण्डुलानोदनं पचति। गर्गान् शतं दण्डयति। व्रजमवरुणाद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। मानवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति हरति कर्षति वहति वा ।

अग्रगत्याः निरूपणम्

३. कर्ताकारके का विभक्तिः भवति ?

.....

४. लिङमात्रे प्रथमाविभक्तेः सूत्र किम् ?

.....

५. सम्बोधने का विभक्तिः भवति ?

.....

६. कर्मकारकस्य संज्ञा का?

.....

७ "अकथितं च" इति सूत्रेण, किं कारकं, का विभक्तिः च भवति?

.....

९.५.३. करणकारकः तृतीयाविभक्तिश्च

(क) **साधकतमं करणम्-** क्रियासिद्धौ प्रकृष्टोपकरकं कारणसंज्ञं स्यात्। अर्थात् कार्यस्य सिद्धर्थं यत् अधिकं आवश्यकं तत् करणकारकम् इति । करणकारके तृतीयाविभक्ति भवति । सूत्रमस्ति **'कर्तृकरणयोस्तृतीया'** । अर्थात् अनभिहिते कर्तरि करणे च तृतीया स्यात्। उदाहरणं यथा- रामेण बाणेन हतो बाली। अत्र 'बाण' इति पदं तु प्रकृष्टोपकारकं, तदर्थम् अस्मिन् शब्दे तृतीयाविभक्तिः भवति।

(१) **सहयुक्तेअप्रधाने**- सहार्थेन युक्ते अप्रधाने तृतीया स्यात्। उदाहरणं यथा- पुत्रेण सहागतः पिता।

(२) **येनाङ्गविकारः**- येन अङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात् । उदारणं यथा- अक्ष्णा काणः। अत्र अङ्गविकारः किम् ? अक्षि काणमस्य।

अग्रगत्याः निरूपणम्

८. करणकारकस्य संज्ञा का ?

.....

९. सहयोगे का विभक्तिः?

.....

१०.अङ्गविकारे केन सूत्रेण तृतीयाविभक्तिः भवति?

.....

९.५.४ सम्प्रदानकारकः चतुर्थीविभक्तिश्च

(१) कर्मणा यमभिप्रैति स सम्प्रदानम्। अर्थात् दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्। अर्थात् यस्मै दानं दीयते तस्य दानग्राहकस्य सम्प्रदानसंज्ञः भवेत्। अत एव उक्तमस्ति- यस्मै दानं सम्प्रदानम्। सम्प्रदानकारके चतुर्थीविभक्तिः भवति – चतुर्थी सम्प्रदाने । उदाहरणं यथा – विप्राय गां ददाति । अत्र विप्रः दानग्राहकः, अत एव विप्र इति पदे चतुर्थीविभक्तिः भवति।

(२) **नमस्स्वस्तिस्वाहास्वधालंवषड्योगाच्च एभिः** अर्थात् नमः-स्वस्ति-स्वाहा-स्वधा-अलम्-वषड् च योगेषु चतुर्थी विभक्तिः भवति। उदाहरणं यथा- हरये नमः। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा।

(३) **रुच्यर्थानां प्रीयमाणः** रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्। उदाहरणं यथा- हरये रोचते भक्तिः।

(४) **स्पृहेरीप्सितः** - स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। उदाहरणं यथा- पुष्पेभ्यः स्पृहयति।

९.५.५ अपादानकारकः पञ्चमीविभक्तिश्च

(१) **ध्रुवमपायेऽपादानम्-** अपादानशब्दस्य अर्थः विश्लेषः, दूरं गन्तुं, पतनम् इत्यादयः। अपायो विश्लेषः तस्मिन् साध्ये यद् ध्रुवम् अवधिभूतं कारकं तद् अपादानं स्यात्। अपादानकारके पञ्चमीविभक्तिः भवेत। अत एव सूत्रमस्ति यथा - **अपादाने पञ्चमी** इति। उदाहरणं यथा - ग्रामात् आयाति, धावतो अश्वात् पतति।

(२) **भीत्रार्थानां भयहेतुः**- भयार्थानां त्राणार्थानां च प्रयोगे हेतुः अपादानं स्यात्। उदाहरणं यथा - चोराद् बिभेति।

(३) **पराजेरसोढः** - पराजेः प्रयोगेः असहयोऽर्थः अपादानं स्यात्। उदाहरणं यथा- अध्ययनात् पराजयते। ग्लायतीत्यर्थः।

अग्रगत्याः निरूपणम्

११. सम्प्रदानकारके का विभक्तिः ?

.....

१२. नमःशब्दयोगे चतुर्थीविभक्तेः उदाहरणं ददातु ?

.....

१३. अपादानशब्दस्य अर्थः कः ?

.....

९.५.६ सम्बन्धपदः षष्ठीविभक्तिश्च

सम्बन्धपदस्य कर्मणा सह सम्बन्धः नास्ति। अत एव सम्बन्धपदः कारके अन्तर्भुक्तः नास्ति। वाक्ये अन्यैः पदैः सह एव सम्बन्धपदस्य सम्पर्कः।

(१) **षष्ठी शेषे-** कारकप्रातिपादिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः शेषः तत्र षष्ठी। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव।

उदाहरणं यथा- राज्ञः पुरुषः।

९.५.७ अधिकरणकारकः सप्तमीविभक्तिश्च

(१) आधारोऽधिकरणम्- कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं स्यात् । अधिकरणकारके सप्तमी विभक्ति भवति । तदुक्तमस्ति- सप्तम्यधिकरणे च । च कारात् दूरान्तिकार्थेभ्यः । औपश्लेषिको विषयिकोऽभिव्यापकः चेति आधारः त्रिधा । अर्थात् आधारः त्रिप्रकारकाः- औपश्लेषिकः, वैषयिकः, अभिव्यापकश्च । औपश्लेषिकस्य उदाहरणं यथा- कटे आस्ते । वैषयिकस्य उदाहरणं यथा- मोक्षे इच्छाऽअस्ति। अभिव्यापकस्य उदाहरणं यथा- तिलेषु तैलं वर्तते।

अग्रगत्याः निरूपणम्

१४. अधिकरणकारके विभक्ति का?

.....

१५. आधार: कतिविध: ?

.....

९.६ अध्यायात् किमवगतम्

अस्य अध्यायस्य अध्ययनानन्तरं भवन्तः-

(१) क्रियासम्बन्धानि पदानि एव केवलं कारकं भवितुमर्हति इति ज्ञातवन्तः।

(२) षष्ठीविभक्तियुक्तपदस्य क्रियया सह सम्पर्कं नास्ति । अत षष्ठीविभक्तियुक्तपदं तु कारकं इति भवितुं न शक्नोति इति ज्ञातवन्तः।

(३) षष्ठीविभक्तियुक्त: पद: सम्बन्धपदः इति विषये ज्ञातवन्तः।

(४) विभिन्नैः कारकैः सह विभिन्नानां विभक्तिनां सम्बन्धविषयेऽपि ज्ञातवन्तः ।

९.७ ज्ञानाधिक्यम्

(१) चक्रवर्ती, ड° सत्यनारयण (२०१०), पाणिनीय शब्दशास्त्र, कलकता: संस्कृत पुस्तक भाण्डार।

(२) वसु, श्रीश चन्द्र(२००९), दय अष्टाध्यायी अव् पाणिनि। (१म, २य च खण्डः) दिल्लीः मतिलाल वाणारसी दास पाव्लिचार्य प्राइभेट् लिमिटेड्।

(३) शर्मा, माधवकृष्ण(२००९) पाणिनि, कल्यायण एण्ड, पतञ्जलिः, दिल्ली: श्री लाल वाहादुर शास्त्री राष्ट्रीय विद्यापीठ।

(४) विद्यासागर, ईश्वरचन्द्र, समग्रव्याकरणकौमुदी, कलिकता: देवसाहित्य कुटीर प्राइभेट् लिमिटेड्।

(५) भट्टाचार्य हरिचन्द्र (१९९३), संस्कृत व्याकरण प्रभा, गुवाहाटी वरुवा एजेन्सी।

९.८ अग्रगत्याः निरूपणम्

उत्तरम् : १ : क्रियाजनकत्वं कारकम्।

उत्तरम् : २ : कारक षड्विधः। ते यथा- कर्ताकारकः, कर्मकारकः, करणकारकः, सम्प्रदानकारकः, आपादान-कारकः, अधिकरणकारकः च।

उत्तरम् : ३ : कर्ताकारके प्रथमाविभक्तिर्भवति।

उत्तरम् : ४ : लिङ्गमात्रे प्रथमाविभक्तेः सूत्रमस्ति- प्रातिपादिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा।

उत्तरम् : ५ : प्रथमाविभक्तिर्भवति।

उत्तरम् : ६ : "कतुरीप्सिततमं कर्म" इति कर्मकारकस्य संज्ञा।

उत्तरम् : ७ : "अकथितं च" इति सूत्रेण कर्मकारके द्वितीयाविभक्ति भवति।

उत्तरम् : ८ : करणकारकस्य संज्ञा अस्ति "साधकतमं करणम्" इति।

उत्तरम् : ९ : सहयोगे तृतीया विभक्तिर्भवति।

उत्तरम् : १० : अङ्गविकारे "येनाङ्गविकारः" इति सूत्रेण तृतीया भवति।

उत्तरम् : ११ : सम्प्रदानकारके चतुर्थीविभक्तिर्भवति।

उत्तरम् : १२ : शिवाय नमः।

उत्तरम् : १३ : अपादानशब्दस्य अर्थः विश्लेषः।

उत्तरम् : १४ : सप्तमीविभक्तिः।

उत्तरम् : १५ : आधारः त्रिविधः -औपश्लेषिकः, वैषयिकः, अभिव्यापकश्च।

⑦९.९ अभ्यासप्रश्नाः

(क) **वस्तुधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

१. किं नाम कारकम् ? तस्य विभागानि कानि ?

(ख) **संक्षेपप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया

१. स्वतंत्रः कर्ता,

२. कतुरीप्सिततमं कर्मः,

३. अकथितं च,

४. आधारो अधिकणम्।

(ग) **रचनाधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

१. उपपदविभक्तेः कारकविभकिर्वलीयसी - व्याख्या कुर्वन्तु।

२. कारकविषयम् अधिकृत्य एको निबन्धो लिखन्तु।

*****

अध्यायः १० : समासप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

अध्यायस्य संरचना

१०.१. उद्देश्यम्

१०.२. परिचयः

१०.३. समासलक्षणम्

१०.४. समासस्य साधारणनियमाः

१०.५. समासप्रकाराः

१०.५.१. अव्ययीभावसमास:

१०.५.२. तत्पुरुषसमासः

१०.५.३. बहुव्रीहि समासः

१०.५.४. दन्द्वसमासः

१०.६ अध्यायात् किमवगतम्

१०.७ ज्ञानाधिक्यम्

१०.८ अग्रगत्याः निरूपणम्

१०.९ अभ्यासप्रश्नाः

१०.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनादनन्तरं भवान् -

- समासलक्षणविषये ज्ञास्यति।
- समासस्य विभिन्नप्रकारैः सह परिचितं भविष्यति।
- समासस्य साधारणनियमविषये ज्ञास्यति।
- उदाहरणेन सह समासविषये ज्ञास्यति।

१०.२ परिचयः

अस्मिन् अध्याये प्रधानतः भवन्तः समासविषये अध्ययनं करिष्यन्ति । समासपदस्य अर्थोऽस्ति - संक्षिप्तकरणम्। समासनियमैः संक्षिप्तकरणं भवति। समासनियमविषयेऽपि अस्मिन् अध्याये अध्ययनं करिष्यति। समासवद्धपदविषये अपि ज्ञातुं शक्ष्यति । समासवद्धपदं यथा- यदुनन्दन,नीलाम्बर, पीताम्बर, सुगन्धि, राजपथ, रामलक्ष्मणै इत्यादयः । समासवद्धपदानां मध्ये सम्पर्कः अनिवार्यः, अन्यथा समासं न भवति इति विषयेऽपि अस्मिन् अध्याये ज्ञातुं शक्ष्यति।

१०.३. समासलक्षम्

समासशब्दस्य संक्षिप्तकरणमित्यर्थः । यदा पदद्वयस्य वा पदाधिकस्य वा संयोगेन पदमेकं गठितं भवति, तदा समास उच्यते । यथा, रामः च लक्ष्मणः च = रामलक्ष्मणौ। यदा द्वौ वा अधिकौ वा सम्बन्धिनौ पदौ मिलित्वा पदमेकं सञ्जायते तदा सः समासः इति उच्यते । पदस्य निर्माणार्थं समासपदानां प्रयोगः भवति । अत एव एकपदत्वभावः समासस्य आधारः एकपदीभावः समासः । यथा- मातुः स्नेहः = मातृस्नेहः समासे पदानां मध्ये सम्बन्धः अवश्यं भवेत् । पदसम्बन्धरहितं समासः न जायते । समासलक्षणं यथा- "समर्थः पदविधिः ।" लघुसिद्धान्तकौमुदीग्रन्थे समासलक्षणं यथा - समासनं समासः ।

१०.४. समासस्य साधारणनियमाः

(क) समासान्तर्गतः विभक्तिलोपः भवति, केवलम् अन्त्यपदस्य विभक्तिः तिष्ठति । उदाहरणं यथा - पितुः तर्पणम् पितृतर्पणम् । अत्र 'पितुः' शब्दस्य षष्ठीविभक्तिलोपः भवति । समासवद्धपदे 'तर्पणम्' इति पदस्य विभक्तिः भवति ।

(ख) समासे सर्वाणि पदानि मिलित्वा प्रातिपादिकं निर्माति, अन्तिमे समस्तपदं तु बहुवचनान्तं भवति । यथा- कमलः च रमेशः च माणिकः च = कमलरमेशमाणिकाः ।

(ग) यानि पदानि समासस्य निर्माणं कुर्वन्ति तानि समस्यमानपदमिति उच्यते । समासार्थप्रतिपादनार्थं प्रयुक्तं वाक्यं व्यासवाक्यमिति कथ्यते । समासबद्धपदं तु समस्तपदमिति उच्यते ।

(घ) यदि स्वरवर्णः अस्ति तर्हि परस्य पदस्य अन्ते नकारस्य लोपर्भवति । यथा- राज्ञः समीपे - उपराजम् । अत्र राजन् शब्दस्य नकारस्य लोपं भुत्वा उपराजम् इति पदं निष्पन्नम् ।

(ङ) समासे पूर्वपदस्य नकारस्य लोपः भवति । यथा- राज्ञः पुरुषः = राजपुरुषः। अत्र 'राजन्' इति प्रातिपादिकस्य' न्- कारस्य लोपर्भवति ।

(च) यदा स्वरवर्णः पृष्ठतः भवति तदा नञ्तत्पुरुषस्य नकारस्य स्थाने 'अन्' भवति । उदाहरणं यथा - न आचारः = अनाचारः ।

(छ) व्यञ्जनवर्णानां अनुसरणं चेत् 'नञ्' इत्यत्र न कारस्य स्थाने 'अ' भवति । यथा न कालः = अकालः। न पुष्पम् = अपुष्पम् ।

१०.५. समासप्रकाराः

महामुनिपाणिनिमतानुसारेण समासाः चतुर्विधाः - अव्ययीभावः, तत्पुरुषः, बहुब्रीहिः, द्वन्दसमासः च । पाणिनिमतानुसारेण कर्मधारयः द्विगु च तत्पुरुषसमासान्तर्गतः । परन्तु, लघुसिद्धान्त-कौमुद्यानुसारेण केवलसमासः प्रथमः । अव्ययीभाव समासः द्वितीयः । तत्पुरुषः तृतीयः । तत्पुरुषभेदः कर्मधारयः । कर्मधारयभेदो द्विगुः । बहुब्रीहिः चतुर्थः । दन्द्वसमासः पञ्चमः ।

१०.५.१. अव्ययीभावः समासः

१) केवलसमासः - विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः । अर्थात् यस्य समासस्य विशिष्टपरिभाषा नास्ति सः एव केवलसमासः इत्युच्यते ।

२) अव्ययीभावसमासः - प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावसमासः । अर्थात् अव्ययीभावसमासे पूर्वपदस्य प्राधान्यता वर्तते । अव्ययं विभकि-समीप-समृद्धि-व्यृद्धर्थाभावात् यया - सम्प्रतिशब्दप्रादुर्भाव-पश्चाद्यथानुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्त-वचनेषु ।

अर्थात् विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते सः अव्ययीभावः । विभक्तेः उदाहरणं यथा- कानने = अधिकाननम् । सर्पाः अधिकाननं निवसन्ति ।

सामीप्यार्थे उदाहरणं यथा - कृष्णस्य समीपे - उपकृष्णम् ।

"अव्ययीभावश्च" इति सूत्रेण अव्ययी भावसमासबद्धपदं नपुंसकलिङ्गे भवेत् ।

अव्ययीभावे चाकले - सहस्य सः स्यात् अव्ययीभावे न तु काले । अर्थात् अव्ययीभावसमासे कालवाचकशब्दान् विहाय परवर्ती-अन्यपदे 'सह' शब्दस्य स्थाने 'स' भवति । उदाहरणं यथा - हरेः सादृश्यं सहरि । चक्रेण युगवत् सचक्रम् ।

नदीभिश्च - नदीभिः । सह संख्या समस्यते । अर्थात् नदीवाचकसुबन्तेन सह संख्यावाचक - समर्थ-सुबन्तस्य विकल्पेन समासः भवति । उदाहरणं यथा- पञ्चगङ्गम् । द्वियमुनम् ।

अव्ययीभावे शरत्प्रभृतिः - शरदादिभ्यष्टच् स्यात् समासान्तोऽव्ययीभावे । अर्थात् शरदप्रभृतेः शब्दयोगे अव्ययीभावसमासः भवति, समासान्तपदे टच्प्रत्ययः । उदाहरणं यथा - शरदः समीपम् उपशरदम् । प्रतिविपाशम् ।

१०.५.२ तत्पुरुषसमासः

तत्पुरुषसमासः प्रायेण उत्तरपदार्थप्रधानः तत्पुरुषसमासः ।

द्विगुश्चः - द्विगुरपि तत्पुरुषसंज्ञकः स्यात् ।

द्वितीया तत्पुरुषसमासः

द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः –

द्वितीयान्त श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते, स च तत्पुरुषः । अर्थात् द्वितीयाविक्तियुक्तः श्रित-अतीत-पतित-गत-अत्यस्त-प्राप्त-आपन्नैः सह द्वितीयान्तपदस्य समासः भवति । उदाहरणं यथा - कृष्णं श्रितः कृष्णश्रितः ,आरोग्यम् अतीतः आरोग्यातीतः ।

तृतीया तत्पुरुषसमासः

कर्तृकरणे कृता बहुलम् -

कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत् अर्थात् कृत्प्रत्ययान्तपदेन सह तृतीयान्तपदस्य समासः स्यात् । कर्तृ-कर्तायाः तथा च कर्मे तृतीयान्तपदः विकल्पेन समासवद्धः भवति । उदारणं यथा –

हरिणा त्राणो - हरित्राणः ।

मुनिना दृष्टम् - मुनिदृष्टम् ।

चतुर्थी तत्पुरुषसमासः

चतुर्थी तदर्थार्थवलिहितसुखरक्षितैः -

चतुर्थ्यन्तार्थाय यत् तद् वाचिना अर्थादिभिः च चतुर्थान्त वा प्राग्वत् । अर्थात् तदर्थ- वलि-हित-सुख-रक्षित-प्रभृतिषु योगेषु चतुर्थी विभक्तियुक्तपदस्य समासः भवति । उदाहरणं यथा -

युपाय दारु - यूपदारु ।

भूताय वलिः - भूतवलिः ।

गवे सुखम् - गोसुखम् ।

पञ्चमी तत्पुरुषसमासः

पञ्चमी भयेन – भयवाचक शब्दयोगे पञ्चमीविभक्त्यन्तपदे समासः भवति ।

उदाहरणं यथा = चोराद्भयं चोरभयम् ।

षष्ठीतत्पुरुषसमासः

षष्ठी- सुबन्तेन प्राग्वत् । अर्थात् सुबन्तपदेन सह षष्ठीविभक्त्यन्तपदस्य समासः भवति । उदाहरणं यथा -

राज्ञः पुरुषः - राजपुरुषः ।

ब्राह्मणस्य वस्त्रम् - ब्राह्मणवस्त्रम् ।

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे –

अवयविना सह पूर्वादयः समस्यन्ते एकत्वसङ्ख्याविशिष्टश्चेदवयवा । अर्थात् पूर्व-अपर-अधर-उत्तरम्-एकदेशिना-एकाधिकरण-प्रभृत्तिभिः अंशवाचकशब्दैः सह एकवचननान्त-अंशिवाचकशब्दस्य समासः भवति । उदाहरण यथा- पूर्वं कायस्य - पूर्वकायः ।

अर्धं नपुंसकम् :

समासवाच्यर्धशब्दो नित्यं क्लीबे प्राग्वत् । अर्थात् नित्य-नपुंसकसमासवाची-अर्धशब्दस्य सुबन्तपदेन सह विकल्पेन समासः भवति । उदाहरणं यथा - अर्धं पिप्पल्या अर्धपिप्पली ।

सप्तमीतत्पुरुषसमासः

सप्तमी शोण्डैः –

सप्तम्यन्तं शौडादिभि प्राग्वत् । अर्थात् शौण्डादिप्रभृतयः समर्थसूवन्तपदैः सह सप्तम्यन्तपदस्य विकल्पेन समासः भवति । उदाहरणं यथा- अक्षेषु शौण्डः अक्षशौण्डः ।

कर्मधारयसमासः

तत्पुरुष : समानाधिकरणः कर्मधारयः

समानाधिकरणतत्पुरुषः कर्मधारयसंज्ञकः स्यात् । उदाहरणं यथा - परमः पुरुषः = परमपुरुषः ।

संख्यापूर्वो द्विगुः –

तद्धितार्थेस्यत्रोक्तः त्रिविधः संख्यापूर्वी द्विगुसंज्ञः स्यात् । अर्थात् 'तद्धितार्थोत्तरपदसमाहारे च' इति सूत्रविहितः संख्यापूर्वकसमासः द्विगुसंज्ञकः स्यात् ।

विशेषणं विशेष्येण बहुलम् :

भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत् । विशेषण-विशेषस्यसंयोगेन कर्मधारयसंज्ञकः स्यात् , विशेषणं समासवद्धपदे पूर्वं भवति । उदाहरणं यथा- नीलम् उत्पलम् = नीलोत्पलम् ।

उपमानानि सामान्यवचनैः

सामान्यवचनेन अर्थात् समानगुणवाचकेन शब्देन सह उपमानवाचकशब्दस्य समासः उपमान-कर्मधारयसज्ञकः स्यात् । उदाहरणं यथा- घन इव श्यामो - घनश्यामः ।

१०.५.३ बहुव्रीहिसमासः

बहुव्रीहिसमासः प्रायेण-अन्यपदार्थ-प्रधानो बहुव्रीहिश्चतुर्थः ।

अनेकमन्यपदार्थे –

अनेकं प्रथमान्तम् अन्यस्य पदस्य अर्थे वर्तमानं वा समस्यते स बहुव्रीहिः । अनेन बहुव्रीहिसमासः साधारणतया द्वितीया, तृतीया, चतुर्थी, पञ्चमी, सप्तमी च अर्थनिहितः अन्योऽर्थः प्रकाशयति । उदाहरणं यथा- (चतुर्थी) दत्तं रत्नं यस्मै सः - दत्तरत्नः । (पञ्चमी) निर्गता दया यस्मात् सः = निर्दयः । (षष्ठी) दीर्घौ बाहू यस्य सः = दीर्घबाहु । सप्तमी - बहूनि नक्षत्रानि यष्मिन् सः = बहुनक्षत्रः ।

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु –

उक्तपुस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिः निपातनात् पञ्चम्या अलुक् षष्ठ्याश्च लुक् । तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्क तस्मात्परं ऊङोऽमावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः । उदाहरणं यथा-

स्थिराः बुद्धिः यस्य सः = स्थिरबुद्धिः ।

पाचिका भार्या यस्य सः = पाचकभार्यः ।

गंगा (नामवाचकशब्दः) भार्या यस्य सः = गङ्गाभार्यः ।

(प्रियादि) शोभना प्रिया यस्य सः = शोभनाप्रियः ।

सुहृद्दुर्हौमित्रामित्रयोः -

सुदुभ्यां हृदयस्य हृद्भावो निपात्यते । अर्थात् मित्रार्थे अमित्रार्थे वा सुहृत् दुर्हृत् च निपात्याते । उदाहरणं यथा- दुर्हृन्मित्रम् ।

१०.५.४. द्वन्दसमासः समासः

द्वन्दसमासः प्रायेण उभयपदार्थप्रधानो द्वन्द्वसमासः ।

चार्थे द्वन्दः –

अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराः च अर्थाः । उदाहरणं यथा- रामश्च लक्ष्मणश्च = रामलक्ष्मणौ । द्वन्दसमासः द्विविधः इतरेतरः, समाहारः च ।

राजदन्तादिषु परम्- एषु पूर्वप्रयोगर्हं परं स्यात् । अर्थात् राजदन्तादिषु पूर्वे वर्तमानशब्दः समास-वद्धपदे परं भवति । उदाहरणं यथा- दन्तानां राजा राजदन्तः ।

अजाद्यदन्तम्- इदं द्वन्द्वे पूर्वं स्यात् । अर्थात् द्वन्द्वसमासे अजादि-अदन्तशब्दाः पुर्वे निपतन्ति । उदाहरणं यथा- ईशकृष्णौ ।

पिता मात्रा = मात्रा सहोक्तौ पिता वा शिष्यते । अर्थात् द्वन्द्वसमासे मातृशब्देन सहोक्तः पितृशब्दः शिष्यते, विकल्पेन । उदाहरणं यथा - माता च पिता च = पितरौ, मातापितरौ वा ।

द्वन्द्वश्च प्राणितूर्यसेनाङ्गाचाम् = एषां द्वन्द्व एकवत् । अर्थात् प्राण्यंग - तूर्याग - सेनांगवाचीशब्दाः द्वन्द्रसमासे एकवत् भवति । उदाहरणं यथा- पाणिपादम् मार्दङ्गिकवैणविकम् । रथिकाश्वारोहम् ।

अग्रगत्याः निरीक्षणम्

प्रश्नः १. समासः कः ?
प्रश्नः २. समासवद्धपदं तु किम् उच्यते ?
प्रश्नः ३. व्यासवाक्यं किम्?
प्रश्नः ४. लघुसिद्धान्तकौमुदीमतेन समासः कतिविधाः ?
प्रश्नः ५. कर्मधारयसमासः कस्य भेदः ?
प्रश्नः ६. निम्नोक्ते समासः कः -
कृष्णस्य समीपे,कृष्णं श्रितः, हरिणा त्राणो
प्रश्नः ७. रिक्त स्थानं पूरयतः -
प्रायेण..... तत्पुरुषः ।
प्रश्नः ८. वाक्यरचनां करोतु -
क. पितृसमः ।
ख. मासदेयम् ।
प्रश्नः ९. रिक्तस्थानं पुरयत
प्रायेण.....प्रधानो बहुब्रीहिः..... ।
प्रश्नः १०. निम्नोक्तनां समासवद्धपदं लिखतु ।
क. दत्तं रत्नं यस्मै सः,
ख. स्थिराः बुद्धिः यस्य सः,
ग. गंगा भार्य्या यस्य सः ।

१०.६ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति –

- पदद्वयस्य वा पदाधिकस्य संयोगेन समासवद्धपदं भवति इति ज्ञातवन्तः ।
- समासवद्धपदं समस्तपदमिति उच्यते इति ज्ञातवन्तः ।
- समासप्रकारविषये ज्ञातवन्तः ।
- प्रत्येकसमासे कस्य पदस्य प्राधान्यता वर्तते अस्मिन् विषयेऽपि ज्ञातवन्तः ।
- उदाहरणेन सह समासलक्षणं ज्ञातवन्तः ।

१०.७ ज्ञानाधिक्यम्

१.लघुसिद्धान्तकौमुदी, गोविन्द प्रसाद शर्मा (व्याकरण) चौखम्बा सुरभारती प्रकाशन, वारणसी, 2021
२.लघुसिद्धान्तकौमुदी, हरेकान्त मिश्र, (सम्पा), भारतीय विद्या प्रकाशन, दिल्ली, 2017

३.अष्टाध्यायी, नरेश झा (व्याख्या), चौखम्बा सुरभारती प्रकाशन, वारणसी,

✓१०.८ अग्रगत्याः निरूपणम्

प्रश्नः १ : उत्तरम् - समासनं समासः।

प्रश्नः २ : उत्तरम् – समासवद्धपदं तु समस्तपदमिति उच्यते।

प्रश्नः ३ : उत्तरम् - समासार्थप्रतिपादनार्थं प्रयुक्तं वाक्यं व्यासवाक्यमिति कथ्यते।

प्रश्नः ४ : उत्तरम् - लघुसिद्धान्तकौमुदीमतेन समासः मुलतः पञ्चविधः। केवल समासः, अव्ययीभावः , तत्पुरुषः, बहुव्रीहिः, द्वन्द्वसमासः च। कर्मधारयः तत्पुरुषभेदः। कर्मधारयभेदो द्विगुः।

प्रश्नः ५ : उत्तरम् - कर्मधारयसमासः तत्पुरुषस्य भेदः।

प्रश्नः ६ : उत्तरम् - उपकृष्णम्, कृष्णाश्रितः, हरित्रातः।

प्रश्नः ७ : उत्तरम् - प्रायेण उत्तरपदप्रधानः तत्पुरुषः।

प्रश्नः ८ : उत्तरम् -

क. पितृसमः बन्धुः नास्ति।

ख. मासदेयं धनं सदा समये यच्छेत्।

प्रश्नः ९ : उत्तरम् - प्रायेण उत्तरपदप्रधानो बहुव्रीहिः चतुर्थः।

प्रश्नः १० : उत्तरम् -

क. दत्तरत्नं।

ख. स्थिरबुद्धिः।

ग. गंगाभार्यः।

⍰१०.९ अभ्यासप्रश्नाः

(क) **वस्तुधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

प्रश्नः - १ : समासः कतिविधयः ? समासप्रकारान् लिखतु ?

प्रश्नः - २ : समासस्य साधारणनियमाः के ? लिखन्तु।

(ख) **संक्षेपप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया

प्रश्नः - १ : अव्ययीभावः समासः।

प्रश्नः - २ : द्वन्दसमासः समास:।

(ग) **रचनाधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

प्रश्नः - १ : बहुव्रीहिसमासः कः ? उदाहरणैः सह लिखन्तु।

प्रश्नः - २ : तत्पुरुषसमासः कः ? उदाहरणैः सह लिखन्तु।

*****

अध्यायः ११ : कृत्प्रत्ययप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

अध्यायस्य संरचना

११.१. उद्देश्यम्

११.२. परिचयः

११.३. कृत्प्रत्ययस्य विभाजनम्

११.४. कृत्प्रत्ययस्य व्यवहारः

११.५. कृत्प्रत्यया:

- ११.५.१. तव्यत्, अनीयर्
- ११.५.२. यत्
- ११.५.३. क्यप्
- ११.५.४. ण्यत्
- ११.५.५. ण्वुल, तृच्
- ११.५.६. क्त, क्तवतु
- ११.५.७. कानच्, क्वसु
- ११.५.८. शतृ, शानच्
- ११.५.९. स्यतृ, स्यमान
- ११.५.१०. तुमुन्
- ११.५.११. घञ्
- ११.५.१२. क्तिन्
- ११.५.१३. ल्युट् /अनट्
- ११.५.१४. क्त्वा

११.६. संक्षिप्तप्रत्ययानुक्रमनिका

११.७. अध्यायस्य असमीयाभाषायां सारांशः

११.८. अध्यायात् किमवगतम्

११.९ ज्ञानाधिक्यम्

११.१० अग्रगत्याः निरूपणम्

११.११ अभ्यासप्रश्नाः

११.१. उद्देश्यम्

अस्याध्यायस्य अध्ययनं कृत्वा भवान् –

- लघुसिद्धान्तकौमुद्याः कृत्प्रत्ययस्य मूलसूत्रसंख्याभिः सह परिचयं भविष्यति।
- कृत्प्रत्ययानां यथायोग्यं योजनं कर्तुं समर्थो भविष्यति।
- कृत्प्रत्ययाः कस्मिन्नर्थे व्यवह्रियन्ते, तद्विषये ज्ञानं भविष्यति।

११.२. परिचयः

कस्याचित् भाषायाः सम्यक् ज्ञानाहरणार्थं व्याकरणशास्त्रस्य अध्ययनमतीव प्रयोजनीयम् । पाणिनिप्रणीता 'अष्टाध्यायी' संस्कृतभाषायाः प्राचीनतमं व्याकरणशास्त्रम् । परवर्तीसमये अष्टाध्यायीमवलम्ब्य व्याकरणविदः विभिन्नानि व्याकरणशास्त्राणि लिखितवन्तः । तेषु भट्टोजिदीक्षितविरचिता 'सिद्धान्तकौमुदी' वरदाराज-विरचिता 'लघुसिद्धान्तकौमुदी' च प्रसिद्धे स्तः । वरदाराजः भट्टोजिदीक्षितस्य शिष्यः आसीत् ।

लघुसिद्धान्तकौमुद्यां भिन्नाः विषयाः आलोच्यन्ते । अत्र अष्टाध्याय्याः सूत्राणि विषयानुसारेण विभज्यन्ते । परन्तु, अध्यायेऽस्मिन् लघुसिद्धान्तकौमुद्याः केवलं कृत्प्रकरणस्य सूत्राणां विस्ताररूपेण अध्ययनं भविष्यति ।

धातुषु, प्रातिपदिकेषु च परे विभक्तिवत् यः चिह्नः युज्यते, स एव प्रत्यय इत्युच्यते। अतः, धातोः परे ये प्रत्ययाः प्रयुज्यन्ते, ते कृत्प्रत्ययाः। कृत्प्रत्ययः कृदन्त नाम्नापि ज्ञायते। अष्टाध्यायाः सम्पूर्णः तृतीयाध्यायान्तर्गताः प्रत्ययाः धातोः परे युज्यन्ते, यदर्थं कृत्प्रत्ययः कृदन्तप्रकरणं वा 'धातोः (३.१.९१) इति अधिकारसूत्रान्तर्भूक्तः । अष्टाध्यायां प्रायः १४० कृत्प्रत्ययाः पाठिताः सन्ति। परन्तु, सर्वे कृत्प्रत्ययाः सवैः धातुभिः सह न विधीयन्ते। अतएव, अध्यायेऽस्मिन् केचन कृत्प्रत्यया हि आलोच्यन्ते । कृत्प्रत्ययैः सह सदा अतिङ्न्तपदानि प्रयुज्यन्ते, यतः तिङन्तपदानि क्रियापदरूपेण व्यवह्रियन्ते । यथा – गच्छति, खादति, हसति इत्यादयः । कृत्प्रत्ययानां पदं न कदापि क्रियापदं भवति । अयं प्रातिपदिकस्य, संज्ञायाः, विशेषणस्य, अव्ययस्य च निर्माणं करोति । वरदाराजेन उक्तम्- 'कृदतिङिति कृत्संज्ञा'।

११.३ कृत्प्रत्ययस्य विभाजनम् :

वरदाराजेन लघुसिद्धान्तकौमुद्याः कृदन्तप्रकरणे चत्वारः विभागाः निर्दिश्यन्ते । यथा –

क) कृत्यप्रत्ययः

ख) पूर्वकृदन्तः

ग) उणादि

घ) उत्तरकृदन्तः

कृत्यप्रत्ययाः यथा – तव्य, अनीयर्, यत्, क्यप्, ण्यत्।

पूर्वकृदन्ताः यथा –ण्वुल्, तृच्, क्त, क्तवतु, कानच् क्वसु, शतृ, शानच्, स्यतृ, स्यमान इत्यादयः।

उणादि यथा- उण्, उरच्, उरन् इत्यादयः।

उत्तरकृदन्ताः यथा- तुमुन्, घञ्, क्तिन्, क्त्वा इत्यादयः।

११.४ कृत्प्रत्ययस्य व्यवहारः

- कारकार्थस्य निर्देशार्थं कृत्प्रत्ययाः प्रयुज्यन्ते। यथा- दृश्यते तत् द्रष्टव्यम्।
- एककर्तुः यदा समापिकासमापिके द्वे क्रिये विद्येते, तदा द्वयोः क्रियापदयोः परस्परसम्बन्धनिर्देशार्थं कृत्प्रत्ययस्य प्रयोगं भवेत्।
- औचित्यार्थं प्रदर्शनाय कृत्प्रत्ययाः प्रयुज्यन्ते।
- आज्ञार्थेऽपि कृत्प्रत्ययस्य प्रयोगं क्रियते।

११.५. कृत्प्रत्ययाः :

११.५.१ तव्य, तव्यत्, अनीयर्

अष्टाध्यायी (अः) – **तव्यत्तव्यानीयर्**: (३/१/९६॥)

लघुसिद्धान्तकौमुदी (लः सिः कौः) – धातोरेते प्रत्ययाः स्युः। एधितव्यम्, एधनीयं त्वया। भावे औत्सर्गिकमेकवचनं क्लीबत्वं च। चेतव्यश्चयनीयो वा धर्मस्त्वया।

कर्मवाच्ये भाववाच्ये च धातोः परे तव्य, तव्यत् वा अनीयर् इति द्वौ प्रत्ययौ प्रयुज्येते। भविष्यत्कालं सूचयितुं प्रत्ययद्वयस्य प्रयोगं क्रियते। तव्यत् प्रत्ययस्य 'त्' इत् 'तव्य' शेषोऽस्ति। 'अनीयर् प्रत्ययस्य 'र्' इत् 'अनीय' शेषोऽस्ति।

कर्मवाच्ये प्रयुक्ताः तव्यत्, अनीयर् प्रत्ययान्ताः शब्दाः प्रयुक्तवाक्यस्य कर्मणः विशेषणरूपेण स्थानं गृह्णाति; यतः कर्मानुसारेण अनयोः प्रत्ययोः लिङ्गविभक्तिवचनानि व्यवह्रियन्ते। उदाहरणं यथा- मया ग्रन्थः पठनीयः, मया पत्रिका पठनीया, मया पुस्तकं पठनीयम्।

भाववाच्ये तव्यत्, अनीयर् प्रत्ययान्ताः शब्दाः सर्वदा अकारन्त क्लीवलिङ्गरूपाः विराजन्ते। यथा- मया स्थातव्यम्, त्वया क्रीडितव्यम् इत्यादयः।

तव्यत् – अनीयर्प्रत्ययान्तशब्दानां केचनोदाहरणानि-

धातुः	तव्यत्	अनीयर्
दा	दातव्यम्	दानीयम्
जि	जेतव्यम्	जयनीयम्
शी	शायितव्यम्	शयनीयम्
पच्	पक्तव्यम्	पचनीयम्
दृश्	द्रष्टव्यम्	दर्शनीयम्
रक्ष्	रक्षितव्यम्	रक्षणीयम्
हस्	हसितव्यम्	हसनीयम्
कृ	कर्त्तव्यम्	करणीयम्

११.५.२. यत्

अः- अचो यत् (३/१/९७)

लःसिः कौः – अजन्ताद्धातोर्यत् स्यात्। चेयम्।

कर्मवाच्ये भाववाच्ये च अजन्तस्य स्वरान्तस्य वा धातोः परे यत् प्रत्ययो भवति। 'यत् प्रत्ययस्य 'त्' इत् 'य' शेषोऽस्ति। यत् प्रत्ययसंयुक्ते धातोः अन्तिमे स्वरे अर्थात् इ, ई, आ, ऐ-कारे 'ए' गुणो भवति। अपि च, 'उ' कारे 'अव' आदेशो भवति।

यत् प्रत्ययान्तशब्दानामुदाहरणानि-

धातुः	यत्
चि	चेयम्
जि	जेयम्
नी	नेयम्
श्रु	श्रव्यम्
भु	भव्यम्
पा	पेयम्
दा	देयम्

११.५.३ क्यप्

अः- एतिस्तुशास्वृदृजुषः क्यप्॥ (३/१/१०९)

लः सिः कौः - एभ्यः क्यप् स्यात् ॥

कर्मवाच्ये भाववाच्ये च इ, स्तु, शास्, वृ, दृ, जुष्- प्रभृतीनां धातूनां परे क्यप् प्रत्ययो भवति। 'क्यप्' प्रत्ययस्य 'क्' 'प्' इतौ 'य' शेषो भवति। परन्तु, अन्तिमस्वरः ह्रस्वेन 'हस्वस्य पिति कृति तुक्' (६/१/७१) इति सूत्रेण तुकागमः भवति । 'तुक् इत्यस्य 'उ','क' इत् 'त्' शेषो भवति । अपि च 'शास्' धातुना सह क्यप् प्रत्ययोगेन 'आ' स्थाने 'इ'कारो भवति। यथा- शास्+ क्यप् = शिष्यः ।

'क्यप्' प्रत्ययान्तशब्दानामुदाहरणानि

धातुः	क्यप्
स्तु	स्तुत्यः (तुकागमः)
गुह्	गुह्यम्
वृ	वृत्यः (तुकागमः)
वद्	वद्यम्
वृध्	वृध्यम्
जुष्	जुष्यम्
दुह्	दुह्यम्
रुच्	रुच्यम्

ज्ञातव्यम्

- भाववाच्ये 'हन्' धातोः परे 'क्यप्' प्रत्ययो भवति । 'हन्' इत्यस्य 'न' स्थाने 'त', स्त्रीलिंगश्च भवति। यथा – स्त्रीहत्या ,गोरत्या इत्यादयः ।
- भाववाच्ये यज्, विद्, कृ, शी-इत्यादीनां धातूनां परे क्यप् प्रत्ययः स्त्रीलिङ्गश्च भवति। यथा- विद् + क्यप् = विद्या, कृ+क्यप्=कृत्या, शी + क्यप् = शय्या।
- ऋकारान्तक्लृप्वृत् धातुद्वयं व्यतिरिक्तं भृ, वृष्, भृज् इत्यादीनां धातूनां परे विकल्पे क्यप् प्रत्ययायुक्तः स्यात्।

११.५.४ ण्यत्

अः- ऋहलोर्ण्यत् (३।१।१२४)

लःसिः कौः –ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्। कार्यम्। हार्यम्। धार्यम्॥

भाववाच्ये कर्मवाच्ये च ऋकारान्तस्य व्यञ्जनवर्णान्तस्य धातोः परे ण्यत् प्रत्ययो भवति । ण्यत् प्रत्ययस्य 'ण्', 'त्' इत्, 'य' शेषोऽस्ति । अपि च ऋकारान्तधातोः 'आर्' वृद्धिर्भवति । यथा – कृ+ण्यत् = कार्यम्, हृ+ ण्यत् = हार्यम् ।

ण्यत्- प्रत्ययान्तशब्दानामुदाहरणानि –

धातु	ण्यत्
अर्च	अर्च्यः
पठ्	पाठ्यम्
भिद्	भेद्यम्
भुज्	भोज्यम्
वच्	वाच्यम्
हस्	हास्यम्

अग्रगत्याः निरीक्षणम्

प्रश्नः १ : कृत्प्रत्ययस्य धारणा कथं भवति ? कति विभागेषु विभक्ताः अयं प्रत्ययः ?

.....

प्रश्नः २ : अधोलिखितानां शब्दानां प्रकृतिप्रत्ययानां विभाजनं करोतु –

क) शयितव्य

ख) हसनीयम्

ग) चेयम्

घ) शिष्य

ङ) वाच्यम्

११.५.५. ण्वुल्, तृच्

अः- ण्वुल्तृचौ)३।१।१३३।।)

लः सिः कौः- धातोरेतौ स्तः । कर्तरि कृदिति कर्त्रर्थे ॥

कर्तृवाच्ये धातूनां परे ण्वुल, तृच् चेति प्रत्ययौ प्रयुज्येते । ण्वुल् प्रत्ययस्य 'ण्', 'ल्' इतौ 'वु' शेषोऽस्ति । परन्तु, 'युवोरनाकौ' (७।१।१) सूत्रानुसारेण 'वु' स्थाने अकः आदेशो भवति । तथा, 'तृच्' प्रत्ययस्य 'च' इत्, केवलं 'तृ' शेषोऽस्ति ।

साधारणतः, ण्वुल् प्रत्ययान्ताः शब्दाः अकारान्तपुंलिङ्गशब्दवत् भवन्ति, स्त्रीलिङ्गे आकारान्ताः भवन्ति । अपरं तु, 'तृच्' प्रत्ययान्ताः शब्दाः ऋकारान्तशब्दवत् भवन्ति, स्त्रीलिङ्गे ईकारान्ता भवन्ति ।

ण्वुल्-तृच्-प्रत्ययान्तानां शब्दानामुदाहरणानि –

धातु	तृच्
कृ	कारकः
कृ	कर्तृ/ कर्ता
गै	गायकः
दा	दातृ /दाता
खाद्	खादकः
श्रु	श्रोतृ / श्रोता
तृ	तारकः
नी	नेतृ /नेता
गण्	गणकः
स्थापि	स्थापयितृ/ स्थापयिता

११.५.६ क्त, क्तवतु

अः- क्तक्तवतु निष्ठा (१/१/२६।।)

लः सिः कौः -एतौ निष्ठासंज्ञौ स्तः।।

क्त, क्तवतु उभौ प्रत्ययौ निष्ठासंज्ञकौ उच्येते । साधारणतः निष्ठा प्रत्ययान्ताः शब्दाः विशेषणो भवति । अतीतकालनिर्देशार्थं' 'क्त', 'क्तवतु' प्रत्ययौ प्रयुज्येते ।

वस्तुतः, कर्मवाच्ये भाववाच्ये च'क्त' प्रत्ययः प्रयुज्यते। तथा च, क्तवतुप्रत्ययः कर्तृवाच्ये भवति। क्त प्रत्ययान्ताः शब्दाः कर्मणः विशेषणो भवति। अतः कर्मणः विभक्तिलिङ्गवचनानि क्तयुक्तानां शब्दानामपि तथैव भवति। एवमेव, क्तवतु प्रत्ययान्ताः शब्दाः कर्तायाः विभक्तिवचनलिङ्गानुसारेण भवन्ति। कर्मवाच्ये प्रयुक्ताः क्त प्रत्ययान्ताः शब्दाः त्रिषु लिङ्गेषु भवन्ति। परन्तु, भाववाच्ये प्रयुक्ताः शब्दाः केवलं क्लीवलिङ्गस्य एकवचने प्रयुज्यन्ते। अपरं तु, क्तवतुप्रत्ययान्तानां शब्दानां त्रिषु लिङ्गेषु एव प्रयोगं जायते।

निष्ठाप्रत्ययान्ताः शब्दाः त्रिषु वचनेषु सप्तसु विभक्तिषु च प्रचलिताः सन्ति। क्तप्रत्ययस्य 'क' इत् 'त्' शेषोऽस्ति। तथा च, क्तवतु प्रत्ययस्य 'क', 'उ' इतौ तवत् शेषोऽस्ति।

'क्त- क्तवतु'प्रत्ययानामुदाहरणानि प्रथमाविभक्तेः पुंलिंङ्गैकवचनेमात्रं निर्देशितानि-

धातु	क्त	क्तवतु
ज्ञा	ज्ञातः	ज्ञातवान्
प्रच्छ्	पृष्टः	पृष्टवान्
मुच्	मुक्तः	मुक्तवान्
वच्	उक्तः	उक्तवान्
त्यज्	त्यक्तः	त्यक्तवान्
गम्	गतः	गतवान्

ज्ञातव्यम्

अकर्मकधातूनाम् अर्थात् 'गम्' 'रुह्' प्रभृतीनां गत्यर्थकधातूनां परे कर्तृवाच्येऽपि 'क्त' प्रत्ययो भवति। कर्तृवाच्ये 'क्त' प्रत्ययान्तः शब्दः कर्तायाः विशेषणो भवति। यथा- पुरुषो मृतः, स्त्रीमृता, वानरो वृक्षम् आरुढः इत्यादयः।

११.५.७ कानच्, क्वसु

अः- लिटः कानज्वा (३/२/१०६॥)

क्वसुश्च (३/२।१०७॥)

लःसिः कौः- लिटः कानच् क्वसुश्च वा स्तः। तङानावात्मनेपदम्। चक्राणः॥

अतीतकालसूचयितुं 'कानच्', 'क्वसु' च प्रत्ययौ धातोः परे प्रयुज्येते। कानच् प्रत्ययः आत्मनेपदीयधातोः परे तथा क्वसु प्रत्ययः परस्मैपदीयधातोः परे विधीयते। कानच्, क्वसु प्रत्ययान्ताः शब्दाः विशेषणरूपाः प्रतीयन्ते। कानच् प्रत्ययस्य 'आन्' शेषोऽस्ति, क्वसुप्रत्ययस्य वस्' शेषोऽस्ति।

कानच्-क्वसुप्रत्ययान्तशब्दानां कानिचिदुदाहरणानि –

धातु	कानच्
कृ	चक्राण:
युध्	युयुधान्
शिक्ष्	शिशिक्षान्
वन्द्	ववन्दान्
रुच्	रुरुचान्
व्यथ्	विवथान्

धातु	क्वसु
कृ	चकृवस्
हन्	जघ्निवस्
पा	पपिवस्
वच्	उचिवस्
विद्	विविद्वस्
स्था	तस्थिवस्

११.५.८ शतृ, शानच्

अः- लटः शतृशानचावप्रथमा समानाधिकरणे (३।२।१२४।।)

लःसिः कौः- अप्रथमान्तेन समानाधिकरणे लट एतौ वा स्तः। शबादि। पचन्त चैत्रं पश्य ।।

कर्तृवाच्ये वर्तमानकालनिर्देशार्थं परस्मैपदीयधातोः परे शतृप्रत्ययो भवति। शतृप्रत्ययान्ताः शब्दाः कर्तायाः विशेषणरूपेण प्रयुज्यन्ते। शतृप्रत्ययस्य 'अत्' शेषोऽस्ति।'श', 'ऋ' इतौ जायेते। यथा- बालकः धावत् गच्छति । अपरं तु, वर्तमानकालनिर्देशाय कर्तृवाच्ये कर्मवाच्ये च आत्मनेपदीयधातोः परे शानच्-प्रत्ययः प्रयुज्यते। शानप्रत्ययान्ताः शब्दाः कर्तृवाच्ये कर्तायाः विशेषणं, तथा च कर्मवाच्ये कर्मणः विशेषणं भवन्ति।

शानच् प्रत्ययस्य 'श्','च्' इत् जायते,'आन' शेषोऽस्ति । परन्तु, कस्मिञ्चित् पदे 'आन्' स्थाने 'मान्'अपि आयाति। साधारणतः, भ्वादि, दिवादि, तुदादि, चुरादि-गणीय धातूनां परे व्यवहृतेषु शानच् प्रत्ययान्तशब्देषु 'आन'स्थाने 'मान' आयाति। तथा च, तनादि, ह्वादि, क्रयादि ,रुधादि, स्वादिगणीयधातूनां पश्चात् व्यवहृतानां शानच्प्रत्ययान्तानां शब्दानाम् 'आन' भवति।

शतृ-शानच् प्रत्ययान्तानां शब्दानामुदाहरणानि –

धातु	शतृ	धातु	शानच्
जि	जयत्	पच्	पचमान
त्यज्	त्यजत्	मृ	म्रियमाण
भुञ्ज्	भुञ्जत्	विद्	विद्यमान
स्था	तिष्ठत्	दा	ददान
नम्	नमत्	कृ	कुर्वाण
गै	गायत्	ग्रह्	गृह्णान
खन्	खनत्	शी	शयान
चल्	चलत्	सेव्	सेवमान

ज्ञातव्यम्

- भ्वादिगणीयधातु – सेव्, वृध्, वृत् इत्यादयः।
- दिवादि- जन्, दीप्, विद्, मन् इत्यादयः।
- तुदादि- मृ, मुच् इत्यादयः।
- चुरादि-अर्थ्, मन्त्र्, चिन्त् इत्यादयः।
- तनादि – कृ इत्यादि ।
- ह्वादि- धा, दा इत्यादयः ।
- क्रयादि- क्री, ग्रह् इत्यादयः ।
- रुधादि – भुज्, युज् इत्यादयः ।
- स्वादि- वृ, अश्, चि इत्यादयः।

११.५.९ स्यतृ, स्यमान

अः- तौ सत् (३।२।१२७॥)

लः सिः कौः- तौ शतृशानचौ सत्संज्ञौ स्तः ॥

अः- लृटः सद्वा (३।३।१४)

लः सिः कौः – व्यवस्थितविभाषेयम् । तेनाप्रथमासामानाधिकारण्ये प्रत्ययोत्तरपदयोः सम्बोधने लक्षणहेत्वोश्च नित्यम् । करिष्यन्तं करिष्यमाणं पश्य ।।

कर्तृवाच्ये लृट्विभक्त्याम् अर्थात् भविषात्कालनिदेशाय शतृ-शानच्प्रत्ययवत् परस्मैपदीयधातोः परे स्यतृ प्रत्ययः, तथा आत्मनेपदीयधातोः परे स्यमानप्रत्ययः प्रयुज्येते। स्यतृ-स्यमानप्रत्ययान्ताः शब्दाः विशेषणरूपाः शब्दाः । अनयोः विशेष्यानुसारेण लिङ्गविभक्तिवचनानां प्रयोगं भवति। 'स्यतृ' प्रत्ययस्य ऋकारः इत् जायते, केवलं 'स्यत्' शेषोऽस्ति । तथा च, 'स्यमान'स्य सम्पूर्णः 'स्यमान' शेषोऽस्ति । परन्तु, 'स् स्थाने 'ष्' भवति ।

स्यतृ-स्यमानप्रत्ययान्तानां शब्दानां कानिचिदुदाहरणानि –

धातु	स्यतृ	धातु	स्यमान
गम्	गमिष्यत्	रुच्	रोचिष्यमान
पूज्	पूजयिष्यत्	वृ	वर्तिष्यमान
या	यास्यत्	सह्	सहिष्यमान
भुज्	भोक्ष्यत्	यत्	यतिष्यमान
भू	भविष्यत्	कृ	करिष्यमान

अग्रगत्याः निरीक्षणम्

प्रश्नः ३ : शतृ-शानच् प्रत्ययोः सोदाहरणं व्याख्या कार्या ।

प्रश्नः ४ : अधोलिखितानां शब्दानां प्रकृति-प्रत्ययोः विभाजनं करणीयम्-

क) श्रोतृ

ख) तारकः

ग) मुक्तः

घ) त्यक्तवान्

ङ) चक्राणः

च) विविद्वस्

छ) वर्त्तिष्यमान

ज) यास्यत्

११.५.१० तुमुन्

अः- तुमुन् ण्वुलौ क्रियायां क्रियार्थायाम् (३।३।१०।।)

लःसिः कौः – क्रियार्थायां क्रियामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्तत्वादव्ययत्वम्। कृष्णं द्रष्टुं याति । कृष्णं दर्शको याति ।

यदा द्वयोः क्रिययोः कर्ता एकः भवति, अपि च क्रिययोः अर्थः परस्परसम्बन्धयुक्तः, तदा तत्र असमापिकाक्रियया सह भविष्यदर्थे 'तुमुन्' प्रत्ययः प्रयुज्यते । अपि च, 'कालसमयवेलासु तुमुन्' (३।३।१६७।।) इति सूत्रानुसारेण कालवाचकक्रियानिदेशार्थमपि 'तुमुन्' प्रत्ययस्य प्रयोगः क्रियते । यथा- समयोऽयम् अध्येतुम् ।

एकक्रिया निमित्तात् यदा अन्यक्रियायाः प्रयोजनं भवति, तदा तत्कृते प्रयुक्तः धातोः परे तुमुन्, ण्वुलोऽपि प्रत्ययौ युज्याते । तुमुन् प्रत्ययप्रयुक्ताः शब्दाः अव्ययार्थाः भवन्ति । तुमुन् प्रत्ययस्य उन्' इत् 'तुम्' शेषोऽस्ति ।

'तुमुन्' – प्रत्ययान्तशब्दानामुदाहरणानि –

धातु	तुमुन्
दा	दातुम्
हन्	हन्तुम्
कृ	कर्तुम्
स्था	स्थातुम्
गै	गातुम्
भुज्	भोक्तुम्
ग्रह	ग्रहीतुम्
दृश्	द्रष्टुम्

११.५.११. घञ्

अः- भावे (३।३।१८।)

लःसिःकौः – सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्। पाकः ।।

भाववाच्ये धात्वर्थः निर्देशनाय घञ्प्रत्ययस्य प्रयोगः क्रियते । घञ् प्रत्ययान्ताः शब्दाः पुंलिङ्गाः भवन्ति । अस्य प्रत्ययस्य 'घ्', 'ञ्' इतौ जायेते, केवलं 'अ' वर्तते । कदाचित् कर्मवाच्यार्थेऽपि घञ्प्रत्ययः प्रयुज्यते ।यथा- प्रकर्षेण क्रियते यः सः प्रकारः, पद्यते (गम्यते) अनेन इति पादः इत्यादयः ।

घञ्प्रत्ययान्तशब्दानामुदाहरणानि-

धातु	घञ्
पच्	पाकः
शुच्	शोकः
हन्	घातः
भुज्	भोगः
आश्रि	आश्रयः
त्यज्	त्याग:
भञ्ज्	भङ्गः
नश्	नाशः

११.५.१२. क्तिन्

अः- स्त्रियां क्तिन् (३।३।९४।)

लः सिः कौः- स्त्रीलिङ्गे भावे क्तिन् स्यात् । घञोऽपवादः । कृतिः। स्तुतिः। (ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः ।) तेन नत्वम् । कोर्णिः ।) लूनिः। धुनिः। पुनिः ।

भाववाच्ये धातोः परे क्तिन् प्रत्ययो भवति । क्तिन् प्रत्ययान्ताः शब्दाः स्त्रीलिङ्गाः । ऋकारान्तधातोः परे क्तिन् प्रत्यययोगे निष्ठावद्भवति । यथा- कोर्णिः,लूनिः, धूनिः, पूनिः प्रभृतयः । क्तिन् प्रत्ययस्य 'क्' 'न्', इत्, ति वर्तते । किन्तु, हा, ग्ला-इत्यादिषु केषु धातुषु 'ति' स्थाने 'नि' जायते । यथा- हा + क्तिन् = हानिः, ग्ला + क्तिन् = ग्लानिः इत्यादयः ।

क्तिन् प्रत्ययान्तानां शब्दानामुदाहरणानि –

धातु	क्तिन्

आप्	आप्तिः
कृ	कृतिः
ख्या	ख्याति:
गै	गीतिः
दीप्	दीप्तिः
तुष्	तुष्टि:
प्री	प्रीतिः
ब्रू/वच्	उक्ति:
स्था	स्थितिः
स्मृ	स्मृतिः

११.५.१३ ल्युट् / अनट्

अः- नपुंसके भावे क्तः (३/३/११४।।)

ल्युट् च (३।३।११५)

लःसिः कौः - हसितम्, हसनम् ॥

'ल्युट्' प्रत्ययः अनट् अपि कथ्यते। करणकारकार्थे अधिकरणकारकर्थे च धातोः परे अनट् प्रत्ययः युज्यते । अनट् प्रत्ययान्ताः शब्दाः नपुंसकलिङ्गाः भवन्ति । अस्य प्रत्ययस्य 'ट्' इत्, अन् शेषोऽस्ति । यथा- क्रियते अनेन इति करणम् (कृ + अनट्) करणकारकम्; भूयते अस्मिन् इति भवनम् (भू + अनट्) अधिकरणकारकम् ।

ल्युट् / अनट् प्रत्ययान्तशब्दानामुदाहरणानि –

धातु	ल्युट्/अनट्
भुज्	भोजनम्
ज्ञा	ज्ञानम्
आस्	आसनम्
वृध्	वर्धनम्
हस्	हसनम्
नी	नयनम्

गै	गानम्
रुद्	रोदनम्

ज्ञातव्यम्

साधारणतः, घञ, क्तिन्, अनद् प्रत्ययान्ताः शब्दाः क्रियापदात् विशेष्यं पदं प्रति रूपान्तरिताः भवन्ति। यथा- त्यज् + घञ् = त्यागः, गम् + क्तिन् = गतिः, कृ + अनट् = करणम्।

११.५.१४. क्त्वा

अः- समानकर्तृकयोः पूर्वकाले (३।४।२१।।)

लःसिःकौः–समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। भुक्त्वा व्रजति। द्वित्वमतन्त्रम्। भुक्ता पीत्वा व्रजति।

स्नानं कृत्वा, वधं कृत्वा - एतादृशं पूर्वकालिकार्थं ज्ञापयितुं धातोः परे 'क्त्वा' प्रत्ययः प्रयुज्यते। एकस्य कर्तुः यदि द्वे क्रिये भवतः, तर्हि सम्पादितां क्रियां पूर्वकालिकक्रियामुच्यते। यथा- रामो रावणं हत्वा अयोध्यामजगाम। अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा (३।४।१८।।) इति सूत्रानुसारेण निषेधार्थसूचकाः अल्, खलु प्रभृतिशब्दयोगात् विकल्पे क्त्वा प्रत्ययो भवति। अपि च, 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (**७।१।३७**) इति सूत्रानुसारेण नञ्तत्पुरुषः समासः विद्यमानत्वात् ल्यप् स्थाने क्त्वा प्रत्ययो भवति। क्त्वा प्रत्ययान्ताः शब्दाः असमापिकाक्रियारूपाः अव्ययरूपाश्च व्यवहृयन्ते। अस्य प्रत्ययस्य 'क' इत् 'त्वा' शेषो भवति।

क्त्वाप्रत्ययान्तानां शब्दानां कानिचिदुदाहरणानि–

धातु	क्त्वा
दृश्	दृष्ट्वा
पा	पीत्वा
त्यज्	त्यक्त्वा
ज्ञा	ज्ञात्वा
वद्	वदित्वा,उक्त्वा
भ्रम्	भ्रमित्वा
गम्	गत्वा

तृ	तीर्त्वा

ज्ञातव्यम्

उपसर्गपूर्वकधातोः परे सामानार्थे क्त्वा स्थाने ल्यप् प्रत्ययः प्रयुज्यते। ल्यप्' प्रत्ययस्य 'ल्' 'प्' इतौ, 'य' शेषो भवति। यथा- आ - गम् + ल्यप् = आगम्य, प्र- विश् + ल्यप् = प्रविश्य, उप - भुज् + ल्यप् – उपभोग्य, वि - जि + ल्यप् - विजित्य इत्यादयः।

११.६. संक्षिप्तप्रत्ययानुक्रमणिका :

	प्रत्ययः	**प्रयुक्तार्थः**	**प्रयोगांशः**	**उदाहरणम्**
कृत्य-प्रत्ययाः	तव्यत्	उचितार्थे	तव्य	द + तव्य = दातव्य
	अनीयर्	उचितार्थे	अनीय	कृ+अनीयर् = करणीय
	यत्	उचितार्थे	य	लभ्+यत् = लभ्य
	क्यप्	उचितार्थे	य	स्तु+क्यप् = स्तुत्य
	ण्यत्	उचितार्थे	य	भुज्+ ण्यत् = भोग्यम्
	ण्वुल्	कर्तृवाच्यार्थे	वु/अक्	चिन्त्+ ण्वुल् = चिन्तकः
	तृच्	कर्तृवाच्यार्थे	तृ	दा+तृच् = दातृ
	क्त	भूतकालनिर्देशार्थे	त	नी + क्तः = नीतः
	क्तवतु	भूतकालनिर्देशार्थे	तवत्	गम् +क्तवतु = गतवत्
	कानच्	भूतकालनिर्देशार्थे	आन्	वन्द्+कानच् = ववन्दान्
पूर्वकृदन्ताः	क्वसु	भूतकालनिर्देशार्थे	वस्	हन्+क्वसु = जघ्निवस्
	शतृ	वर्तमानकालनिर्देशार्थे	अत्	धाव्+शतृ = धावत्
	शानच्	वर्तमानकालनिर्देशार्थे	आन/मान	दा+शानच् = ददान

				मृ + शानच् = म्रियमान
	स्यतृ	भविष्यत्कालनिर्देशार्थे	स्यत्	कृ+स्यतृ = करिस्यत्
	स्यमान	भविष्यत्कानिर्देशार्थे	स्यमान	सह्+ स्यमान = सहिष्यमान
	प्रत्ययः	**प्रयुक्तार्थः**	**प्रयोगांशः**	**उदाहरणम्**
	तुमुन्	उद्देश्यार्थे	तुम्	ग्रह + तुमुन् = ग्रहितुम्
उत्तरकृदन्ताः	घञ्	धातोरर्थनिर्देशकः	अ	त्यज् + घञ् = त्यागः
	क्तिन्	स्त्रीलिङ्गे व्यवहारः	ति	ख्या+क्तिन् = ख्यातिः
	अनट्	करणार्थेऽधिकरणार्थे च	अन्	आस्+अनट् = आसनम्
	क्त्वा	द्वयोः कार्ययोः पूर्वसमाधिते कार्ये ज्ञापनार्थे त्वा		हन्+क्त्वा = हत्वा

११.७. अध्यायस्य असमीयाभाषायां सारांशः

কৃৎপ্রত্যয়ৰ চমু পৰিচয়ঃ

কৃৎ প্রত্যয়ৰ ভাগ

বৰদাৰাজে লঘু-সিদ্ধান্ত কৌমুদীত কৃদন্তপ্রকৰণৰবিভাজন চাৰি ধৰণে নির্দেশ কৰিছে। যেনে-

১) কৃত্য প্রক্রিয়া

2) পূর্বকৃদন্ত

৩) উণাদি

৪) উত্তৰকৃদন্ত

১) কৃত্য প্রত্যয় – তব্যৎ, অনীয়ৰ , যৎ, ক্যপ, ন্যৎ।

2) পূর্বকৃদন্ত- ষ্বুল, তৃচ , ক্ত, ক্তৱতু, কানচ্, ক্বসু, শতৃ, শানচ্, স্যতৃ, স্যমান ইত্যাদি।

৩) উণাদি- উণ্, উৰচ্ , উৰন্ ইত্যাদি।

৪) উত্তৰকৃদন্ত- তুমুন্, ঘঞ্, ক্তিন্, ক্ত্বা ইত্যাদি।

কৃৎপ্রত্যয়ৰ ব্যৱহাৰ

বিশেষ কাল নির্দ্দেশার্থে, কাৰকার্থে, ঔচিত্যার্থে, আজ্ঞার্থে তথা ক্রিয়াৰ মাজৰ পৰস্পৰ সম্বন্ধ বুজাবৰ কাৰণে কৃৎ প্রত্যয় বা কৃদন্ত প্রকৰণৰ ব্যৱহাৰ কৰা হয়।

কৃৎ প্রত্যয়ভেদে ইয়াৰ ব্যৱহাৰ আৰু উদাহৰণঃ

১) তব্য / তব্যৎ আৰু অনীয়ৰ্

কর্ম আৰু ভাৱবাচ্যত সকলো ধাতুৰ পিছত তব্যৎ আৰু অনীয়ৰ প্রত্যয় ব্যৱহাৰ কৰা হয়। ভৱিষ্যৎ কাল বুজোৱাৰ ক্ষেত্রত এই দুটা প্রত্যয় প্রয়োগ কৰা হয়। কর্মবাচ্যত ব্যৱহৃত এই প্রত্যয়ৰ দ্বাৰা নির্মিত শব্দবোৰ কর্মৰ বিশেষণৰূপে স্থান গ্রহণ কৰে । সেয়েহে , এই প্রত্যয়ান্ত ধাতুটো তাৰ কর্ম অনুযায়ী লিংগ, বচন আৰু বিভক্তিৰ ৰূপ লয় । আকৌ, ভাৱবাচ্যত প্রয়োগ হোৱা এই প্রত্যয়ান্ত শব্দবোৰ সদায় অকাৰান্ত নপুংসক একবচন শব্দৰ দৰে হয় । যেনে- ময়া পত্রিকা পঠনীয়া , ত্বয়া ক্রীডিতব্যম্ ইত্যাদি ।

তব্যৎ প্রত্যয়ৰ ইৎ গৈ তব্য হৈ থাকে থাকে আৰু অনীয়ৰ্ ৰ ৰ্ ইৎ হৈ অনীয় থাকে। তব্যৎ আৰু অনীয়ৰ প্রত্যয়ান্ত শব্দ কেইটামানৰ উদাহৰণ – দাতৱ্যম্, দানীয়ম্, দ্রষ্টব্যম্, দর্শনীয়ম্, ৰক্ষিতব্যম্ , ৰক্ষণীয়ম্ – ইত্যাদি।

২) য়ৎ

কর্মবাচ্য আৰু ভাৱবাচ্যত অজন্ত ধাতুৰ পিছত য়ৎ প্রত্যয় প্রয়োগ হয় । য়ৎ প্রত্যয়ৰ লোপ হয়। এই প্রত্যয়ৰ সংযোগত ধাতুৰ অন্তিম স্বৰত ‘এগুণ‘ আৰু ‘অৰ্‘ আদেশ হয়। যেনে- চেয়ম্, দেয়ম্, শ্রৱ্যম্ , ভৱ্যম্ ইত্যাদি।

৩) ক্যপ্

কর্মবাচ্য আৰু ভাৱবাচ্যত ই, স্তু, শাস্, বৃ, দৃ, জুষ্ ইত্যাদি ধাতুৰ পিছত ক্যপ্ প্রত্যয় হয়। এই প্রত্যয়ৰ ‘ক্‘ ‘প্‘ লোপ গৈ ’য়্’ শেষ থাকে । কিন্তু, অন্তিম স্বৰ হ্রস্ব হ’লে ‘হ্রস্বস্য পিতি কৃতি তুক্’ সূত্রৰ যোগত তুকাগম হয় । ‘তুক্‘ৰ ‘উ’ ‘ক’ লোপ হয় । আকৌ, ‘শাস্’ ধাতুৰ লগত ক্যপ্ প্রত্যয় যোগ হলে আৰু স্থানত ই-কাৰ হয় । যেনে- শাস্ + ক্যপ্ = শিষ্য, স্তু+ক্যপ্ = স্তুত্য, জুষ্ + ক্যপ = জুষ্য ইত্যাদি।

৪) ণ্যৎ

কর্মবাচ্য আৰু ভাৱবাচ্যত ঋকাৰান্ত আৰু ব্যঞ্জনবর্ণান্ত ধাতুৰ পিছত ণ্যৎ প্রত্যয় হয়। ণ্যৎ প্রত্যয়ৰ ‘ণ্‘ ‘ৎ’ লোপ হয়, ‘য়’ থাকে । কিন্তু, ঋকাৰন্ত ধাতুৰ পিছত ‘আৰ্’ বৃদ্ধি হয় । যেনে- কৃ + ণ্যৎ = কার্য্যম্ , হৃ + ণ্যৎ = হার্য্যম্, পঠ্ + ণ্যৎ = পাঠ্যম্, বুধ্ + ণ্যৎ = বোধ্যম্ ইত্যাদি ।

৫) ন্বুল্ আৰু তৃচ্

কর্ত্তৃবাচ্যত ধাতুৰ পিছত ষ্বুল্ আৰু তৃচ্ প্ৰত্যয় ব্যৱহাৰ হয় ষ্বুল্ প্ৰত্যয়ান্ত শব্দবোৰ সাধাৰণতে, অকাৰান্ত পুং লিংগ শব্দৰ দৰে হয় আৰু স্ত্ৰী লিংগত আকাৰান্ত হয় । আনহাতে, 'তৃচ্' প্ৰত্যয়ান্ত শব্দবোৰ ঋকাৰান্ত শব্দৰ দৰে হয় আৰু স্ত্ৰী লিংগত ঈ- কাৰান্ত হয় । ষ্বুল্ , প্ৰত্যয়ৰ 'ণ্', 'ল্' লোপ হয়। 'ৱু' থাকে । কিন্তু, 'যুৱোৰনাকৌ (৭/১/১ ।।)' সূত্ৰ অনুসৰি 'ৱু' ৰ স্থানত 'অক্' আদেশ হয় । আকৌ, 'তৃচ্' 'প্ৰত্যয়ৰ' 'চ্' ইৎ গৈ, থাকে মাথোন 'তৃ'।

'ষ্বুল্' আৰু 'তৃচ' প্ৰত্যয়ান্ত শব্দৰ কেইটামান উদাহৰণ – কাৰকঃ, কর্তৃ, তাৰকঃ, জনক: গ্ৰাহকঃ, দাতৃ, শ্ৰোতৃ, নেতৃ, ইত্যাদি ।

৬) ক্ত আৰু ক্তৱতু

ক্ত আৰু ক্তৱতু এই প্ৰত্যয় দুটাক একেলগে নিষ্ঠা প্ৰত্যয় বুলি কোৱা হয়। নিষ্ঠা প্ৰত্যয়ান্ত শব্দবোৰ সাধাৰণতে বিশেষণ হয়। অতীতকাল বুজাবলৈ ক্ত, ক্তৱতু প্ৰত্যয়ৰ প্ৰয়োগ কৰা হয়। ক্ত প্ৰত্যয় সাধাৰণতে কর্মবাচ্য, আৰু ভাৱবাচ্যত প্ৰয়োগ কৰা হয় । ক্ত প্ৰত্যয়ান্ত শব্দবোৰ কর্মৰ বিশেষণ। কর্মৰ বচন, লিংগ, বিভক্তি অনুযায়ী তাৰো একেই কৰা হয়। আনহাতে, ক্তৱতু প্ৰত্যয়ান্ত শব্দবোৰ কর্তাৰ বিশেষণ ৰূপে ব্যৱহাৰ হয় । কর্ত্তাৰ লিংগ, বচন, বিভক্তি অনুযায়ী ক্তৱতু প্ৰত্যয়ান্ত শব্দৰো সেই একেই লিংগ, বচন আৰু বিভক্তি কৰা হয় । কর্মবাচ্যত ব্যৱহৃত ক্ত প্ৰত্যয়ান্ত শব্দবোৰ তিনিওটা লিংগতে ৰূপ কৰা হয় । কিন্তু, ভাৱবাচ্যত ব্যৱহাৰ হোৱা ক্ত প্ৰত্যয়ান্ত শব্দবোৰে কেৱল ক্লীৱলিংগৰ একবচনত ৰূপ হয়। ক্তৱতু প্ৰত্যয়ান্ত শব্দবোৰ তিনিওটা লিংগতে ৰূপ কৰা হয়।' ক্ত' প্ৰত্যয়ৰ 'ক' লোপ হৈ ত থাকে আৰু 'ক্তৱতু' প্ৰত্যয়ৰ 'ক', 'উ' লোপ হৈ 'তৱৎ' শেষ থাকে। যেনে- জ্ঞাতঃ, জ্ঞাতৱৎ, কৃতঃ, কৃতৱৎ, উক্তঃ, উক্তৱৎ, দণ্ডঃ, দত্তৱৎ, গতঃ, গতৱৎ ইত্যাদি।

৭) কানচ্ আৰু ক্ৱসু

অতীত কালৰ অর্থ বুজাবলৈ কানচ্ আৰু ক্ৱসু প্ৰত্যয় ধাতুৰ পিছত ব্যৱহাৰ কৰা হয় । কানচ্ প্ৰত্যয় আত্মনেপদী ধাতুৰ পিছত আৰু ক্ৱসু প্ৰত্যয় পৰস্মৈপদী ধাতুৰ পিছত প্ৰয়োগ কৰা হয় । এই প্ৰত্যয়ান্ত শব্দবোৰ বিশেষণ ৰূপে ব্যৱহৃত হয় । 'কানচ' 'প্ৰত্যয়ৰ' 'আন্' আৰু 'ক্ৱসু' প্ৰত্যয়ৰ 'ৱস্' শেষ থাকে । 'কানচ্' আৰু 'ক্ৱসু' প্ৰত্যয়ৰ কেইটামান উদাহৰণ – চক্রাণঃ, চকৃৱস্, যুযুধান্, শিশিক্ষান্, ৰুৰুচান্, জগ্মিৱস্, পপিৱস্, উচিৱস্ ইত্যাদি।

৮) শতৃ আৰু শানচ্

বর্তমান কাল বুজাবলৈ কর্তৃবাচ্যত পৰাস্মৈপদী ধাতুৰ পিছত 'শতৃ' প্ৰত্যয় হয় । কর্তৃবাচ্যত 'শতৃ' প্ৰত্যয়ান্ত শব্দবোৰ কর্ত্তাৰ বিশেষণ ৰূপে প্ৰয়োগ হয় । 'শতৃ' প্ৰত্যয়ৰ 'শ্', আৰু 'ঋ' ইৎ যায়, 'অৎ' শেষ থাকে। যেনে- বালক: ধাৱৎ গচ্ছতি ।

আনহাতে, বর্তমানকাল বুজাবলৈ কর্তৃবাচ্য আৰু কর্মবাচ্যত আত্মনেপদী ধাতুৰ পিছত 'শানচ্' প্রত্যয় হয়। কর্তৃবাচ্যত 'শানচ্' প্রত্যয়ান্ত শব্দবোৰ কর্ত্তাৰ বিশেষণ আৰু কর্মবাচ্যত কর্মৰ বিশেষণ ৰূপে ব্যৱহৃত হয় । 'শানচ্' প্রত্যয়ৰ 'শ' আৰু 'চ' ইৎ যায়, আন্ থাকে । কিন্তু, কেতিয়াবা কিছুমান ধাতুৰ সংযোগত-'আন্' ৰ ঠাইতো 'মান্' হয়।

সাধাৰণতে, বহি-বহি, দৌৰি-দৌৰি, হাঁহি-হাঁহি, নাচি-নাচি এনেকুৱা ধৰণৰ অর্থ ব্যৱহাৰ কৰিবলৈ 'শতৃ – শানচ্' প্রত্যয় ব্যৱহাৰ কৰা হয় । শতৃ – শানচ্ প্রত্যয় ব্যৱহৃত কেইটামান উদাহৰণ- জয়ৎ, ত্যজৎ, গায়ৎ, গৃহ্নান, শয়ান, বিদ্যমান, ম্রিয়মাণ ইত্যাদি।

৯) স্যতৃ আৰু স্যমান

লৃট্ বিভক্তি অর্থাৎ ভৱিষ্যৎ কালৰ অর্থ বুজাবলৈ কর্তৃবাচ্যত, পৰস্মৈপদী ধাতুৰ পিছত স্যতৃ আৰু আত্মনেপদী ধাতুৰ পিছত স্যমান প্রত্যয় প্রয়োগ কৰা হয় । এই প্রত্যয়ান্ত শব্দবোৰ বিশেষণ শব্দ আৰু ইয়াৰ লিংগ, বচন আৰু বিভক্তি, বিশেষ্য অনুযায়ী হয়। স্যতৃ প্রত্যয়ৰ 'ঋ' কাৰ ইৎ যায়, কেৱল 'স্যৎ' অংশ থাকে আৰু স্যমানৰ গোটেইটোৱে থাকে; মাথোন 'স' ৰ স্থানত 'ষ' হয়। স্যতৃ আৰু স্যমান প্রত্যয়ৰ কেইটামান উদাহৰণ যেনে- যাস্যৎ, কৰিষ্যৎ, ভোক্ষ্যৎ, বর্ত্তিষ্যমান, ৰোচিষ্যমান, সহিষ্যমান ইত্যাদি।

১০) তুমুন্

যেতিয়া দুটা ক্রিয়াকে কর্ত্তা এটা হয় আৰু দুয়োটা ক্রিয়া পৰস্পৰে পৰস্পৰৰ অর্থৰ লগত জড়িত থাকে, তেতিয়া তাৰ অসমাপিকা ক্রিয়াটোত 'লৈ' (খাবলৈ, যাবলৈ ইত্যাদি) অর্থত 'তুমুন' প্রত্যয় ব্যৱহাৰ হয়। 'কালসময়বেলাসু তুমুন্' -এই সূত্রানুসৰি সময় বুজাবলৈও 'তুমুন্' প্রত্যয়ৰ ব্যৱহাৰ কৰা হয় । যেনে-'সময়োহয়ং অধ্যেতুম্' (এইটো পঢ়াৰ সময়) । 'তুমুন্' প্রত্যয়ান্ত শব্দবোৰ অব্যয় পদ ৰূপে ব্যৱহাৰ হয়। ভৱিষ্যৎ কাল বুজোৱা অর্থত সাধাৰণতে এই প্রত্যয়ৰ প্রয়োগ কৰা পৰিলক্ষিত হয় । এটা ক্রিয়াৰ কাৰণে যেতিয়া, অন্য এটা ক্রিয়াৰ আৱশ্যকতা আহি পৰে, তেতিয়া সেই উদ্দেশ্যে ব্যৱহৃত ধাতুটোত 'তুমুন্' প্রত্যয় যোগ কৰা হয় । 'তুমুন্' প্রত্যয়ৰ 'উন্' ইৎ গৈ 'তুম্' শেষ থাকে। যেনে- দাতুম্, স্থাতুম্, গাতুম, ভোক্তুম্ ইত্যাদি।

১১) ঘঞ্

ভাৱবাচ্যৰ অর্থত ঘঞ্ প্রত্যয় প্রয়োগ কৰা হয় । অৱশ্যে, কেতিয়াবা কর্মবাচ্যৰ অর্থতো ইয়াৰ প্রয়োগ হয় । যেনে- পদ্যতে (গম্যতে) অনেন ইতি পাদঃ ইত্যাদি । ঘঞ্ প্রত্যয় 'ঘ্', 'ঞ্' লোপ হয়, কেৱল 'অ' থাকে । যেনে- পাকঃ, শোকঃ, ভোগঃ, নাশঃ, ঘাতঃ ইত্যাদি ।

১২) ল্যুট্ / অনট্

ল্যুট্ প্রত্যয়ক অনট্ বুলিও জনা যায়। কাৰণ আৰু অধিকৰণ অর্থত ধাতুৰ পিছত 'অনট্' প্রত্যয় যোগ কৰা হয়। এই প্রত্যয়ান্ত শব্দবোৰ নপুংসক লিংগত ব্যৱহাৰ কৰা হয় ।' অনট্ ' প্রত্যয়ৰ ' অন্' থাকে; 'ট্' ইৎ যায় । যেনে- হসনম্, ভোজনম্, জ্ঞানম্, বর্ধনম্ ইত্যাদি।

১৩) ক্তিন্

ভাৱবাচ্যত ধাতুৰ পিছত ক্তিন্ প্রত্যয় হয় । ক্তিন্ প্রত্যয়ান্ত শব্দবোৰ স্ত্রীলিংগ । ঋ- কাৰান্ত আৰু ল্বাদি ধাতুৰ পৰা উৎপন্ন হোৱা শব্দবোৰ নিষ্ঠা প্রত্যয়ৰ দৰে হয় । ক্তিন্ প্রত্যয়ৰ 'ক্', 'ন্' ইৎ যায় আৰু 'তি' বাকী থাকে । অৱশ্যে, হা; গ্লা- আদি কেইটামান ধাতুত 'ক্তিন্' ৰ 'তি' ৰ ঠাইত- 'নি' হয়। যেনে- হানিঃ, গ্লানিঃ, আপ্তিঃ, গীতিঃ, খ্যাতিঃ ইত্যাদি।

১৪) ক্ত্বা

পঢ়ি উঠি, বধ কৰি, স্নান কৰি এনেকুৱা ধৰণৰ পূর্বকালিক ক্রিয়াত 'ক্ত্বা' প্রত্যয় যোগ কৰা হয় । একেটা কর্ত্তাৰ দুটা ক্রিয়া থাকিলে, আগতে সম্পাদন হোৱা ক্রিয়াটোক পূর্বকালিক ক্রিয়া বোলে । 'অলং খল্বোঃ প্রতিযোধয়োঃ প্রাচাং ক্ত্বা' (৩/৪/১৮।।)-এই সূত্র অনুসৰি নিষেধ অর্থ বুজোৱা 'অলং', 'খলু'- ইত্যাদি শব্দৰ যোগত বিকল্পে 'ক্ত্বা' প্রত্যয় প্রয়োগ হয় । আকৌ, 'সমাসেহনঞ্পূর্বেক্ত্বো ল্যপ্ (৭/১/৩৭) –এই সূত্র অনুসৰি 'নঞ্" তৎপুৰুষ আগত থাকিলে, 'ল্যপ্'ৰ সলনি ' ক্ত্বা' প্রত্যয় ব্যৱহাৰ হয় । 'ক্ত্বা' প্রত্যয়ান্ত শব্দবোৰ অসমাপিকা ক্রিয়া আৰু অব্যয় ৰূপে ব্যৱহৃত হয় ।

ক্ত্বা প্রত্যয়ৰ 'ক্' ইৎ যায়, 'ত্বা' শেষ ৰয় । যেনে- দৃষ্ট্বা, পীত্বা, বদিত্বা, ত্যক্ত্বা, গত্বা ইত্যাদি ।

১১.৮. अध्यायात् किमवगतम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान्-

- कृत्प्रत्ययानां तेषां विभागानां च सम्यक् ज्ञानं प्राप्तवन्तः ।
- कृत्प्रत्ययाः कस्मिन्नर्थे प्रयुज्यन्ते, तद्विषयकं ज्ञानमपि प्राप्तवन्तः ।
- अपि च, भिन्नकृत् विषयानुसारेण शब्दानां भिन्नाकारगतानि रूपाण्यपि अवगतानि ।

১১.৯ জ্ঞানাধিক্যম্

১. शर्मा, राजेन्द्रनाथः (২০১৪); संस्कृत व्याकरण-सुरभिः गुवाहाटी: एम, एल् पालिकेछनः ।

২. विद्यासागरः ,ईश्वरचन्द्रः (১৯३১); संस्कृत-व्याकरण-उपक्रमणिका ; वेनारसः ः नन्दकिशोरः एण्ड ब्रछ् ।

३. विद्यासागरः, ईश्वरचन्द्रः; समग्रव्याकरण-कौमुदी; कलिकता: देवसाहित्यः कुटीरः प्राइभेट लिमिटेड्।

४. वरदाचार्य (१९९३); लघु-सिद्धान्त-कौमुदी, गोरखपुरः, गीता-प्रेछः।

५. भट्टाचार्यः, हरिचन्द्रः (१९९६); संस्कृत-व्याकरण- प्रभा; गुवाहाटी: बरुवा एजेञ्चि।

✓११.१० अग्रगत्याः निरूपणम्

उत्तरम् : १ : कृत्प्रत्ययस्य परिचयः तस्य विभागाः च संक्षेपेण वर्णिताः भवेयुः।

उत्तरम् : २ :

क) शी+तव्यत्।

ख) हस् + अनीयर्।

ग) चि+ यत्।

घ) शास् + क्यप्।

ङ) वच् + ण्यत्।

उत्तरम् : ३ : शतृ-शानच् प्रत्ययोः प्रयोगं तथा च व्यवहारं सोदाहरणं वर्णनीयम्।

उत्तरम् : ४ : क) श्रु+ तृच्।

ख) तृ+ ण्वुल्।

ग) मुच् + क्त।

घ) त्यज् + क्तवतु।

ङ) कृ + कानच्।

च) विद् + क्वसु।

छ) वृ+ स्यमान।

ज) या + स्यतृ।

⍰११.११ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

प्रश्नः १. – अधोलिखितानां शब्दानां प्रकृतिप्रत्ययानां विभाजनं करोतु -

गन्तुम्, जनकः, रोदनम्, गीतिः, नाशः, तीर्त्वा, विजित्य ।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु) ।

टिप्पणी प्रदेया

प्रश्नः १: तव्यत्तव्यानीयर्।

प्रश्नः २ : क्तक्तवतु निष्ठा।

प्रश्नः ३ : ऋहलोर्ण्यत्।

प्रश्नः ४ : स्त्रियां क्तिन्।

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु) ।

प्रश्नः १- निष्ठाप्रत्ययविषये सोदाहणं व्याख्यातव्यम् 1

प्रश्नः २ – कृत्यप्रत्ययानां विषये सविशेषं व्याख्यातव्यम् ।

*****

अध्यायः १२ तद्धितप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

अध्यायस्य संरचना

१२.१ उद्देश्यम्

१२.२ परिचयः

१२.३ तद्धितप्रकरणम्

- १२.३.१ साधारणतद्धितप्रत्ययाः
- १२.३.२ अपत्याधिकारः
- ११.३.३ रक्ताद्यर्थकाः
- २२.३.४ चातुरर्थिकाः
- १२.३.५ शैषिकाः
- १२.३.६ विकारार्थकाः
- १२.३.७ ठगधिकारः
- २२.३.८ यदधिकारः
- १२.३.९ छयतोरधिकारः
- १२.३.१० ठञधिकारः
- १२.३.११ त्वतलोरधिकारः
- १२.३.१२ भावनाद्यर्थकारः
- १२.३.१३ मत्वर्थीयाः
- १२.३.१४ प्राग्दिशीयाः
- १२.३.१५ प्रागिवीया
- १२.३.१६ स्वार्थिकाः

१२.४ अध्यायात् किमवगतम्

१२.५ ज्ञानाधिक्यम्

१२.६ अग्रगत्याः निरूपणम्

२२.७ अभ्यासप्रश्नाः

१२.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनाद् अनन्तरं भवन्तः-

- तद्धितप्रत्ययैः सह परिचिताः भविष्यन्ति।

- लघुसिद्धान्तकौमुदीग्रन्थे प्रतिपादितानि तद्धितप्रकरणस्य सूत्राणि तथा तेषां उदाहरणानि ज्ञातुं शक्ष्यन्ति।
- तद्धितप्रत्यायानां भेदान् तथा तेषाम् उदाहरणानि ज्ञातुं प्रभविष्यन्ति।
- तद्धितप्रत्ययानां प्रयोगेन शब्देषु जायमानम् आकृतिमूलकं परिवर्तनं ज्ञातुं शक्ष्यन्ति।

१२.२ परिचयः

संज्ञा-सर्वनाम-विशेषणादिषु येषां प्रत्यायानां संयोजनेन नवीनाः शब्दाः निर्मीयन्ते ते प्रत्ययाः तद्धितप्रत्ययाः उच्यन्ते। तत्र तद्धितशब्दस्य व्युत्पत्तिः एवं वक्तुं शक्यते यत्- "तेभ्यः प्रयोगेभ्यः हिताः तद्धिताः" इति। सुबन्तेभ्यो विहितानां तद्धितप्रत्ययानां संयोगेन सिद्धाः तद्धितान्तशब्दाः अपि संज्ञा-विशेषण-अव्यय-क्रियादिबोधिकाः भवन्ति। तद्धितप्रत्ययान्तशब्दानां 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञा भवति; तदन्तरं सुबाद्युत्पतिः भवति, तेन संज्ञा-सर्वनाम-विशेषणादिशब्दानां रूपाणि त्रिषु लिङ्गेषु, सर्वासु विभक्तिषु, त्रिषु वचनेषु यथाशास्त्रं प्रचलन्ति। तत्र च येषां तद्धितप्रत्ययानाम् अव्ययसंज्ञा भवति, तदनन्तरं विधीयमानानां सुबादिप्रत्ययानां लग्-विधानेन तत्रैकमेव रूपं दृष्टिगोचरं भवति।

तद्धितप्रत्ययेषु केचिद् एतादृशाः प्रत्ययाः सन्ति, येषां स्वरूपाणि समानानि भवन्ति , किन्तु अर्थाः प्रकरणानुसारेण परिवर्तिताः भवन्ति। यथा -अण्, अञ्, इत्यादिकाः प्रत्ययाः। तद्विषयेऽग्रे आलोच्यते।

केचन आवश्यकनियमाः

'तद्धितेष्वचामादेः' इति सूत्रेण यदि कस्मिंश्चित् तद्धितप्रत्यये णकारः ञकारः वा इत्संज्ञकः अस्ति, तर्हि तस्मिन् प्रत्यये परे अङ्गस्य प्रथमः यः अच् वर्णः तस्य वृद्धिः भवति। यथा - दक्ष+ इञ् = दाक्षि।

'किति च' इति सूत्रेण यदि कस्मिंश्चित तद्धित-प्रत्यये ककारः इत्संज्ञक अस्ति, तहि तस्मिन् प्रत्यये परे अङ्गस्य प्रथमः यः अच्-वर्ण, तस्य वृद्धिः भवति। यथा – विनाता + ढक् = वैनतेयः।

'यस्येति च' इति सूत्रेण भसंज्ञकस्य अङ्गस्य अवर्णस्य इवर्णस्य च तद्धितप्रत्यये परे ईकारे परे च लोपो भवति। यथा- गणपति + अण् = गाणपतम्।

'ओर्गुणः' इति सूत्रेण उवर्णान्तस्य भसंज्ञकस्य तद्धितप्रत्यये परे गुणादेशो भवति। यथा- वधू +अण् = वाधवम्।

'ठस्येकः' अङ्गात् परस्य प्रत्ययस्य आदौ विद्यमानस्य ठकारस्य 'इक' आदेशो भवति। यथा - रेवती + ठक् = रैवतिकः।

'युवोरनाकौ' इति सूत्रेण अनुनासिक यु- इत्यस्य अन-आदेशः , अनुनासिक -वु- इत्यस्य च अक-आदेशो भवति। यथा – शिक्षक + वुन् (वु- अक) = शिक्षकः।

'आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्' इति सूत्रेण प्रत्ययस्य आदिस्थितस्य फ्-ढ्-ख्-छ्-घ् इत्येतेषां क्रमेण आयन्-एय्-ईन्-ईय्-इय् - आदेशाः भवन्ति।

फ - आयन्

ढ् - एय्

ख् - ईन्

छ् - ईन्

घ् - इय्

यथा - गार्ग्य + फक् (फ्-आयन्) = गार्ग्यायणः ।

विनाता + ढक् (ढ्-एय्) = वैनतेयः ।

कुल + ख् (ख- ईन्) = कुलीनः।

शाला + छ (छ्-ईय्) = शालीयः ।

क्षत्र + घ्(घ्+इय्) = क्षत्रियः।

१२.३ तद्धितप्रकरणम्

वरदराजाचार्येण तदीये लघुसिन्दान्तकौमुदीग्रन्थे तद्धितप्रत्ययाः षोडशप्रकरणेषु विभक्ता सन्ति । तानि प्रकरणानि यथा-

(क) तद्धितसाधारणप्रत्ययप्रकरणम्

(ख) अपत्याधिकारप्रकरणम्

(ग) रक्ताद्यर्थकप्रकरणम्

(घ) चातुरर्थिकप्रकरणम्

(ङ) शैषिकप्रकरणम्

(च) विकारार्थप्रकरणम्

(छ) ठगधिकारप्रकरणम्

(ज) यदधिकारप्रकरणम्

(झ) छयतोऽधिकारप्रकरणम्

(स) ठञधिकारप्रकरणम्

(ट) त्वतलोरधिकारप्रकरणम्

(ठ) भवनाद्यर्थकप्रकरणम्

(ङ) मत्वर्थीयप्रकरणम्

(ठ) प्राग्दिशीयप्रकरणम्

(ण) प्रागिवीयप्रकरणम्

अध्यायेऽस्मिन् लघुसिद्धान्तकौमुद्यां प्रतिपादितानि तद्धितप्रकरणस्य प्रमुखसूत्राणि यथाप्रकरणं सोदाहरणं प्रदीयन्ते ।

१२.३.१ साधारणतद्धितप्रत्ययाः

(१) 'अश्वपत्यादिभ्यश्च' इति सूत्रेण अश्वपत्यादिगणस्य शब्देभ्यः पाग्दीव्यतीयार्थेषु अण्-प्रत्यय एव विधीयते नान्यत। यथा-

अश्वपतेः अपत्यम् = अश्वपति + अण् = आश्वपतिः।

गणपतेः अपत्यम् = गणपति + अण् = गाणपतम्।

ज्ञातव्यम्

'अण्'- प्रत्ययस्य णकारस्य हलन्त्यमिति लोपसंज्ञा। तस्य लोपः सूत्रेण लोपे कृते 'अ' इति अवशिष्यते ,अपि च अत्र अपत्यं, गोत्रापत्यं, यवापत्यं, सास्य देवता, तस्य समूहः, तदधीते तद्वेद, तत्र जातः, प्रायः भवः, सम्भूतः, उप्तः, तत्र भवः प्रोक्तम्। तस्येदम्, तस्य विकार तस्यावयवः इत्यादिषु अर्थेषु प्रत्ययो विधीयते।

(२) 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति सूत्रेण दिति-अदिति-आदित्यशब्देभ्यः तथा 'पति' येषामुत्तरपदमस्ति तादृशेभ्यः शब्देभ्यः प्राग्दीव्यतीयार्थेषु व्यप्रत्ययो भवति । उक्तशब्देभ्यः अनेन सूत्रेण अण्-प्रत्ययस्य अपवादरूपेण व्यप्रत्ययः भवति। यथा-

दितेः अपत्यम् (निवासः/समूहः इदम्) दिति +ण्य = दैत्यः ।

अदितेः अपत्यम् = अदिति + ण्य = आदित्यः ।

आदित्यस्य अपत्यम् = आदित्य + ण्य = आदित्यः/आदित्य्यः ।

प्रजापतेः अपत्यम् = प्रजापति + ण्य = प्राजापत्यः ।

ज्ञातव्यम्

ण्य-प्रत्ययस्य णकारस्य 'चुटू' सूत्रेण इत्संज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे 'य' अविशिष्यते।

(३) 'देवाद्यञञौ' इति वार्तिकेन देवशब्दात् प्राग्दीव्यतीयार्थेषु 'यञ्' तथा 'अञ्' प्रत्ययौ विधीयते। यथा-

देवस्य अपत्यम् = देव + यञ् = दैव्यम्।

देवस्य अपत्यम् = देव + अञ् = दैवम्।

४) 'बहिषष्टिलोपो यञ्च' इति वार्तिकेन (बहिस् - शब्दात् प्राग्दीवतीयार्थेषु यञ् प्रत्ययो भवति। यथा – वहिस् + यञ् = बाह्यः (बहिर्भवः)।

(५) 'इकक् च' च इति वार्तिकेन बहिस्-शब्दात् प्राग्दीव्यतीयार्थेषु 'इकक्' इति प्रत्ययोऽपि भवति।

यथा - बहिस् + ईकक् = बाहीकः।

६) 'गोरजादिप्रसङ्गे यत्' इति वार्तिकनियमेन गौशब्दात् यत्र यत्र अजादिप्रत्ययः विधीयते। तत्र तत्र तं बाधित्वा 'यत्' इति प्रत्ययो भवति। यथा- गो + यत् = गव्यम्।

(७) 'उत्सादिभ्योऽञ्' इति सूत्रेण उत्सादिगणस्य शब्देभ्यः प्राग्दीव्यतीयार्थेषु 'अञ्'-प्रत्ययो भवति। यथा - उत्सानां समूहः = उत्स + अञ् = औत्सः।

१२.३.२ अपत्याधिकारः

(१) स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् इति सूत्रेण प्रथमाध्यायस्य प्रथमपादस्य समाप्तिं यावत् उक्तेषु सर्वेषु अर्थेषु स्त्रीशब्दात् 'नञ्' तथा 'पुंस्'- शब्दात् 'स्नञ्' इति तद्धितप्रत्ययो विधीयते। यथा-

स्त्रिया अपत्यम् - स्त्री + नञ् (न) = स्त्रणः।

पुंसः अपत्यम् = पुंस् + स्न = पौस्न:।

(२) 'गर्गादिभ्यो यञ्' इति सूत्रेण गोत्रापत्यस्य निर्देशार्थं गर्गादिगणस्य शब्देभ्यः यञ् प्रत्ययो भवति। यथा - गर्गस्य अपत्यं पुमान् = गर्ग + यञ्(य) = गार्ग्यः।

वत्सस्य अपत्यं पुमान् वत्स + यञ् = वात्स्यः।

विशेषः- 'यञञोश्च' इति गोत्रे यद् यञन्तमञन्तञ्च तदवयवयोः. एतयोः लुक् स्यात्, तकृते बहुत्वे न तु स्त्रियाम्। यथा- गर्गस्य अपत्यानि - गर्ग + यञ् = गर्गाः।

(३) 'यञिञोश्च' इति सूत्रेण युवापत्यस्य निर्देशार्थं यञ्-प्रत्ययान्तशब्देभ्यः च फक्-प्रत्ययो भवति।यथा- गर्गस्य युवापत्यम् = गार्ग्य + फक् (फ-आयन्) = गार्ग्यायणः।

वत्स्यस्य युवापत्यम् = वात्स्य + फक् (फ-आयन्) = वात्स्यायणः।

ज्ञातव्यम्

गार्ग्यायणः इत्यत्र 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्थाने णकारः जातः।

(४) 'अत इञ्' इति सूत्रेण तस्यापत्यम् इत्यस्मिन् अर्थे अदन्तेभ्यः प्रातिपदिकेभ्यः इञ्- प्रत्ययो भवति। यथा- दक्षस्य अपत्यम् = दक्ष+ इञ् (इ) = दाक्षिः।

(५) 'बाह्वादिभ्यश्च' इति सूत्रेण 'तस्य अपत्यम्' अस्मिन् अर्थे बाह्वादिगणस्य शब्देभ्यः इञ्-प्रत्ययो भवति।' यथा-

बाहोः अपत्यं पुमान् - बाहु + इञ् (इ) = बाहविः।

उडुलोम्नः अपत्यं पुमान् = उडुलोमन् + इञ्(इ) = औडुलोमिः।

६) 'अनृष्यानन्तर्ये विदादिभ्योऽञ्' इति सूत्रेण गोत्रापत्यस्य निर्देशार्थं बिदादिगणस्य शब्देभ्यः अञ्-प्रत्ययो भवति। परन्तु, बिदादिगणे विद्यया ये शब्दाः ऋषिवाचकाः न सन्ति, तेषां विषये अनन्तरापत्ये एव अञ्-प्रत्ययो भवति। यथा-

बिदस्य अपत्यं पुमान् = बिद + अञ् (अ) = बैदः।

पुत्रस्य अपत्यं पुमान् = पुत्र + अञ् (अ) = पौत्रः ।

दुहितुः अपत्यं पुमान् = दुहितृ + अञ् (अ) = दौहित्रः ।

(७) 'शिवादिभ्योऽण्' इति सूत्रेण तस्य अपत्यम् अस्मिन् अर्थे शिवादिगणस्य शब्देभ्यः अण् प्रत्ययो भवति । यथा -

शिवस्य अपत्यं पुमान् = शिव + अण्(अ) = शैवः ।

गङ्गायाः अपत्यं पुमान् = गङ्गा + अण् (अ) = गाङ्गः ।

चण्डस्य अपत्यं पुमान् = चण्ड + अण्(अ) = चाण्डः ।

मनेरपत्यं पुमान् = मुनि + अण् (अ) = मौनः ।

पथिकस्यापत्यं पुमान् = पथिक + अण्(अ) = पाथिकः ।

(८) 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इति सूत्रेण ऋषिवाचिशब्देभ्यः, अन्धककुलवाचिशब्देभ्यः वृष्णिकुलवाचिशब्देभ्यः तथा कुरुकुलवाचिशब्देभ्यः 'तस्य अपत्यम्' अस्मिन अर्थे अण्-प्रत्ययो भवति । यथा -

ऋचिवाचका

वसिष्ठस्य अपत्यं पुमान् = वसिष्ठ + अण् (अ) = वासिष्ठः ।

विश्वामित्रस्य अपत्यं पुमान् = विश्वमित्र + अण् (अ) वैश्वामित्रः ।

अन्धककुलवाचकाः

श्वफल्कस्य अपत्यं पुमान् = श्वफल्क + अण् (अ) = श्वाफल्कः ।

रन्धसः अपत्यं पुमान् = रन्धस् + अण् (अ) = रान्धसः ।

वृष्णिकुलवाचकाः

वसुदेवस्य अपत्यं पुमान् = वसुदेव + अण् (अ) = वासुदेवः ।

अनिरुद्धस्य अपत्यं पुमान् = अनिरुद्ध + अण् (अ), आनिरुद्धः ।

कुरुकुलवाचकाः

नकुलस्य अपत्यं पुमान् = नकुल + अण् (अ) = नाकुलः ।

सहदेवस्य अपत्यं पुमान् = सहदेव + अण् (अ) = साहदेवः ।

९) 'मातुरुत्संख्या सम्भद्रपूर्वायाः' इति सुत्रेण यदि मातृशब्दः संख्यावाचिशब्दात् सम्-शब्दात् भद्रशब्दात् च परः आगच्छति, तस्मात् तस्य इत्यर्थे अण्-प्रत्ययो भवति' तथा च मातृशब्दस्य उकारादेशो भवति । यथा -

द्वयोर्मात्रोरपत्यम् = द्विमातृ + अण्(अ) = द्वैमातुरः ।

षण्णां मातृणामपत्यम् = षण्मातृ + अण्(अ) = षाण्मातुरः ।

सम्मातुः अपत्यं पुमान् = सम्मातृ + अण्(अ) = साम्मातुरः ।

भद्रमातुरपत्यं पुमान् = भद्रमातृ + अण् (अ) = भाद्रमातुरः ।

(१०) 'स्त्रीभ्यो ढक्' इति सूत्रेण 'तस्य अपत्यम्' इत्यस्मिन् अर्थे स्त्रीप्रत्ययान्तशब्दात् ढक्-प्रत्ययो विधीयते। यथा –

विनातायाः अपत्यं पुमान् = विनाता + ढक् (ढ्- एय्) = वैनतेयः।

कौसल्यायाः अपत्यं पुमान् = कौसल्या + ढक् = कौसलेयः।

मद्रबाह्वाः अपत्यं पुमान् = मद्रबाहू + ढक् = माद्रबाहेयः।

युवतेः अपत्यं पुमान् = युवति + ढक् = यौवतेयः।

कुन्त्याः अपत्यं पुमान् = कुन्ती + ढक् = कौन्तेयः।

११) 'कन्यायाः कानीन च' इति सूत्रेण तस्य अपत्यम् इत्यस्मिन् अर्थे कन्याशब्दात् अण्-प्रत्ययो भवति तथा च कन्याशब्दस्य 'कनीन्' आदेशो भवति। यथा -

कन्याया अपत्यं पुमान् = कन्या - कनीन् + अण् = कानीनः।

(१२) 'राजश्वशुराद्यत्' इति सूत्रेण 'तस्य अपत्यम्' इत्यर्थे राजन्-शब्दात् तथा श्वशुरशब्दात् 'यत्'-प्रत्ययो भवति। यथा - राज्ञोऽपत्यं जातिः = राजन् + यत् (य) = राजन्यः।

(१३) 'क्षत्राद्घः' इति सूत्रेण 'तस्य अपत्यम्' इत्यस्मिन् अर्थे क्षत्रशब्दात् घ-प्रत्ययो भवति। यथा - क्षत्रियस्यापत्यं जातिः = क्षत्त्र + घ(इय) = क्षत्रियः।

(१४) 'रेवत्यादिभ्यष्ठक्' इति सूत्रेण 'तस्यापत्यम्' इत्यर्थे रेवत्यादिगणस्य शब्देभ्यः ठक् प्रत्ययो भवति। यथा- रेवत्याः अपत्यं पुमान् = रेवती + ठक् (इक) = रैवतिकः।

(१५) 'जनपदशब्दात् क्षत्रियादञ्' इति सूत्रेण क्षत्रियवाची यः शब्दः जनपदस्य नामरूपेण प्रयुज्यते, तस्मात् 'तस्य अपत्यम्' इत्यस्मिन्नर्थे -अञ्-प्रत्ययो भवति। यथा- पाञ्चालस्यापत्यं पुमान् = पञ्चाल + अञ् (अ) = पाञ्चालः।

(१६) 'पूरोरण् वक्तव्यः' इति वार्तिकेन पूरुशब्दाद् अपत्यार्थे 'अञ्' प्रत्ययो भवति। यथा -

पुरोरपत्यं पुमान् - पुरु + अण् (अ) = पौरवः।

(१७) 'पाण्डोर्ड्यण्' इति वार्तिकेन अपत्यार्थे अण् प्रत्ययो भवति। यथा -

पाण्डोरपत्यं पुमान् = पाण्डु + ड्यण् (य) = पाण्ड्यः।

(१८)" कुरुनादिभ्यो ण्यः' इति सूत्रेण क्षत्रियवाचिकुरुशब्दः तथा नकारादिक्षत्रियवाचिशब्दः यदि जनपदस्य नामरूपेण अपि प्रयुज्यते, तर्हि तेभ्यः 'तस्य अपत्यम्' इत्यर्थ ण्यप्रत्ययो भवति। यथा -

कुरोरपत्यं पुमान् = कुरु + ण्य (य) = कौरव्यः।

निषधस्यापत्यं पुमान् = निषध + ण्य (य) = नैषध्यः।

अग्रगत्याः निरीक्षणम्

अधःस्थानां शब्दानां प्रत्ययं लिखत-

(१) गार्गायणः

(२)वासुदेवः

(३) राजन्यः

(४) पाण्ड्यः

१२.३.३ रक्ताद्यार्थकाः

१) 'तेन रक्तं रागात् ' इति सूत्रेण तृतीयसमर्थात् रागवाचिनः सुबन्तात् 'रक्तम्' इत्यर्थे अण्-प्रत्ययो भवति । यथा - कषायेण रक्तम् (वस्त्रम्) - कषाय + अण् = काषायम् ।

मञ्जिष्ठेन रक्तम् (वसनम्) - मञ्जिष्ठ + अण् (अ)= माञ्जिष्ठम् ।

कुसुम्भेन रक्तम् (अम्बरम्) - कुसुम्भ + अण् (अ)= कौसुम्भम् ।

(२) 'नक्षत्रेण युक्तः कालः' इति सूत्रेण नक्षत्रवाचिनः तृतीयसमर्थात् 'युक्तः काल इत्यर्थे अण्-प्रत्ययो भवति । यथा-

पुष्येण युक्तं (अहः) - पुष्य + अण् (अ) = पौषम् (अहः) ।

चित्रया युक्तम् (अहः) - चित्रा + अण् (अ) = चैत्रम् ।

(३) 'दृष्टं साम' इति सूत्रेण येन साम दृष्टम् तस्मात् तृतीयासमर्थात् 'साम' इति निर्देशयितुमण् प्रत्ययः भवति । यथा -

वसिष्ठेन दृष्टं साम = वसिष्ठ+ अण् = वासिष्ठः (साम) ।

विश्वामित्रेण दृष्टं साम = विश्वामित्र +अण् (अ) = वैश्वामित्रं (साम) ।

(४) वामदेवाड्ड्यड्ड्यौ इति सूत्रेण दृष्टं साम इत्यर्थे तृतीयसमर्थात् वामदेवशब्दात् 'ड्यत्' तथा 'ड्य' इत्येतौ प्रत्ययौ भवतः । यथा- वामदेवेन दृष्टं साम = वामदेव + ड्यत् /ड्य(य) = वामदेव्यम् (साम) ।

(५) 'परिवृतो रथः' इति सूत्रेण तृतीयासमर्थात् 'परिवृतः' इत्यस्मिन् अर्थे रथं निर्देशयितुम् 'अण्-प्रत्ययो भवति । यथा-वस्त्रेण परिवृतो रथः = वस्त्र + अण् (अ) = वास्त्रो (रथः) ।

६) 'तत्रोद्धृतममत्रेभ्यः' इति सूत्रेण सप्तमीसमर्थात् अमत्रवाचिनः शब्दात् 'उद्धृतम्' इत्यस्मिन् अर्थे अण्-प्रत्ययो भवति। यथा -

शरावेषु उद्धृत ओदनः= शराव + अण् (अ) = शारावः(ओदनः) ।

मल्लिकासु उद्धृत ओदनः = मल्लिका + अण् (अ) = माल्लिकः (ओदनः) ।

कर्परे उद्धृतः ओदनः= कर्पर + अण् (अ) = कार्पारः (ओदनः) ।

विशेषः : अमत्र अर्थात् पात्रम् ।

(७) 'संस्कृतं भक्षाः' इति सूत्रेण समर्थशब्दात् 'संस्कृतम्' इत्यस्मिन् अर्थे भक्षं निर्देशयितुम् 'अण्- प्रत्ययो भवति। यथा-

भ्राष्ट्रे संस्कृताः यवाः = भ्राष्ट्र+अण् (अ) = भ्राष्ट्रा (यवाः)।

कुम्भे संस्कृताः यवाः = कुम्भ + अण्(अ) = कौम्भाः (यवाः)।

घृते संस्कृताः यवाः = घृत + अण् (अ) = घार्ताः (यर्वाः)।

कलशे संस्कृताः ओदनाः = कलश+ अण् (अ) = कलशः (ओदनाः)।

(८) 'सास्य देवता' इति सूत्रेण प्रथमसमर्थात् देवतावाचशब्दात् 'अस्य' इत्यस्मिन् अर्थे अण्-प्रत्ययो भवति। यथा-

इन्द्रो देवता अस्य (हवेः) इन्द्र+अण् (अ) = ऐन्द्रं (हविः)।

बृहस्पतिः देवताऽस्य= बृहस्पति + अण् (अ) = बार्हस्पत्यम्।

पशुपतिः देवताऽस्य =पशुपति + अण् (अ) = पाशुपत्यम्।

भानुः देवताऽस्य = भानु + अण् (ञ) = भानवः।

विष्णुः देवताऽस्य= विष्णु + अण् (अ) = वैष्णवः।

(९) 'शुक्राद्धन्' इति सूत्रेण 'सा अस्य देवता' इत्यर्थे 'शुक्र'शब्दात् 'घन्'-प्रत्ययो भवति। यथा -

शुक्रः देवता अस्य = शुक्र + घन् इय = शुक्रियम्।

(१०) सोमाट्ट्यण्' इति सूत्रेण 'साऽस्य देवता' इत्यर्थे सोमशब्दात् 'ट्यण्' प्रत्ययो भवति।यथा-

सोमो देवता अस्य= सोम + ट्यण् (य) = सौम्यम्।

(११) 'वाखृतुपित्रुषसो यत्' इति सूत्रेण 'साऽस्य देवता' इति अर्थे 'वायु,' 'ऋतु','पितृ' तथा 'उषस्' इत्येतेभ्यः शब्देभ्यः यत्प्रत्ययो भवति। यथा-

वायुः देवता अस्य = वायु+यत् (य) = वायव्यम्।

ऋतुः देवता अस्य = ऋतु यत् (य) = ऋतव्यम्।

पिता देवताऽस्य = पितृ + यत् (य) = पित्र्यम्।

उषाः देवताऽस्य =उषस्+ यत् (य) = उषस्यम्।

(१२) 'तस्य समूहः' इति सूत्रेण षष्ठीसमर्थात् शब्दात् समूहस्य निर्देशं कर्तुम् 'अण्-प्रत्ययो भवति। यथा-

काकानां समूहः = काक + अण् (अ) = काकम्।

वकानां समूहः = वक + अण् (अ) = वाकम्।

वृकानां समूहः= वृक+अण् (अ) = वार्कम्।

(१३) 'भिक्षादिभ्योऽण्' इति सूत्रेण भिक्षादिगणस्य शब्दानां विषये 'तस्य समूहः' इत्यस्मिन् अर्थे अण्-प्रत्ययो भवति। यथा -

भिक्षाणां समूहः =भिक्षा + अण् (अ) = भैक्षम्।

गर्भिणीनां समूहः = गर्भिणी + अण् (अ) = गार्भिणम् ।

क्षेत्राणां समूहः = क्षेत्र+अण् (अ) = क्षेत्रम् ।

अङ्गाराणां समूहः = अङ्गार + अण् (अ) = आङ्गारम् ।

चर्मिणां समूहः = चर्मिण्+ अण्(अ) = चार्मिणम् ।

युवतीनां समूहः= युवति + अण् (अ) = यौवनम् ।

(१४) 'ग्रामजनबन्धुभ्यस्तल्' इति सूत्रेण 'तस्य समूहः' इत्यर्थे 'ग्राम', 'जन' 'बन्धु' 'सहाय' इत्येतेभ्यः शब्देभ्यः तल्-प्रत्ययो भवति । तलन्तशब्दाः नित्यस्त्रीलिङ्गाः भवन्ति । यथा-

ग्रामाणां समूहः = ग्राम + तल् (ता) = ग्रामता ।

जननां समूहः = जन+ तल् (ता) = जनता ।

बन्धूनां समूहः = बन्धु+तल् (ता) = बन्धुता ।

सहायानां समूहः= सहाय+तल् (ता) = सहयता ।

गजानां समूहः= गज + तल् (ता) = गजता ।

(१५) "अचित्तहस्तिधेनोष्ठक्' इति सूत्रेण अचित्तवाचिभ्यः शब्देभ्यः हस्तिशब्दात्, धेनुशब्दात् च 'तस्य समूहः' इत्यर्थे ठक् प्रत्ययो भवति । अपि च इस्-उस्-उक्-तकारान्ताङ्गा वर्णः यस्यान्ते वर्तते, तादृशात् अङ्गात् परस्य प्रत्ययस्य आदौ विद्यमानस्य ठकारस्य ककारादेशो भवति । यथा-

सक्तूनां समूहः= सक्तु + ठक् (ठ) क = साक्तुकम् ।

हस्तिनां समूहः = हस्ति + ठक् (ठ) क = हास्तिकम् ।

धेनूनां समूहः = धेनु + ठक् (ठ) क = धैनुकम् ।

(१५) 'तदधीते तद्वेद" इति सूत्रेण द्वितीयसमर्थात् 'अधीते वेद' इत्यतयोः अर्थे 'अण्'- प्रत्ययोः भवति । यथा -

व्याकरणम् अधीते वेदो वा = व्याकरण + अण् (अ) = वैयाकरणः ।

(१६) 'क्रमादिभ्यो वुन् इति सूत्रेण 'क्रम' इत्यादिभ्यः शब्देभ्यः 'तदधीते तद्वेद' इत्यस्मिन् अर्थे 'वुन्'- प्रत्ययो भवति । यथा -

क्रममधीते वेद वा = क्रम + वुन् (वु=अक) = क्रमकः ।

पदमधीते वेद वा = पद + वुन् (क=अक) = पदकः ।

शिक्षामधीते वेद वा = शिक्षा + वुन् (वु=अक) = शिक्षकः ।

मीमांसामधीते वेद वा = मीमांसा + वुन् (वु = अक) = मीमांसकः ।

१२.३.४ चातुरार्थिकाः

(१) 'तदस्मिन्नस्तीति देशे तन्नाम्नि' इति प्रथमासमर्थात् 'तत् अस्मिन् देशेऽस्ति' इत्यर्थे देशस्य नाम्नः निर्देशं कर्तुं 'अण्'-प्रत्ययो भवति। यथा -

उदुम्बराः सन्ति अस्मिन् देशे - उदुम्बर+अण्=औदुम्बरः(देशः)।

पालाशाः सन्ति अस्मिन् देशे - पलाशः+अण् (अ) = पालाशः(देशः)।

(२) 'तेन निर्वृत्तम्' इति सूत्रेण तृतीयसमर्थात् 'तेन निर्वृतम्' इत्यर्थे देशस्य निर्देशं कर्तुम्, अण् प्रत्ययो विधीयते। यथा -

कुशाम्बेन निर्वृत्ता नगरी = कुशाम्ब + अण् (अ) = कौशाम्बी।

सहस्रैः निर्वृतं नगरम् = सहस्र + अण् (अ) साहस्रम् (निर्वृतमित्युक्ते निर्मितम् इत्यर्थः)।

ज्ञातव्यम्

अष्टाध्याय्यां तदस्मिन्नस्तीति देशे तत्राग्नि, तेन निवर्तृम्, तस्य निवासः तथा अदुरभवश्च एते चत्वारः अर्थाः 'चतुरर्थाः' नाम्ना ज्ञायन्ते।

(३) 'तस्य निवासः' इति सूत्रेण षष्ठीसमर्थात् 'तस्य निवासः' इत्यस्मिन् अर्थे देशस्य नाम्नः निर्देशं कर्तुम् अण्-प्रत्ययो भवति। यथा-

शिबीनां निवासः (देशः) =शिबि + अण् (अ) = शैबः(देशः)।

उत्सानां निवासः (देशः)= उत्स + अण् (अ) = औत्सः (देशः)।

(४) 'अदुरभवश्च' इति सूत्रेण षष्ठीसमर्थात् 'अस्य निकटः देशः' इत्यर्थे देशस्य नाम्नो निर्देशं कर्तुम् अण्-प्रत्ययो भवति। 'अदूरभव' इत्युक्ते 'निकटेऽस्ति तत्' इति। यथा-

विदिशायाः अदुरभवम् (निकटम्) - विदिशा+अण् (अ) = वैदिशः (नगरम्)।

हिमवतः अदूरभवं नगरम् =हिमवत् + अण् (अ) = हैमवतः(नगरम्)।

(५) 'जनपदे लुप् 'इतिः सूत्रेण जनपदे वाच्ये चातुरार्थिकप्रत्ययस्य लुप् भवति। यथा -

पञ्चालानां जनपदः =पञ्चाल+ अण् = पञ्चालाः।

कुरूणां जनपदः = कुरु + अण् = कुरवः।

वङ्गानां जनपदः = वङ्ग+अण्= वङ्गाः।

कलिङ्गानां जनपदः =कलिङ्ग+अण्=कलिङ्गाः।

(६) 'वरणादिभ्यश्च' सूत्रेण वरणादिभ्यः शब्देभ्यः परस्य चातुरार्थिकप्रत्ययस्य लुप् भवति। यथा-

वरणानाम् अदूरभवं(नगरम्)= वरणा + अण् = वरणाः।

(७) कुमुदनडवेतसेभ्यो ड्मतुप्' इति सूत्रेण 'कुमुद', नड्', 'वेतस' इत्येतेभ्यः शब्देभ्यः चातुरार्थिकः ड्मतुप् प्रत्ययो भवति। ड्मतुप्-प्रत्ययस्य 'मत्' अवशिष्यते। तथा च झयः परस्य अस्य प्रायस्य मकारस्थाने वकारादेशो भवति। यथा -

कुमुदाः सन्ति अस्मिन् देशे = कुमुद + ड्मतुप्= कुमुद्वान् ।

नडाः सन्ति अस्मिन् देशे = नड + ड्मतुप्= नड्वान् ।

(८) 'मादुपधायाश्च गतोर्वोऽयवादिभ्यः' इति सूत्रेण मकारान्ताद् मकारोपधाद् अवर्णान्तात् अवर्णोपधात् चोत्तरस्य मतोर्व इत्ययमादेशो भवति । यथा -

वेतसाः सन्ति अस्मिन् देशे =वेतस् + ड्मतुप् = वेतस्वान् ।

(९) 'नडशादाड्डवलच्' इति सूत्रेण नडशब्दात् शादशब्दात् चातुरार्थिकः ड्वलच् प्रत्ययो भवति । यथा- नडाः सन्ति अस्मिन् देशे = नड + ड्वलच्(वल) = तड्वलः ।

शादाः सन्ति अस्मिन् देशे = शड्+ड्वलच् (वल) = शाड्वलः ।

(१०) 'शिखाया वलच्' इति सूत्रेण शिखाशब्दात् चातुरार्थिकः वलच् प्रत्ययो भवति । यथा-

शिखाः सन्ति अस्मिन् देशे = शिखा वलच् (वल) = शिखावलः ।

१२.३.५ शैषिकाः

(१) 'शेषे' इति सूत्रेण अपत्यार्थप्रकरणादारभ्य चातुरार्थिकप्रकरणं यावद् ये अर्थाः प्रोक्ताः, तद्भिन्नार्थेभ्यः प्रातिपदिकेभ्यः अण् प्रत्ययो भवति । यथा -

चक्षुषा गृह्यते = चक्षुष् + अण् (अ) = चाक्षुषम् (रूपम्) ।

श्रवणेन गृह्यते (शब्दः) = श्रवण+अण् (अ) =श्रावणः (शब्दः) ।

उपनिषद्भिः प्रतिपादितः (पुरुषः) = उपनिषद + अण् = औपनिषेदः (पुरुषः) ।

दृषदि पिष्टाः (सक्तवः) = दृषद् + अण् = दार्षदाः (सक्तवः) ।

चतुर्भिरुह्यं (शकटम्) = चतुर् + अण् = चातुरम् (शकटम्) ।

चतुर्दश्यां दृश्यते (रक्षः) = चतुर्दशी + अण् = चातुर्दशम् (रक्षः) ।

(२) 'राष्ट्रावारपाराद्घखौ' इति सूत्रेण राष्ट्र अवारपार इत्येताभ्यां शब्दाभ्यां क्रमेण घप्रत्ययः खप्रत्ययः च इत्येतौ भवतः । यथा-

राष्ट्रे जातादिः = राष्ट्र + घ(घ-इय्) = राष्ट्रियः ।

अवारपारे जातादिः= अवारपार+ख (ख्- ईन्)= अवारपारीणः ।

(३)' गामाद्यखञौ 'इति सूत्रेण ग्रामशब्दात् शैषिकार्थे 'य', 'खञ्' इत्येतौ प्रत्ययौ भवतः । यथा -

ग्रामे जातो भवो वा= ग्राम +य = ग्राम्यः ।

ग्रामे जातो भवो वा= ग्राम + खञ् (ख- ईन्) = ग्रामीणः ।

(४) 'नद्यादिभ्यो ढक्' इतिः नदीप्रभृतिभ्यः प्रातिपदिकेभ्यः ढक् प्रत्ययो भवति । यथा -

नद्यां जातादि = नदी+ढक्(ढ-एय्) = नादेयम् ।

मह्यं जातादि = मही + ढक्(ढ-एय्) = माहेयम् ।

वाराणस्यां जातादि = वाराणसी + ढक्(ढ्-एय्) = वाराणसेयम् ।

(५) 'दक्षिणापश्चात्पुरस्त्यक्' इति सूत्रेण दक्षिणा पश्चात् पुरस्-इत्येतेभ्यः शैषिकः त्यक्-प्रत्ययो भवति । यथा -

दक्षिणा भवः =दक्षिणा + त्यक् (त्य) = दाक्षिणात्यः ।

पश्चात् भवः = पश्चात् + त्यक् (त्य) = पाश्चात्यः ।

पुरो भवः= पुरः+त्यक् (त्य) = पौरत्स्यः ।

(६) द्युप्रागपागुदक्प्रतीचो यत्' इति सूत्रेण 'दिव्', 'अपाच्', 'उदच्', प्रत्यच्' इत्येतेभ्यः शैषिकः 'यत्'-प्रत्ययो भवति। यथा-

दिवि ज्ञातादि= दिव्+ यत् (य) = दिव्यम् ।

प्राचि जातादि= प्राच्+यत् (य) = प्राच्यम् ।

अपाचि जातादि= अपाच्+यत् (य)= अपाच्यम् ।

उदीचि जातादि= उदीच् + यत् (य)= उदीच्यम् ।

प्रतीचि जातादि= प्रतीच्+ यत् (य) = प्रतीच्यम् ।

(७) 'अव्ययात्त्यप्' इति सुत्रेण अव्ययाद् 'त्यप्' प्रत्ययो भवति । यथा-

अमा (सह) वर्तते= अमा+त्यप् (त्य) = अमात्यः ।

इह वर्तते = इह + त्यप् (त्य)= इहत्यः ।

क्व वर्तते=क्व+त्यप्(त्य)=क्वत्यः ।

ततः वर्तते=ततस्+त्यप्(त्य)=ततस्त्यः ।

तत्र वर्तते=तत्र + त्यप् (त्य) = तत्रत्यः ।

(८) यस्य शब्दस्य प्रथमस्तरः वृद्धिसंज्ञकः (आ, ऐ, ओ) अस्ति, तस्य शब्दस्य 'वृद्धम्' इति संज्ञा भवति । तथा च त्यदादिगणस्य शब्दनां वृद्धसंज्ञा भवति । 'वृद्धाच्छः'' इति सूत्रेण पूर्वोक्तात् वृद्धसंज्ञकप्रातिपदिकात् 'छ' प्रत्ययो भवति। यथा-

शालायां जातादि=शाला+छ (छ् -ईय्) = शालीयः ।

मालायां जातादि= माला+छ(छ्=ईय्)=मालीयः ।

तस्य अयम् =तत्_ + छ (छ्-ईय्) = तदीयः ।

९) गहादिभ्यश्च इति सूत्रेण गहादिगणीयेभ्यः प्रातिपदिकेभ्यः छ्-प्रत्ययो भवति। यथा-

गहे भवः= गह+छ् (ईय्) = गहीयः ।

(१०) 'युष्मदस्मदोरन्तरस्यां खञ् च' इति सूत्रेण युस्मदस्मदोः विकल्पेन शेषिकः 'खञ्'प्रत्ययो भवति । खञि अणि च युष्मदस्मदोर्यथासंख्यं 'युष्माकं''अस्माकं' इत्येतौ अदिशौ भवतः । यथा-

युवयोर्युष्माकं वाऽयम् =युस्मद् + छ = युष्मदीयः ।

अस्माकम् अयम्= अस्मद् + छ= अस्मदीयः ।

(११) एकवचनपरयोः 'युष्मदस्मदोः 'तवक' 'ममक' इत्यतौ आदेशौ भवतः तस्मिन् खञि अणि च परतः । यथा-

तावकीनः, तावकः ।

मामकीनः, मामकः ।

(१३) 'प्रत्ययोत्तरपदयोश्च' इति सूत्रेण प्रत्यये उत्तरपदे च परतः एकवचने वर्तमानयोः युष्मदस्मदोः मपर्यन्तस्य 'त्व' 'म' इत्येतौ भवतः । यथा-

युस्माकम् अयम् - तद् + छ = त्वदीयः ।

अस्माकम् अयम् - मत् छ = मदीयः ।

(तथैव तत्पुपुत्रः, मत्पुत्रः '')

(१४) ' मध्यात्मः इति सूत्रेण मध्यशब्दात् 'म' इति शैषिकप्रत्ययो भवति । यथा-

मध्ये जातः – मध्यम + म = मध्यमः ।

(१५) 'कालाट्ठञ्' इति सूत्रेण कालवाचिप्रातिपदिकात् 'ठन्' इति शैषिकप्रत्ययो भवति । यथा-

काले जातम् - काल ठञ् (ठ-इक) = कालिकम्।

मासे जातम् - मास ठञ् (ठ-इक) = मासिकम्।

तद्वत् 'सांवत्सरिकम् ।

(१६) 'प्रावृष एण्यः' इति सूत्रेण प्रावृष्-शब्दाद् 'एण्य 'इति प्रत्ययो भवति । यथा -

प्रावृषिः भवः = प्रावृष् + एण्यः = प्रावृषेण्यः ।

(१७) 'तत्र जतः' सूत्रेण सप्तमीसमर्थाद् जात इत्यर्थे अणादयो प्रत्ययाः भवन्ति । यथा -

स्रुघ्ने जातः स्रुघ्न + अण् = स्रौघ्नः ।

(१८) 'प्रावृषष्ठप्' इति सूत्रेण प्रावृट्-शब्दात् सप्तमीसमर्थात् जात् इत्येतस्मिन्नर्थे ठप्-प्रत्ययो भवति । यथा-

प्रावृषिः जातः = प्रावृष् + ठप् (ठ = इक) प्रावृषिकः ।

१९) 'तत्र भवः' इति सूत्रेण अणादयः प्रत्ययाः तत्र भवेऽर्थे प्रयुज्यते ।

राष्ट्रे + भवः = राष्ट्र + घ (घ् = इय) = राष्ट्रियः ।

सुघ्ने भवः = सुघ्न + अण् = सौघ्नः ।

(२०) वर्गान्तात् प्रातिपदिकात् 'वर्गन्ताच्च' सूत्रेण 'छ'- प्रत्ययो भवति। यथा -

कवर्गे भवम् कवर्ग = कवर्ग + छ = कवर्गीयम् ।

(२१) 'मयत् च' इति सूत्रेण हेतुभ्यो मनुष्येभ्यश्च मयट्-प्रत्ययो ततः आगतः इत्यस्मिन्नर्थे । यथा -

देवदत्तादागतम् = देवदत्त + मयट् (मय) = देवदत्तमयम् ।

१२.३.६ विकारार्थकाः

(१) 'तस्य विकारः' इति सूत्रेण विकारार्थे अण्-प्रत्ययो भवति। यथा-

अश्मनो विकारः = अश्मन् + अण् = आश्मः।

भस्मनो विकार = भस्मन् + अण् = भास्मनः।

मृत्तिकायाः विकारः = मृत्तिका + अण् = मात्तिकः।

मयूरस्य (अवयवः) विकारः = मयूर अण् = मयूरः।

(२)'गोश्च पुरीषे' इति सूत्रेण गोशब्दात् पुरीषेऽभिधेये मयट्- प्रत्ययो भवति। यथा -

गोः विकारः = गो + मयट् = गोमयम्।

१२.३.७ ठगधिकारः

(१) 'तेन दीव्यति खनति जयति जितम्' इति सूत्रेण तृतीयसमर्थात् दीव्यति, खनति, जयति, तथा जितम् एतेषु अर्थेषु ठक्-प्रत्ययो भवति। यथा -

अक्षैः दीव्यति सः = अक्ष + ठक् (ठ-क) = आक्षिकः।

अंभ्रया खनति सः = अभ्रि + ठक् = आभ्रिकः।

तथैव जयति तथा जितम् इत्यर्थे आक्षिकः, आक्षिकम्, इत्यादीनि।

(२) 'संस्कृतम्' इति सूत्रेण तृतीयासमर्थात् 'संस्कृतम्' अस्मिन् अर्थे ठक्-प्रत्ययो भवति। यथा-

दध्ना संस्कृतम् = दधि + ठक् = दधिकम्।

मरीचेन संस्कृतम् = मरीच + ठक् = मारीचिकम्।

(३) 'तरति' इति सूत्रेण 'तरति' इत्यर्थे तृतीयासमर्थात् ठक्-प्रत्ययो भवति। यथा -

उडुपेन तरति = उडुप + ठक् = औडुपिकः।

(४) 'चरति' इत्यर्थे तृतीयसमर्थात् औत्सर्गिकरूपेण ठक्-प्रत्ययो भवति। यथा -

हस्तिना चरति = हस्ति + ठक् = हास्तिकः।

(५) 'संसृष्टम्' इत्यर्थे ठक् प्रत्ययो भवति। यथा -

दध्ना संसृष्टम् = दधि + ठक् = दाधिकम्।

(६) 'उञ्छति' (चयनम्। स्वीकरणम्) इति अर्थे द्वितीयासमर्थात् ठक् प्रत्ययो भवति। यथा -

बदराणि उञ्छति = बदर + ठक् = बादरिकः।

(७) 'रक्षति' इत्यर्थे द्वितीयसमर्थात् ठक् प्रत्ययो भवति। यथा -

समाजं रक्षति = समाज + ठक् = सामाजिकः।

(८) 'शब्ददर्दूरं करोति' इति सूत्रेण 'करोति' इत्यर्थे 'शब्द' "दर्दुर" इत्येताभ्यां शब्दाभ्यां द्वितीयसमर्था ठक्- प्रत्ययो भवति। यथा -

शब्दं करोति = शब्द + ठक् = शाब्दिकः।

ददुरं करोति = दर्दुर + ठक् = दार्दुरिकः ।

(९) 'चरति' इति अस्मिन् अर्थे द्वितीयासमर्थात् 'धर्म'शब्दात् ठक्-प्रत्ययो भवति। यथा -

धर्मं चरति = धर्म + ठक् = धार्मिकः ।

(१०) 'अस्य शिल्पम्' इत्यस्मिन् अर्थे प्रथमासमर्थात् ठक्-प्रत्ययो भवति । यथा -

मृदङ्गवादनं शिल्पमस्य = मृदङ्ग + ठक् = मार्दङ्गिकः ।

(११) 'अस्य प्रहरणम्' अस्मिन् अर्थे प्रथमासमर्थात् ठक्- प्रत्ययो भवति । प्रहरणमर्थात् शस्त्रम् । यथा -

असिः प्रहरणम् अस्य = असि + ठक् = आसिकः ।

(१२) 'अस्य शीलम्' इत्यर्थे प्रथमसमर्थात् ठक्-प्रत्ययो भवति । शीलमर्थात् प्रभावः। यथा -

अपूपभक्षणं शीलमस्य = अपूप + ठक् = आपूपिकः ।

(१३) 'निकटे वसति' इत्यर्थे सप्तमीसमर्थात् 'निकट'-शब्दात् 'वसति' इत्यर्थे ठक्-प्रत्ययो भवति । यथा –

निकटे वसति = निकट + ठक् = नैकटिकः (भिक्षुकः) ।

१२.३.८ यदधिकारः

(१) 'वहति' इति अस्मिन् अर्थे द्वितीयासमर्थात् रथशब्दात्, युगशब्दात्, प्रासङ्गशब्दात् च यत्-प्रत्ययो भवति 'तद्वहति रथयुगप्रासङ्गम्' इति सूत्रेण । यथा -

रथं वहति = रथ + यत् (य) = रथ्यः (अश्वः)

युगं वहति = युग + यत् = युग्यः ।

प्रासङ्गं वहति = प्रासङ्ग + यत् प्रासङ्गयः ।

(२) 'धुरों यड्ठकौ' इति सूत्रेण 'वहति' इत्यर्थे द्वितीयसमर्थात् धुर्-शब्दात् यत् तथा ठक् प्रत्ययौ भवतः । यथा -

धुरं वहति = धुर् + यत् (य) = धुर्यः ।

धुरं वहति = धुर् + ढक् (ढ - एय्) = धौरेयः ।

(३) तृतीयसमर्थेभ्यः नौ वयस्, धर्म, विष, मूल, मूल, सीता, तला-एतेभ्यः, शब्देभ्यः क्रमेण तार्य, तुल्य, प्राप्य, वध्य, आनाम्य, सम, अमित, समित, सम्मित- एतेषु अर्थेषु संज्ञायाः विषये यत्-प्रत्ययो भवति । यथा -

नावा तार्यं = नौ + यत् (य) = नाव्यम् (जलम्) ।

वयसा तुल्यम् = वयस् + यत् = वयस्यः ।

धर्मेण प्राप्यम् = धर्म + यत् = धर्म्यम्।

विषेण वध्यः = विष + यत् = विष्यः।

मूलेन आनाम्यम् = मूल + यत् = मूल्यम् ।

मूलेन समः = मूल + यत् = मूल्यः ।

सीतया समितम् = सीता + यत् = सीत्यम् ।

तुलया सम्मितम् = तुला + यत् = तुल्यम् ।

(४) सप्तमीसमर्थात् साधुः (कुशलः / प्रवीणः / योग्यः) इत्यर्थे संज्ञायाः विषये यत्-प्रत्ययो भवति 'तत्र साधुः' इति सूत्रेण। यथा -

अग्रे साधुः = अग्र + यत् = अग्र्यः।

सामसु साधु = सामन् + यत् = सामान्यः।

(५) 'सभायाः यः' इति सूत्रेण सप्तमीसमर्थात् 'सभा'शब्दात् संज्ञायाः विषये 'य'-प्रत्ययो भवति। यथा -

सभायां साधुः = सभा + य = सभ्यः।

१२.३.९ छयतोरधिकारः -

(१) 'उगवादिभ्यो यत्' इति सूत्रेण प्राक्-क्रीतीयार्थेषु उवर्णान्तप्रातिपदिकेभ्यः तथा गवादिगणस्य शब्देभ्यः यत्-प्रत्ययो भवति। यथा -

शङ्कवे हितम् = शङ्कु + य = शङ्कव्यम् (दारु)।

गोभ्यो हितम् = गो + यत् = गव्यम्।

(२)'तस्मै हितम्' इति सूत्रेण चतुर्थीसमर्थात् 'हितम्' इत्यर्थे छ-प्रत्ययो भवति। यथा -

वत्सेभ्यो हितम् = वत्स + छ (ईय) = वत्सीयः (गोधुक्)।

(३) 'शरीरवयवाद्यत्' इति सूत्रेण 'हितम्' इत्यर्थे चतुर्थसमर्थात् शरीरस्य अवयववाचिप्रातिपदिकात् यत्-प्रत्ययो भवति। यथा -

दन्तेभ्यो दितम् = दन्त + यत् = दन्त्यम्।

कण्ठाय हितम् = कण्ठ + यत् = कण्ठ्यम्।

नासिकायै हितम् = नासिका (नस्) + यत् = नस्यम्।

(४)'आत्मन्विश्वजनभोगोत्तरपदात् खः' इति सूत्रेण 'हितम्' इत्यस्मिन् अर्थे चतुर्थीसमर्थात् आत्मन्-शब्दात्, विश्वजन-शब्दात् तथा यस्य उत्तरपदं 'भोग' इति अस्ति, तस्मात् शब्दात् ख-प्रत्ययः भवति। खप्रत्यये परे आत्मन्-अध्वन् इति शब्दयोः प्रकृतिभावो भवति। यथा -

आत्मने हितम् = आत्मन् + ख (ईन्) = आत्मनीनम्। विश्वजनेभ्यो हितम् = विश्वजन + ख (ईन्) = विश्वजनीनम्। मातृभोगाय हितम् = मातृभोग + ख (ईन्) = मातृभोगीणम्।

१२.३.१० ठञधिकारः

(१) 'तेन क्रीतम्' इति सूत्रेण 'क्रीतम्' इत्यस्मिन् अर्थे तृतीयासमर्थप्रातिपदिकेभ्यः ठञ्-प्रत्ययो भवति। यथा -

सप्तत्या क्रीतम् = साप्तति + ठञ् (इक) = साप्ततिकम्। प्रस्थेन क्रीतम् = प्रस्थ + ठञ् (इक) = प्रास्थिकम्।

(२) 'सर्वभूमिपृथिवीभ्यामणञौ' इति सूत्रेण 'निमित्तम्' अस्मिन् अर्थे संयोगमुत्पातं वा दर्शयितुं षष्ठीसमर्थात् 'सर्वभूमि'-शब्दात् अण-प्रत्ययः तथा पृथिवीशब्दात् 'अञ्' प्रत्ययः भवति। तथा च 'तस्येश्वरः' इति सूत्रेण 'ईश्वरः' इत्यर्थे षष्ठीसमर्थात् सर्वभूमिशब्दात् पृथिवीशब्दात् च क्रमेण अण् तथा अञ् इति प्रत्ययौ भवतः। यथा-

सर्वभूमेरिश्वरः = सर्वभूमि + अण् = सार्वभौमः।

पृथिव्याः ईश्वरः = पृथिवी + अण् = पार्थिवः ।

(३) 'तद् अर्हति' इति सूत्रेण 'लब्धुं योग्यः' इत्यर्थे द्वितीयसमर्थात् ठञादयः प्रत्ययाः भवन्ति । यथा -

श्वेतच्छत्रमर्हति = श्वेतच्छत्र + ठञ् (इक) = श्वेतच्छत्रिकः ।

(४) 'दण्डादिभ्यो यत्' सूत्रेण दण्डादिगणस्य द्वितीयासमर्थेभ्यः शब्देभ्यः 'अर्हति' इत्यर्थे यत्- प्रत्ययो भवति । यथा -

दण्डम् अर्हति = दण्ड + यत् = दण्ड्यः ।

अर्धम् अर्हति = अर्घ + यत् = अर्घ्यः ।

वधम् अर्हति = वध + यत् = वध्यः ।

(५) 'तेन निवृतम्' इति सूत्रेण 'निवृत्तम्' इत्यर्थे तृतीयासमर्थात् कालवाचिप्रातिपदिकात् ठञ्-प्रत्ययो भवति । 'निवृतम्' अर्थात् कृतं निष्पादितं वा । यथा -

'अह्ना निवृत्तम् = अह्न + ठञ् (इक) = आह्निकम् ।

१२.३.११ त्वतलोरधिकारः

(१) तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण 'तुल्यं क्रियां करोति' इत्यर्थे तृतीयसमर्थात् वति-प्रत्ययो भवति ।'वति' इति प्रत्ययस्य (वत्) अवशिष्यति । तथा च वतिप्रत्ययान्तशब्दाः अव्ययत्वेन प्रयुज्यते ।

यथा-

ब्राहमणेन तुल्यम् =ब्राह्मण + वति (वत्)= ब्राह्मणवत्।

(२) 'तत्र तस्यैव' इति सूत्रेण 'इव 'इत्यस्मिन्नर्थे षष्ठीसमर्थात् तथा सप्तमीसमर्थात् 'वति' – प्रत्ययो भवति । यथा-

मथुरायामिव= मथुरा+वति (वत्) = मथुरावत् ।

चैत्रस्येव= चैत्र + इव = चैत्रवत् (मैत्रस्य गावः)।

(३) तस्य भावस्त्वलौ' इति सूत्रेण 'भावः' इत्यस्मिन् अर्थे षष्ठीसमर्थात् 'त्व' तथा 'तल् प्रत्ययौ भवतः । यथा-

गोर्भावो = गो+त्व=गोत्वम्।

गोर्भावो= गो+तल् (ता) = गोता।

तद्वत् घटत्वं/घटता, स्त्रीत्वम् / स्त्रीता।

(४) 'पृथ्वादिभ्यः इमनिज्वा' इति सूत्रेण 'भाव' इत्यर्थे पृथ्वादिगणस्य शब्देभ्यः,' षष्ठीसमर्थेभ्यो विकल्पेन इमनिच् प्रत्ययो विधीयते । यथा-

पृथोः भावः= पृथु + इमनिच् (इमन्) = प्रथिमन्।

(५) 'इगन्ताच्च लघुपूर्वात्' इति सूत्रेण षष्ठीसमर्थात् इगन्त-लघुपूर्वशब्दात् भावः तथा 'कर्म' एतयोः अर्थयोः अण् प्रत्ययो भवति। यथा-

मृदोर्भावः - मृदु + अण् (अ)= मार्दवम् ।

अणोर्भावः - अणु + अण् = आणवम्।

(६) 'वर्णदृढादिभ्यः ष्यञ्च' इति सूत्रेण 'भावः' इत्यस्मिन् अर्थे षष्ठसमर्थेभ्यः वर्णवाचिशब्देभ्यः दृढादिगणस्य च शब्देभ्यः इमनिच् तथा ष्यञ् प्रत्ययौ भवतः । यथा-

शुक्लस्य भावः = शुक्ल+ष्यञ् (य) = शौक्ल्यम्।

शुक्ल + इमनिच् (इमन्) =शुक्लिमा।

७) 'गुणवचनब्राह्मणादिभ्यः' कर्मणि च' इति सूत्रेण षष्ठीसमर्थेभ्यः गुणवाचिभ्यः शब्देभ्यः ब्राह्मणादिगणस्य च शब्देभ्यः 'भावः' तथा 'क्रिया' इत्यस्मिन् अर्थे ष्यञ्-प्रत्ययो भवति । यथा-

जडस्य भावः = जड + ष्यञ् (य) = जाड्यम्।

मूढस्य भावः = मूढ् + ष्य =मौढ्यम् ।

(८) 'सख्युर्यः' इति सूत्रेण भावः तथा कर्म इत्येतयोः अर्थयोः षष्ठीसमर्थात् सखिशब्दात् य-प्रत्ययो भवति । यथा-

सख्युर्भावः= सखि +य= सख्यम्।

(९) 'कपिज्ञात्योर्ढक' इति सूत्रेण पूर्वक्तयोरर्थयोः षष्ठीसमर्थात् कपिशब्दात् ज्ञातिशब्दात् च ढक्-प्रत्ययो भवति। यथा-

कपेर्भावः - कपि + ढक् (एय) = कापेयम्।

ज्ञातेर्भावः = ज्ञाति +ढक् (एय)= ज्ञातेयम्।

(१०)'पत्यन्तपुरोहितादिभ्यो यक्' इति सूत्रेण 'पति' यस्य अन्ते अस्ति तादृशेभ्यः शब्देभ्यः तथा पुरोहितादिगणस्य शब्देभ्यः षष्ठीसमर्थेभ्यः भावस्तथा कर्म इत्यनयोरर्थयोः यक् प्रत्ययो भवति । यथा-

पुरोहित्यस्य भावः= पुरोहित+यक् (य) = पौरोहित्यम्।

सेतापतेर्भावः= सेनापति +यक् = यक् = सैनापत्यम्।

१२.३. १२ भवनाद्यर्थकाः

(१) 'धान्यानां भवने क्षेत्रे खञ्' इति सूत्रेण धान्यविशेषवाचिभ्यः षष्ठीसमर्थेभ्यः शब्देभ्यः तेषामुत्पतेः क्षेत्रस्य निर्देशार्थं खञ्-प्रत्ययो भवति । यथा-

मुद्गानां भवनं क्षेत्रम् =मुद्ग+ खञ्(ईन्) = मौद्गीनम्।

(२) 'व्रीहिशाल्योर्ढक्' इति सूत्रेण षष्ठीसमर्थात् "व्रीहि तथा शालि' शब्दात् उत्पत्तेः क्षेत्रस्य निर्देशार्थं ढक् प्रत्ययो भवति । यथा-

व्रीहीणां भवनं क्षेत्रम्= व्रीहि +ढक् (एय्) = व्रैहेयम्।

(३)'तदस्य संजातं तारकादिभ्य इतच्' इति सूत्रेण तारकादिगणस्य शब्देभ्यः प्रथमासमर्थेभ्यः 'अस्य अस्मिन्' अर्थे सञ्जात इति सन्दर्भे इतच्-प्रत्ययो भवति। यथा-

तारकाः सञ्जाता अस्य= तारक + इतच् (इत) = तारकिटः(नभः)।

४)प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति सूत्रेण प्रमाणम् इत्यस्मिन् अर्थे प्रयुज्यमानात् प्रथमसमर्थात् अस्य इत्यस्मिन् अर्थे 'द्वयसच्' 'दघ्नच्' तथा 'मात्रच्' प्रत्ययाः भवन्ति। यथा-

उरुः + प्रमाणमस्य= ऊरु +द्वयसच् (द्वयस्) = ऊरुद्वयम्।

ऊरु + दघ्नच् (दघ्न)= ऊरुदघ्नम्।

ऊरु + मात्रच् (मात्र) = ऊरुमात्रम्।

(५) "यदतदेतेभ्यः, परिमाणे वतुप्' इति सूत्रेण 'परिमाण' इत्यस्य विशेषणरूपेण प्रयुक्ताः ये 'यत्' 'तत्', 'एतद्' शब्दाः तेभ्यः प्रथमासमर्थेभ्यः 'अस्य' इत्यस्मिन् अर्थे वतुप्-प्रत्ययो भवति। यथा-

यत् परिमाणमस्य= यत्+ वतुप् (वत्) = यावत्।

तत् परिमाणमस्य= तत् + वतुप् (वत्) = तावत्।

एतद् परिमाणमस्य= एतद् +वतुप् = एतावत्।

६) 'इदङ्किमोरीश्की' इति सूत्रेण इदम् किम् चेत्येताभ्यां प्रातिपदिकाभ्यां तत्परिमाणमस्य इत्यर्थे वतुप् प्रत्ययो भवति। यथा-

किं परिमाणमस्य = किम् + मतुप्(वत्) = कियत्।

७) 'संख्याया अवयवे तयप्' इति सूत्रेण प्रथमसमर्थात् संख्यावाचिशब्दात् 'अवयवाः अस्य' इत्यस्मिन् अर्थे तयप् प्रत्ययो भवति। यथा-

पञ्च अवयवाः यस्य = पञ्च+तयप् (तय) = पञ्चतयम्।

८)द्वित्रिभ्यां तयस्यायज्वा इति सूत्रेण द्वि तथा त्रि एताभ्यां शब्दाभ्यां विहितस्य तयप् प्रत्ययस्य विकल्पेन 'अयच्' इति आदेशो भवति। यथा-

द्वौ अवयवौ यस्य = द्वि + अयच्(अय) = द्वयम्।

त्रयोऽवयवाः यस्य = त्रि + अयच् (अय)= त्रयः।

१२.३. १३ मत्वर्थीयाः

१.'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रेण 'अस्य' तथा 'अस्मिन्' इत्येतयोः अर्थयोः 'अस्ति' इत्यनेन निर्दिश्यमानात् प्रथमासामर्थात् मतुप् प्रत्ययो विधीयते। यथा –

गावः अस्य/अस्मिन् सन्ति – गो+मतुप् (मत्) = गोमान्।

२. 'तसौ मत्वर्थे' इति सूत्रेण तकारान्तं सकारान्तं च शब्दस्वरूपं मत्वर्थे परे भसंज्ञकं भवति। यथा - गरुतौ अस्य स्तः – गरुत् + मतुप् = गरुत्मान्।

३) 'प्राणिस्थादातो लजन्यतरस्याम्' इति सुत्रेण पूर्वोक्तयोः अर्थयोः प्राणिनामसमर्थेभ्यः आकारान्तशब्देभ्यः प्रथमासमर्थ्येभ्यः विकल्पेन लच्-प्रत्ययो भवति, पक्षे मनुप्-प्रत्ययो भवति। यथा –

चुडाऽस्यास्ति = चूड + लच् (ल) = चूडालः।

पक्षे तु चुडावान्।

४) 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' इति सूत्रेण उक्तयोरर्थयोः लोमादिगणस्य प्रथमासमर्थेभ्यः श-प्रत्ययः, पामादिगणस्य, शब्देभ्यः न-प्रत्ययः, तथा पिच्छादिगणस्य शब्देभ्यः इलच्-प्रत्ययो भवति। पक्षे तु मतुप्। यथा –

लोमानि अस्य सन्ति = लोम + श = लोमशः।

रोमाणि अस्य सन्ति = रोम + श = रोमशः।

पक्षे मतुपि लोमवान् रोमवान् इति।

(५) 'दन्त उन्नत उरच्' इति सूत्रेण पूर्वक्तयोरर्थयोः 'उन्नत' इत्यनेन विशिष्टात् प्रथमसमर्थात् 'दन्त'-शब्दात् उरच्-प्रत्ययो भवति। यथा –

उन्नता दन्ता सन्त्यस्य = दन्त + उरच् (उर) = दन्तुर:।

(६) 'कोशाद्बोऽन्यतरस्याम्' इति सूत्रेण पूर्वोक्तयोरर्थयोः प्रथमासमर्थात् 'केश'शब्दात् 'व' तथा 'मतुप्' इत्येतौ प्रत्ययौ भवतः। पक्षे 'इनि' तथा 'ठन्' इत्येतौ भवतः। यथा –

केशाः सन्त्यस्य = केश + व = केशव।

केश + मतुप् (वत्) = केशवान्।

पक्षे तु केशिकः, केशवान् इति भवति।

(७) 'अत इनिठन' इति सूत्रेण पूर्वक्तयोरर्थयोः प्रथमासमर्थेभ्यः अदन्तशब्देभ्यः विकल्पेन 'इनि' तथा 'ठन्'-प्रत्ययौ भवतः। पक्षे मतुप्-प्रत्ययो विधीयते। यथा –

दण्डोऽस्य अस्ति = दण्ड + इनि (इन्) = दण्डिन्।

दण्ड + ठन् (इक) = दण्डिकः।

(८) 'व्रीह्यादिभ्यश्च' इति सूत्रेण 'अस्य अस्ति' तथा 'तस्मिन् अस्ति' इत्येतयोः पूर्वोक्तार्थयोः व्रीह्यादिगणस्य शब्देभ्यः प्रथमासमर्थेभ्यः विकल्पेन 'इनि' तथा 'ठन्' प्रत्ययौ भवतः। यथा –

व्रीहयोऽस्य सन्ति = व्रीहि + इनि (इन्) = व्रीहिन्।

व्रीहि + ठन् (इक्) = व्रीहिकः।

(९) 'अस्मायामेधास्रजो विनिः' इति सूत्रेण असन्द-माया-मेधा-स्रजशब्देभ्यः मत्वर्थे 'विनि' प्रत्ययो भवति।। पक्षे तु मतुप् भवति। यथा –

यशोऽस्य अस्ति = यशस्+ विनि (विन्) = यशस्विन (यशसी)।

मायाऽस्य अस्ति = माया + विनि = मायास्विन् (मायावी)।

मेधाऽस्य अस्ति = मेधा + विनि = मेधाविन् (मेधावी)।

स्रक् अस्य अस्ति = स्रक् + विनि = स्रग्विन् (स्रग्वी)।

पक्षे तु यशस्वान् इत्यादयो भवन्ति।

(१०) 'वाचो ग्मिनिः' इति सूत्रेण मत्वर्थे वाच्-शब्दात् प्रथमासमर्थात् 'ग्मिनि'-प्रत्ययो भवति। यथा -

वाचोऽस्य अस्ति = वाच्+ग्मिनि (ग्मिन्) = वाग्मी।

(११) 'अंहशुभमोर्युस्' इति सूत्रेण मत्वर्थे 'अहम्' तथा 'शुभम्' इत्येताभ्यां शब्दाभ्यां युस् -प्रत्ययो भवति। यथा-

अहम् अस्यास्ति =अहम्+ यु= अहंयुः।

शुभम् अस्यास्ति= शुभम् + यु = शुभंयुः।

१२.३. १४ प्राग्दिशीयाः

(१) 'पञ्चम्यास्तसिल्' इति सूत्रेण द्वि-इत्यादिभ्यः शब्देभ्यः भिन्नेभ्यः पञ्चम्यत्तेथ्यः 'किम्' 'बहु' इत्यादिभ्यः शब्देभ्यः तसिल्-प्रत्ययो भवति। तकारादि-हकारदिप्रत्यये परे किम् – शब्दस्य कु-आदिशो भवति। यथा-

कस्मात् =किम्+तसिल्(तस्)=कुतः।

अस्मात्=इदम्+ तसिल् = इतः।

एतस्मात्=एतत् + तसिल्= अतः।

यस्मात्=यत्+तसिल्=यतः।

बहुस्मात्=बहु + तसिल् = बहुतः।

(२) 'पर्यथिभ्यां च' इति सूत्रेण 'परि''अथि' इत्येताभ्यां तसिल्- प्रत्ययो भवति। यथा -

परि + तसिल्= परितः।

अभि+ तसिल् = अभितः।

(३) 'सप्तम्यास्त्रल्' इति सूत्रेण सर्वादिगणे विद्यमानेभ्यः किम्, बहु इत्यादि सप्तम्यन्तप्रातिपदिकात्। त्रल् प्रत्ययो भवति। यथा-

कस्मिन्= किम्+त्रल् (त्र)= कुत्र।

यस्मिन्=यत् + त्रल्=यत्र।

तस्मिन् =तत्+त्रल्=तत्र।

बहुत्र=बहु + त्रल् = बहुत्र।

(४)'इदमो हः' इति सूत्रेण 'इदम्'– शब्दस्य सप्तमीविभक्त्यन्तात् स्वार्थे ह-प्रत्ययो भवति। यथा-

अस्मिन् =इदम् + ह =इह।

(५) 'सर्वैकात्यकिंयत्तदः काले दा' इति सूत्रेण सप्तम्यन्तेभ्यः कालार्थेभ्यः शब्देभ्यः स्वार्थे दा स्यात्। यथा-

सर्वस्मिन् काले =सर्व+ दा = सर्वदा।

कस्मिन् काले= किम् + दा =कदा।

तद्वत् यदा, तदा, इत्यादयः।

१२.३.१५ प्रागिवीयाः

१)'अतिशायने तमविष्ठनौ' इति सूत्रेण अतिशयविशिष्टार्थवृत्तेः स्वार्थे तमप् तथा इष्ठन् इत्येतौ प्रत्ययौ भवतः। यथा -

लघु + तमप् (तम) = लघुतमः।

लघु + इष्ठन् (इष्ठ)= लघिष्ठः।

२) 'वा बहूनां जातिपरिप्रश्ने डतमच्' इति सूत्रेण बहुषु एकस्य निर्धारणं कर्तव्यमस्ति चेत् 'किम्' 'यत्' तद्, एतेभ्यः शब्देभ्यः स्वार्थे विकल्पेन 'डतमच्' प्रत्ययो भवति। यथा-

किम् + डतमच्(अतम्)=कतमः।

(एषु कतमः पटुः)।

१२.३.१६ स्वार्थिकाः

१) 'इवे प्रतिकृतौ' इति सूत्रेण इव इत्यस्य प्रयोगेण यदा प्रतिकृतिः निर्दिश्यते, तदा स्वार्थे कन् प्रत्ययो भवति।यथा-

अश्व इव प्रतिकृतिः=अश्व+कन्(क)=अश्वकः।

२) 'प्रज्ञादिभ्यश्च' इति सूत्रेण प्रज्ञादिगणस्य शब्देभ्यः स्वार्थे अण्'-प्रत्ययो भवति। यथा-

प्रज्ञ + अण् (अ)= प्राज्ञः,

देवता + अण् = दैवतः,

बन्धुः + अण्= बान्धवः।

(३) 'बह्वल्पार्थाच्छस कारकादन्यतरस्याम्' इति सूत्रेण 'बहु' तथा 'अल्प' एतयोः अर्थयोः प्रयुक्तात् शब्दात् कारकस्य विषये विकल्पेन शस्-प्रत्ययो भवति। यथा -

बहूनि ददाति= बहु+ शस् =बहुशः (ददाति)।

अल्पं ददाति =अल्प + शस्= अल्पशः (ददाति)।

१२.४ अध्यायात् किमवगतम्

अध्यायेस्मिनं अधौ उल्लिखितानि विषयानि आलोचितानि भवन्ति-

- तद्धितप्रत्ययस्य विषये ज्ञातवन्तः।
- लघुसिद्धान्तकौमुदीव्याकरणे उल्लिखितानि तद्धितदप्रत्ययस्य सूत्राणि सोदाहरणपूर्वकं ज्ञातवन्तः।
- तद्धितप्रत्ययस्य भेदान् उदाहरणपूर्वकं ज्ञातवन्तः।
- तद्धितप्रत्ययस्य प्रयोगदारा शब्दानाम् आकृतिमूलकं परिवर्तनं ज्ञातवन्तः।

१२.५ ज्ञानाधिक्यम्

१. लघुसिद्धान्तकौमुदी, गौबिन्द प्रसाद शर्मा (व्याख्या) चौखम्बा सुरभारती प्रकारान, वारणसी, 2021
२. लघुसिद्धान्तकौमुदी, हरेकान्तमिश्र (टीका) भारतीयविद्याप्रकाशन, वाराणसी, 2017
३. अष्टाध्यायी ,नरेश झा (व्याख्या), चौखम्बा सुरभारती प्रकाशन, वाराणसी ,2021

१२.६ अग्रगत्ताः निरूपणम्

उत्तरम् १ - फक्।

उत्तरम् २ - अण्।

उत्तरम् ३ - यत्।

उत्तरम् ४ - ड्यण्।

१२.७ अभ्यासप्रश्नाः

(क) **वस्तुधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

(१) अधःस्थानां शब्दानां प्रत्ययो निरुप्यत

पार्थः, सौम्यम्, राष्ट्रियः, शाब्दिकः, मथुरावत्।

(ख) **संक्षेपप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

टिप्पणी प्रदेया

(१) अपत्यार्थकः अण्-प्रत्ययः

(ग) **रचनाधर्मीप्रश्नाः** (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

(१) अपत्यार्थकतद्धितप्रत्ययात् अधिकृत्य एको लेखः प्रस्तूयताम्।

(२) रक्ताद्यर्थकप्रत्ययानां विषये प्रबन्धः प्रस्तूयताम्।

*****

अध्यायः १३ : स्त्रीप्रत्ययप्रकरणम् (लघुसिद्धान्तकौमुद्यनुसारम्)

अध्यायस्य संरचना

१३.१ उद्देश्यम्

१३.२ परिचयः

१३.३ प्रत्ययभेदाः

१३.४ स्त्रीप्रत्ययाः

टाप्

ङीप्

ङीष्

ऊङ्

ङीन्

तिः

चाप्

१३.५ अध्यायात् किमवगतम्

१३.६ ज्ञानाधिक्यम्

१३.७ अग्रगत्याः निरूपणम्

१३.८ अभ्यासप्रश्नाः

१३.१ उद्देश्यम्

अस्य अध्यायस्य अध्यायनादनन्तरं भवन्तः

- स्त्रीप्रत्ययविषये सामान्यावधारणां प्राप्स्यन्ति ।
- संस्कृते प्रयुक्तानां स्त्रीप्रत्ययानां ज्ञानं प्राप्स्यन्ति ।
- स्त्रीप्रत्ययान्तशब्दानाम् आकृतिगत-परिवर्तनविषये ज्ञातुं समर्थाः भविष्यन्ति।
- लघुसिद्धान्तकौमुदीनिर्दिष्टानां स्त्रीप्रत्ययसूत्राणाम् प्रयोगं ज्ञातुं प्रभविष्यन्ति।
- स्त्रीप्रत्ययान्तशब्दानां वैकल्पिक-रूपाणि ज्ञास्यन्ति।

१३.२ परिचयः

पाणिनीयव्याकरणपरम्परायाः प्रसिद्धेषु वैयाकरणेषु आचार्यो वरदराजोऽन्यतमः । स हि पाणिन्यष्टाध्यायीमाश्रृत्य लघुसिद्धान्त-कौमुदीनामकं प्रक्रियाग्रन्थं निर्मितवान् । ग्रन्थेऽस्मिन् १२७५ सूत्राणि वर्तन्ते । लघुसिद्धान्तकौमुदी सुकुमारमतीनां अल्पग्राहिबुद्धिवतां छात्राणां कृतेऽत्युपकारिणी एवञ्च इयं व्याकरणपिपठिषूणां छात्राणां कृते लघुप्रवेशिका वर्तते । अस्य व्याकरणस्य अन्तिमप्रकरणे स्त्रीप्रत्यया: विवेचिताः सन्ति ।

१३.३ प्रत्ययभेदाः

पाणिन्यष्टाध्यायीसूत्रपाठे 'प्रत्ययः इति (३.१.१) सूत्रं वर्तते । इदं हि सूत्रम् अधिकारसूत्रम् पाणिन्यष्टाध्याय्या: तृतीयाध्यायाद् आरभ्य पञ्चमाध्यायपर्यन्तं प्रत्ययसूत्रस्य अधिकारो वर्तते । अर्थात् एतेषु तृतीय-चतुर्थ-पञ्चम-अध्यायेषु सूत्रप्रोक्ताः नूतनाः शब्दाः प्रत्ययसंज्ञकाः भवन्ति ।

प्रतीयते विधीयते इति प्रत्ययः स च प्रत्ययः पञ्चविधः । यथोक्तं शब्दशक्तिप्रकाशिकायाम्- विभक्तिश्चैव धात्त्वंशस्तद्धितः कृदितिक्तमात् । चतुर्धा प्रत्ययः प्रोक्तः टाबादिभिः पञ्चधा। यथा-

(क) विभक्तिप्रत्ययः,

(ख) धात्त्वंशप्रत्ययः,

(ग) कृत्प्रत्ययः,

(घ) तद्धितप्रत्ययः,

(ङ) स्त्रीप्रत्ययः।

विभक्तिप्रत्ययः- विभक्तिप्रत्ययः द्विविधः सुप्-प्रत्ययः तिङ-प्रत्ययश्च । सुप-प्रत्ययः प्रातिपदिकादनन्तरं विधीयते। स च सुप-प्रत्ययः सु-औ-जसादिः एकविंशतिप्रकारकः । तिङ्-प्रत्ययश्च धातोरनन्तरं विधीयते । स च तिङ्प्रत्ययः तिप्-तस्-झि इत्यादिः अष्टाविंशतिप्रकारकः ।

धात्त्वंशप्रत्ययः- धातोः प्रातिपदिकाद् वाऽनन्तरं विभक्तिप्रत्ययाद् पूर्वं च यः प्रत्ययः विधीयते सः धात्वंशप्रत्ययः । अर्थात् धातोः 'विभक्तिप्रत्ययस्य मध्ये अथवा प्रातिपदिकविभक्तिप्रत्ययोः मध्ये यः प्रत्ययः विधीयते सः धात्वंशप्रत्यय इति । यथा-

पठ् + णिच् + तिप् = पाठयति।

कृत्प्रत्ययः- धातोरनन्तरं तव्य-क्त्वाच्-ल्युट-प्रभृतिः प्रत्ययः विधीयते, सः कृत्प्रत्ययः । यथा-

√गम्+ तव्य = गन्तव्यम्।

तद्धितप्रत्ययः- प्रातिपदिकादनन्तरं यः प्रत्ययो विधीयते, सः तद्धितप्रत्ययः। यथा- शिव + अण् = शैवः।

स्त्रीप्रत्ययः- स्त्रीत्वबोधनाय पुंलिङ्गादिशब्दैः साकं यः प्रत्ययो विधीयते सः स्त्रीप्रत्ययः । यथा- अज+ टाप् = अजा।

१३.४ स्त्रीप्रत्ययाः

सामान्यरूपेण येन प्रत्ययेन पुलिङ्गः शब्दः स्त्रीलिङ्गे परिणमति स प्रत्ययः स्त्रीप्रत्यय उच्यते। 'स्त्रियाम्' इत्यधिकारे अष्टाध्याय्यां प्रातिपदिकेभ्यः स्त्रीत्वं द्योतयितुम् अष्टौ प्रत्ययाः निर्दिष्टाः सन्ति । ते यथा- टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, तिः च । परन्तु लघुसिद्धान्तकौमुदीकारेण वरदराजाचार्येण तदीये लघुसिद्धान्तकोमुद्यां सप्तविधाः स्त्रीप्रत्यया एव निर्दिष्टाः । ते यथा -

(क) टाप्
(ख) ङीप्
(ग) ङीष्
(घ) चाप्
(ङ) ऊङ्
(च) ङीन्
(छ) तिः

(क) टाप्-प्रत्ययः

१. अजाद्यतष्टाप्:(४.१.४)- इदं हि टाप्-प्रत्ययविधायकं विधिसूत्रम् । अजादीनाम् अकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् । अर्थात् अस्य सूत्रस्यायमेवाशायो यत्- अजादिगणस्य शब्देभ्यः, अकारान्तशब्देभ्यः च स्त्रीत्वं द्योतयितुं 'टाप्' इति प्रत्ययो भवति ।

विशेषः टाप्-प्रत्ययस्य टकारस्य 'चुटु' इति सूत्रेण पकारस्य च 'हलन्त्यमिति' सूत्रेण इत्सज्ञायां 'तस्य लोपः' इति सूत्रेण लोपो विधीयते । अनेन प्रकारेण टाप्-प्रत्यय 'आ' इति अवशिष्यते । अस्य उदाहरणानि यथा-
अज+ टाप् (आ) = अजा
एडक + टाप् (आ) = एडका

अश्व+ टाप् (आ) = अश्वा

चटक + टाप्(आ) = चटका

मन्द+ टाप् (आ) = मन्दा

बाल + टाप् (आ) = बाला

वत्स + टाप् (आ) =वत्सा

होड + टाप्(आ)=होडा

विलात + टाप् (आ) = विलाता

गङ्ग + टाप् (आ) = गङ्गा

सर्व + टाप् (आ) = सर्वा

शुद्र+टाप् (आ) =शूद्रा

वैश्य + टाप् (आ) =वैश्या

पूर्व + टाप् (आ) =पूर्वा

सरल + टाप् (आ)= सरला

कृष्ण + टाप् (आ) = कृष्णा

प्रथम + टाप् (आ) = प्रथमा

निपुण + टाप् (आ) = निपुणा

कनिष्ठ + टाप् (आ) = कनिष्ठा

एवमेव स्त्रीलिङ्गेऽनेके शब्दाः निर्मीयन्ते।

२. अपि च 'क' प्रत्ययान्तपुंलिङ्गशब्दात् अनन्तरं 'टाप्' प्रत्ययो विद्यते चेत् ककाराद् पूर्वम् इकारादेशो भवति,

कारक + टाप् (आ) =कारिका

मूषक + टाप् (आ) = मूषिका

गोपालक + टाप् (आ)= गोपालिका

मामक + टाप् (आ) = मामिका

पाचक + टाप् (आ) =पाचिका

नायक + टाप् (आ) = नायिका

टाप्-प्रत्ययान्तशब्दानां रूपाणि बालिका, लता इत्यादिशब्दसदृशानि भवन्ति।

(ख) ङीप-प्रत्ययः

स्त्रीप्रत्यये ङीप्-विधायकानि बहूनि सूत्राणि लघुसिद्धान्तकौमुद्यां विद्यते । 'ङीप्'- इत्यस्य प्रत्ययस्य ङकारस्य 'लशक्वतद्धिते' इति सूत्रेण पकारस्य च हलन्त्यमिति इत्सज्ञायां 'तस्य लोपः' इति सूत्रेण लोपे सति' ई' इति अवशिष्यते।

१. उगितश्च (४.१.६)

उगिदन्तप्रातिपदिकात् स्त्रियां ङीप् स्यात् । अर्थात् यस्य प्रातिपदिकस्य अन्ते उक्-प्रत्याहारस्य वर्णः वर्त्तते, तस्मात् प्रातिपदिकात् स्त्रीत्वं द्योतयितुं ङीप्-प्रत्ययो भवति।

ज्ञातव्यम्

'उक' इत्यनेन उक्-प्रत्याहारः बुद्धयते । उक्-प्रत्याहारे 'उ ऋ लृ' एते त्रयो वर्णा: भवन्ति । शतृ, वसु, डवतु इत्यादिप्रत्ययानाम् उ, ऋ, लृ इत्यादिः इत्संज्ञको भवति, तस्मात् ते प्रत्ययाः 'उगित्' इति।

उदाहरणं यथा-

भा + डवतु = भवत् - भवत् + ङीप् (ई) = भवती।
(सूचना- शप्रयनोर्नोनित्यम् इति सूत्रेणात्र शतृप्रत्ययन्ताद् प्रातिपदिकात् नुमागमो भवति अधिकस्पष्टतायै लिखितं सूत्रम् अवश्यमेव द्रष्टव्यम्।)

भू+ शतृ (अत्) = भवत् - भवत् + ङीप् (ई) = भवन्ती।
पच् + शतृ = पचत्- पचत् + ङीप (ई) = पचन्ती।
दीव् + शतृ = दीव्यत् - दीव्यत् + ङीप् (ई) = दीव्यन्ती।

एवं हि

पठत् + ङीप: (ई) = पठन्ती।
लिखत् + ङीप् (ई) = लिखन्ती।
गच्छत् + ङीप्(ई) = गच्छन्ती।
पश्यत् + ङीप् (ई) = पश्यन्ती।

(२) टिड्ढाणञ्द्वयसज्दध्नञ्मात्रच्तयप्ठक्ठञ्कञ्कक्वरप:(४/२/१५)

उपसर्जनं यट्-टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप् स्यात्। अर्थात्- टित्-शब्दाः,ढकारादि प्रत्ययान्तशब्दाः, तथा च अण्,अञ्, द्वयसच्, दध्नच्, मात्रच्, तयप् , ठक्, ठञ्, कञ्, क्वरप् एतेषु कश्चन प्रत्ययः यस्य शब्दस्य अन्ते विद्यते, तस्मात् स्त्रीत्वं द्योतयितुं ङीप् - प्रत्ययो भवति। उदाहरणं यथा-

(टिदन्तः) कुरुचर + ङीप् (ई) = कुरुचरी।
(टिदन्तः) नद + ङीप् (ई) = नदी।
(टिदन्तः) देव + ङीप् (ई) = देवी ।
(टप्रत्ययान्तः) सौपणेय + ङीप् (ई) = सौपर्णेयी।
(अण्-प्रत्ययान्तः) ऐन्द्र + ङीप् (ई) = ऐन्द्री।
(अञ्-प्रत्ययान्तः) औत्स + ङीप् (ई) = ओत्सी।
(द्वयसच्-प्रत्ययान्तः) अरुद्वस् + ङीप् (ई) = ऊरुद्वयः।
(दध्नच् प्रत्ययान्तः) उरुदध्न + ङीप् (ई) = ऊरुदध्नी।
(मात्रच्-प्रत्ययान्तः) ऊरुमात्र + ङीप् (ई) = ऊरुमात्री।
(तयप्-प्रत्ययान्त:) पञ्चतय+ ङीप् (ई) = पञ्चतर्य।
(ठक् - प्रत्ययान्तः)आक्षिक + ङीप् (ई) = अक्षिकी।
(ठञ-प्रत्ययान्तः) - प्रास्थिक + ङीप् (ई) = प्रास्थिकी।
(कञ् -प्रत्ययान्तः) - यादृश + ङीप् (ई) = यादृशी।
(क्वरप्-प्रत्ययान्तः) इत्वर + ङीप् (ई) = इत्वरी।

"नञस्नञीकख्युँस्तरुणतुलनानामुपसंख्यानम् " इत्यनेन वार्तिकेन नञ्-प्रत्ययन्ताद् ,स्नञ्-प्रत्ययन्ता ईकक्-प्रत्ययन्ताद्, ख्नुन्- प्रत्ययन्ताद् तथा च तरुण-तुलनप्रातिपदिकात् स्त्रीत्वविवक्षयां ङीप् प्रत्ययो भवति । यथा –

स्त्रैण + ङीप् (ई) = स्त्रैणी।
पौंस्न + ङीप् (ई) = पौंस्नी।
शाक्तीक + ङीप् (ई) = शाःक्तीकी।
याष्टीक + ङीप् (ई) = याष्टीकी।
आढ्यङ्कर + ङीप् (ई) = आढ्यङ्करणी।
तरुण + ङीप् (ई)=तरुणी।
तुलन + ङीप् (ई)= तुलनी।

(३) यश्च(४.२.१६)

अर्थात् यञ्- प्रत्ययान्त-प्रातिपदिकात् स्त्रीत्वं द्योतयितुं ङीप् - प्रत्ययो भवति। यथा-
गार्ग्य+ङीप्= गार्गी।

ज्ञातव्यम्-

'हलस्तद्धितस्य इति सूत्रेण हल: उत्तरस्य तद्धितयकारस्य उपधाभूतस्य लोपो भवति, इति परे सति। यथा 'गार्ग्य+ ई' इति स्थिते गकरोत्तवर्तियकारस्य लोपः।

४.वयसि प्रथमा (४/१/२०)

कुमारावस्थासूचकेभ्य: अकारान्तप्रातिपदिकात् ङीप् प्रत्ययो भवति। यथा-

कुमार + ङीप् (ई) = कुमारी।
किशोर +ङीप् (ई) =किशोरी।

ज्ञातव्यम्

आयुषः तिस्रोऽवस्थाः भवन्ति- कोमारावस्था, यौवनावस्था, वृद्धावस्था च। पूर्वोक्तसूत्रेण अत्र प्रथमवयोवाचिभ्यः कौमारावस्थासूचकेभ्यः अकारान्तप्रतिपदिकेभ्यः एव 'वयसि प्रथमा' सूत्रेण ङीप् भवति। परन्तु बाला, कन्या इत्यादिभ्यः शब्देभ्यः कौमारवस्थासूचकत्वादपि अजादिगणत्वात् ङीप् न भवति।)

५. द्विगो: (४.१.२२)

अकारान्तद्विगुसमासगतेभ्यः प्रातिपदिके स्त्रीत्वविवक्षायां ङीप् प्रत्ययो भवति। यथा -
त्रिलोक (त्रयाणां लोकानां समाहार:) + ङीप् (ई) = त्रिलोकी।
त्रिपाद (त्रयाणां पादानां समाहारः) +ङीप् =त्रिपादी।
चतुःसूत्रा (चतुर्णां सूत्राणां समाहारः) + ङीप् = चतुःसूत्री।

विशेष: परन्तु अजादिगणत्वात् द्विगुसमाषविद्यमानत्वे अपि त्रिफला, त्र्यनीका इत्यत्र ङीप् न भवति।
अजादिगणीयौ
त्रिफल(त्रयाणां फलानां समाहार:) + टाप् (आ) = त्रिफला।
त्र्यनीक (त्रयाणाम् अनीकानां समाहारः) + टाप् = त्र्यनीका।

६. वर्णदनुदात्तात्तोपधात्तो नः (४.१.३९)

यस्य वर्णवाचकशब्दस्य अन्तिमस्वरः अनुदात्त अकारोऽस्ति , तथा च यस्य उपधायां तकारः विद्यते, तस्मात् वर्णवाचकशब्दात् स्त्रीत्वं द्योतयितुं विकल्पेन ङीप-प्रत्ययो भवति। प्रत्ययसंयोगेन च वर्णवाचकशब्दस्य उपधातकारस्य स्थाने नकारदेशोऽपि भवति, ङीप्-विधायकम् इदं तु वैकल्पिकसूत्रमेव । ङीप्-पक्षे एव उपधायाः नकारादेशः, अन्यथा न । उदाहरणत्वेन -

एत+ङीप्(ई) = एनी

रोहित+ङीप्= रोहिणी

ङीपाभावे तु टाप् भवति । यथा-

एत + टाप् (आ) = एता ।

रोहित + टाप्(आ) = रोहिता ।

ज्ञातव्यम्

उपधा- अलोऽन्तात् पूर्व उपधा। अर्थात् शब्दे अतिमवर्णात् पूर्वं विद्यमानस्य वर्णस्य उपधा संज्ञा भवति । यथा - 'एत' इत्यत्र अन्तिमवर्णः अ (त्+अ =त) । अतः अकारात् पूर्वं त्-वर्णोऽस्ति, तस्मात् तकारस्य उपधा संज्ञा भवति ।

अग्रगते: समीक्षणम्

१. अधः प्रदत्तानां शब्दानां प्रत्ययं निरूपयत ।

(क)गायिका

(ख) नायिका

(ग)भवती

(घ) नदी

(ङ)यादृशी

(च) रोहिणी

(ग) ङीष्-प्रत्ययः

ङीष्- प्रत्ययविधायकानि नैकानि सूत्राणि लघुसिद्धान्तकोमुद्यां निर्दिष्टानि सन्ति । 'ङीष्' - प्रत्ययस्य 'ङ्'कारस्य लशक्वतद्धिते इति सूत्रेण तथा षकारस्य 'हलन्त्यमिति' सूत्रेण इत्संज्ञायां लोपे जाते "ई' इति अवशिष्यते ।

(१) षिद्गौरादिभ्यश्च (४.१.४१)

षित् - प्रातिपदिकेभ्यः, गौरादिगणस्य च शब्देभ्यः स्त्रीत्वं द्योतयितुं 'ङीष्' इति प्रत्ययो विधीयते। षित् अर्थात् षकारस्य यत्र इत्संज्ञा जाता। षित्-प्रातिपदिकेभ्यः स्त्रीत्वं विवक्षायां ङीष्-प्रत्ययो भवति। उदाहरणत्वेन यथा -

नर्तक + ङीष् = नर्तकी।

गौर + ङीष् = गौरी।

अनडुह + ङीष् = अनडुही/अनड्वाही।

नट + ङीष् = नटी।

मण्डल + ङीष्= मण्डली।

सुन्दर + ङीष् = सुन्दरी।

विशेषः 'प्राचां ष्फ तद्धितः' इति सूत्रेण यञ-प्रत्ययान्तप्रातिपदिकेभ्यः स्त्रीत्वविवक्षायां विकल्पेन तद्धितसंज्ञकः ष्फ-प्रत्ययो भवति। यथा- गार्गादिभ्यो यञ् इति सूत्रेण यञ्-प्रत्यये कृते 'गार्ग्य' इति शब्दो निष्पद्यते यञन्तगार्ग्यशब्दात् स्त्रीत्वविवक्षायां ष्फप्रत्ययो जाते 'षःप्रत्ययस्य' इति सूत्रेण षकारस्य लोपे जाते 'फ' इति अवशिष्टे फकारस्थाने 'आयन्'- आदेशे गार्ग्य + आयन इति जाते 'गार्ग्यायन' इति जायते। पुनः णत्वभूत्वा गार्ग्यायण 'इति। इदानीं 'षित्' कारणात् स्त्रीत्वविवक्षायाम् एवं जायते -

गार्ग्यायण + ङीष् (ई) = गार्ग्यायणी

इदं तु वैकल्पिकरूपमेव।

विशेषः गौरादिगणस्य शब्दाः यथा- गौर, मत्स्य, मनुष्य, शृङ्ग, पिङ्गल, हय, गवय, मुकय,ऋष्य, द्रोण, कोकण, हरिण, पट, मङ्गल, मेद, सूर्य, पुष्कर, घातक, इत्यादयः।

२.वोतो गुणवचनात् (४.१.४५)

उकारान्त-गुणवाचकशब्दात् स्त्रीत्वं द्योतयितुं विकल्पेन ङीष्-प्रत्ययः विधीयते। यथा-

मृदु + ङीष् (ई) = मृद्वी।

बहु + ङीष् (ई)=बह्वी।

पटु + ङीष् (ई)= पट्वी।

साधु + ङीष् (ई)=साध्वी।

उरु + ङीष् (ई)= उर्वी।

प्रकृतसूत्रेण उक्तः ङीष्-प्रत्ययः विकल्पेन एव भवति । अतः विकल्पाभावे मृदुः, बहुः, पटुः, साधुः, उरुः इत्येव स्त्रीलिङ्गे भवति ।

ज्ञातव्यम्

मृदु + ई इत्यत्र यण्-सन्धि प्रवर्त्तते। अत्र उकारस्य स्थाने वकारदेश मृद् + व्+ ई जाते संयोगेने 'मृद्वी' इति रूपं जायते ।

३.बह्वादिभ्यश्च (४.१.४५) :

बह्वादिगणस्य शब्देभ्यः स्त्रीत्वं द्योतयितुं विकल्पेन ङीष् -प्रत्ययः विधीयते । यथा- बहु+ ङीष् (ई)= बह्वी।

विकल्पाभावे स्त्रियां 'बहु' इत्येव भवति।

वार्तिकम् :- कृदिकारदक्तिनः अर्थात् क्तिन्- प्रत्ययभिन्नेभ्यः कृदन्तरूप-ईकारान्त-प्रातिपदिकेभ्यः विकल्पेन 'ङीष्' भवति । यथा:-

रात्रि + ङीष् = रात्री ।

विकल्पाभावे रात्रिः इत्येव तिष्ठति ।

तथा च पूर्वोक्तवार्तिकनियमेन क्तिन्-प्रत्ययान्तप्रातिपदिकानां ङीष्-निषेध- मति, कीर्ति, रीति, प्रीति इत्यादिभ्यः शब्देभ्यः ङीष् -प्रत्ययो न भवति ।

वार्तिकम्- 'सर्वतोऽक्तिन्नार्थादित्येके' इति वार्तिकनियमेन क्तिनप्रत्ययान्तभिन्नेभ्यः सर्वेभ्यः इकारान्तप्रातिपदिकेभ्यः विकल्पेन ङीष् भवति । यथा-

शकटि + ङीष् = शकटी

विकल्पभावे 'शकटि' इति ।

४. पुंयोगादाख्यायम्- (४.१.४८)

या पुमाख्या पुंयोगात् स्त्रियां वर्तते, तस्मात् ङीष् स्यात् । अर्थात् पुरुषेण सम्बन्धत्वात् यदा पुंलिङ्गवाचकः शब्दः स्त्रीलिङ्गे प्रयुज्यते, तदा अकारान्तप्रातिपतिकेभ्यः ङीष् भवति ।

गोप + ङीष् (ई) = गोपी (गोपस्य स्त्री) ।

शूद्र + ङीष् (ई) = शूद्री (शुद्रस्य स्त्री) ।

अस्य सूत्रस्य बाधकम् 'पालकान्तान्त' इति अपवादकं वार्त्तिकं वर्तते । अर्थात् पालकान्ताद् प्रातिपदिकात् स्त्रीत्वविवक्षायां पुंयोगेऽपि 'ङीष्' न भवति। अनेन बाधकवार्त्तिकेन पालकान्तप्रातिपदिके 'टाप्' एव भवति । यथा- गोपालिका, अश्वपालिका इत्यादि ।

५. इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिमाख्य-यव-यवन-मातुलाचार्याणामानुक् (४.१.४१)

सूत्रोक्तेभ्यः इन्द्रादिभ्यः प्रातिपदिकेभ्यः ङीष्-प्रत्ययो भवति, 'आनुक्'-आगमश्च भवति । तत्र 'आनुक' इत्यत्र 'आन् अवशिष्यते । यथा-

इन्द्र+ (आन्) +ङीष् (ई) = इन्द्राणी।

वरुण + (आन्)+ङीष् = वरुणानी।

भव + (आन्) + ङीष् = भवानी।

शर्व + (आन्) + ङीष्= शर्वाणी।

हिम + (आन्) + ङीष् = हिमानी।

अरण्य + (आन्)+ ङीष् = अरण्यानी।

यव + (आन्) + ङीष् = यवानी।

मातुल + (आन्)+ङीष् = मातुलानी।

विशेषः (मातुलोपाध्याययोरानुग् वा इति नियमे मातुलशब्दात् स्त्रियाम् 'आनुक्' इत्यस्य अभावे मातुल + ङीष् = मातुली इत्येवं रूपं भवति ।

तद्वत्= उपाध्याय+(आन्) । ङीष् = उपाध्यायानी/उपाध्यायी ।

आचार्य (आन्) + ङीष् = आचार्यानी।

विशेष: वार्तिकम्- अर्यक्षत्रियाभ्यां वा स्वार्थे इति वार्तिकेन 'अर्य' 'क्षत्रिय' इत्याभ्यां प्रातिपादिकाभ्यां विकल्पेन ङीष् भवति । यथा-

अर्य + (आन्) + ङीष् = अर्याणी ।

क्षत्रिय+(आन्)+ ङीष्= क्षत्रियाणी ।

विकल्पभावे अर्या, क्षत्रिया इत्येव रूपं भवति ।

६ क्रीतात् करणपूर्वात् (४.१.५०)

क्रीतशब्दान्तात् प्रातिपदिकात् करणपूर्वात् स्त्रियां ङीष्-प्रत्ययो भवति । यथा-

धनक्रीती (धनेन क्रीता, भूमिः इत्यत्र कुत्रचिद् धनक्रीता इत्यपि भवति ।)

७. स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्(४.१.५४)

स्वाङ्गं यदुपर्सनमसंयोगोपधं तदन्तात् प्रातिपदिकात् स्त्रियां - विकल्पेन ङीष् भवति । यथा- अतिकेशी / अतिकेशा (केशान् अतिक्रान्त) ।

चन्द्रमुखी / चन्द्रमुखा ।

८. जातेरस्त्रीविषयादयोपधात् (४.१.६३)

यत् प्रातिपदिकं नं नित्यस्त्रीलिङ्गं न च यकारोपधाभूतं, तादृशात् जातिवाचकप्रातिपदिकात् स्त्रीत्वविवक्षयां ङीष् भवति। यथा-

तट + ङीष् (ई) = तटी।

वृषल + ङीष् (ई) = वृषली।

कठ + ङीष् (ई) = कठी।

बह्वृच। ङीष् (ई) = बह्वृची।

तत्र "योपधप्रतिषेधे हयगवयमुकमनुष्यमत्स्यानामप्रतिषेधः" इति वार्तिकेन योपधेभ्यः हय-गवय-मुकय-मनुष्य-मत्सादि - प्रातिपदिकेभ्यः ङीष् भवति। यथा-

हय + ङीष् (ई) = हयी।

मनुष्य + ङीष् (ई) = मानुषी।

गवय+ ङीष् (ई) = गवयी।

मुकय+ ङीष् (ई) = मुकयी।

मत्स्य + ङीष् (ई) = मत्सी।

९.इतो मनुष्यजातेः (४.१.६५)

इकारान्तात् मनुष्यजातिवाचिनः प्रातिपदिकात् स्त्रियां ङीष्-प्रत्ययो भवति। यथा - दाक्षि+ ङीष् (ई) = दाक्षी।

ङीष्-बाधकसूत्राणि

१. न क्रोडादिबह्वचः

क्रोडादिगणीयान्ताद् बह्वजन्तात् स्वाङ्गवाचकात् प्रातिपदिकात् स्त्रियां ङीष् न भवति। टाप् एव भवति। यथा- कल्याणक्रीडा, सुजघना।

२. नखमुखात् संज्ञायाम् (४.१.५८)

नखन्तात् मुखन्तात् च स्वाङ्गवाचिनः प्रातिपदिकात् स्त्रीत्वविवक्षायां ङीष् न भवति। यथा- शूर्पमुखा, गौरमुखा। तत्र 'अजाद्यतष्टाप्' इति सूत्रेण टाप्-प्रत्ययः।

अग्रगत्याः निरीक्षणम्

२. अधःस्थानां शब्दानां स्त्रीप्रत्ययं लिखत -

(क) गौरी

(ख) नर्तकी

(ग)) मृद्वी

(घ) त्रिलोकी

(ङ) कुमारी

(च) बह्वी

(छ) शकटी

(ज) इन्द्राणी

(झ) तटी

(ञ) हयी

घ. चाप्-प्रत्ययः

'सूर्याद् देवतायां चाब्वाच्यः' इति वार्तिकेन चाप्-प्रत्ययो विधीयते । अस्य वार्तिकस्यायमाशयो यत्- 'सूर्य' इति प्रातिपदिकात् देवतायां स्त्रीत्वं द्योतयितुं चाप्-प्रत्ययो भवति । 'चाप्' इत्यस्य चकारस्य 'चुटू'-सूत्रेण पकारस्य च हलन्त्यमिति सूत्रेण इत्संज्ञायां लोपो भवति । उदाहरणं यथा -

सूर्य + चाप् (आ) = सूर्या (सूर्यस्य स्त्री देवता)।

(ङ) ऊङ्-प्रत्ययः

ऊङ्-प्रत्ययस्य ङकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञायां लोपे जाते 'ऊ' इति अवशिष्यते ।

१ ऊङुतः (४.१.६६)

ऊकारान्ताद् मनुष्यजातिवाचिनः प्रातिपदिकात् स्त्रियाम् ऊङ्-प्रत्ययो भवति । यथा-

कुरु + ऊङ् (ऊ) = कुरूः।

२ पङ्गोश्च (४.१.६८)

पङ्गुशब्दात् स्त्रीत्वविवक्षायाम् ऊङ्-प्रत्ययो भवति । यथा-

पङ्गु + ऊङ्(ऊ) = पङ्गूः।

विशेषः श्वशुरशब्दात् स्त्रीत्वविवक्षायाम् ऊङ् प्रत्ययो भवति। यथा-

श्वशुर+ ऊङ्(ऊ) = श्वश्रूः।

अत्र 'श्वशुरस्योकाराकारलोपश्च' इति वार्तिकेन 'श्वसुर' शब्दस्य उकाररकारयोः लोपः।

३. ऊरूत्तरपदादौपम्ये (४.१.६९)

ऊरूत्तरपदात् प्रातिपदिकाद् औपम्ये गम्यमाने स्त्रियाम् ऊङ्-प्रत्ययो भवति। यथा-

करभोरु + ऊङ् (ऊ) = करभोरूः।

४. संहितशफलक्षणवामादेश्च (४.१.७०) :

संहित- शफ- लक्षण-नाम इत्यादिभ्यः प्रातिपदिकेभ्यः स्त्रियाम् ऊङ्- प्रत्ययो भवति। यथा-

संहितोरु + ऊङ्(ऊ) = संहितोरूः।

शफोरु + ऊङ् (ऊ)=शफोरूः।

लक्ष्यणोरु + ऊङ्(ऊ) = लक्षणोरूः

वामोरु + ऊङ्(ऊ) = वामोरूः।

(च) ङीन् - प्रत्ययः

ङीन्-प्रत्ययस्य ङकारस्य 'लशक्वतद्धिते' इति सूत्रेण इत्संज्ञायां नकारस्य च हलन्तमिति सूत्रेण इत्संज्ञायां 'तस्य लोपः' सूत्रेण लोपे 'ई' इति अवशिष्यते।

१. शर्ङ्गरवाद्यञो ङीन् (४.१.७३)

शर्ङ्गरवादिभ्य: अञन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन्- प्रत्ययो भवति। यथा-

शर्ङ्गरव+ ङीन् (ई) = शर्ङ्गरवी।

बैद + ङीन्(ई) = बैदी।

ब्राह्मण +ङीन् (ई) = ब्राह्मणी।

वार्तिकम् : 'नृनरयोर्वृद्धिश्च' इति वार्तिकेन नृ-नर इत्येताभ्यां जातिवाचकप्रातिपदिकाभ्यां स्त्रीत्वविवक्षायां ङीन् (ई) प्रत्ययो भवति। यथा-

नृ+ङीन्= नारी।

नर+ङीन्= नारी।

छ. तिप्रत्ययः

२.यूनस्तिः (४.१.७७) -

'युवन्'-शब्दान् स्त्रीत्वं द्योतयितुम् 'ति' इति प्रत्ययो भवति। यथा –

युवन् + ति = युवतिः ।

१३.५ अध्यायात् किमवगतम्

अध्यायेऽस्मिन् अधौ अल्लिखितानि विषयानि आलोचितानि भवन्ति-

१. स्त्रीप्रत्ययविषये सामान्यविषयं ज्ञातवन्तः।
२. स्त्रीप्रत्ययान्तशब्दानाम् आकृतिगतपरिवर्तनविषये ज्ञातवन्तः।
३. लघुसिद्धालकौमुद्याम् उल्लिखितानां स्त्रीप्रत्ययविधायकसूत्राणां सोदाहरणपूर्वकं व्याख्यां ज्ञातवन्तः।
४. स्त्रीप्रत्ययान्तशब्दानां वैकल्पिकरूपाणि ज्ञातवन्तः।

१३.६ ज्ञानाधिक्यम्

१.लघुसिद्धान्तकौमुदी, गोविन्द प्रसाद शर्मा (व्याख्या) चौखम्बा सुरभारती प्रकाशन, वारणसी, 2021
२.लघुसिद्धान्तकौमुदी, हरेकान्त मिश्र, (सम्पा), भारतीय विद्या प्रकाशन, दिल्ली, 2017
३.अष्टाध्यायी, नरेश झा (व्याख्या), चौखम्बा सुरभारती प्रकाशन, वारणसी, 2021

१३.७ अग्रगत्याः निरूपणम्

१. उत्तराणि

क. गायिका = गायक + टाप्।
ख. नायिका=नायक+टाप्।
ग. भवती=भवत् + ङीप्।
घ. नदी= नद+ङीप्।
ङ. यादृशी=यादृश+ङीप्।

च. रोहिणी=रोहित+ ङीप्।

२.उत्तराणि-

क. गौर+ङीष् ।
ख. नर्तक+ ङीष्।
ग. मृदु+ ङीष् ।
घ.त्रिलोक+ ङीप्।
ङ. कुमार+ङीप्।
च. बहु+ङीष्।
छ. शकटि+ङीष्।
ज. इन्द्र+ङीष्।
झ.तती+ङीष्।
ञ. हय+ङीष्।

⑦१३.८ अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

१. 'अश्वपालक' इत्यस्य स्त्रीरूपं किम् ?
2. 'लिखन्ती' इत्यत्र कः स्त्रीप्रत्ययः ?
३. 'लिखन्ती' इत्यस्य ङीप्प्रत्ययाद् पूर्वं कः प्रत्ययः विधीयते ?
४. 'इन्द्राणी' इत्यत्रः कः आगमः ?
५. 'सूर्या' इत्यत्र कः स्त्रीप्रत्ययः ?
६. 'नारी' इत्यत्र कः स्त्रीप्रत्ययः ?

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

व्याख्या प्रदेया सोदाहरणम्

१. अजाद्यतष्टाप्,

२.षिद्गौरादिभ्यश्च,

३. उगितश्च,

४. द्विगोः,

५. वयसि प्रथमा,

६. यूनस्तिः,

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

१. लघुसिद्धान्तकौमुद्यां प्रतिपादितान् स्त्रीप्रत्ययान् अधिकृत्य लेखः प्रस्तुयताम्।

२. ङीष्-प्रत्ययविधायकसूत्राणि आश्रृत्य आलोचनां प्रस्तूयताम्।

*****

अध्यायः : १४ वाच्यम्

अध्यायस्य संरचना

१४.१ उद्देश्यम्

१४.२ परिचयः

१४.३ वाच्यप्रकाराः

१४.३.१ कर्तृवाच्यम्

१४. ३.२ कर्मवाच्यम्

१४.३.३ भाववाच्यम्

१५.३.४. कर्म-कर्तृवाच्यम्

१४.४ केचन विशेषनियमाः

१४.५ द्विकर्मकधातूनां वाच्यम्

१४.६. केषाञ्चित् प्रचलितधातूनां कर्म-भाववाच्ययोः संक्षिप्तीकरणम्

१४.७. वाच्ये प्रत्ययव्यवहारः

१४.८ वाच्यपरिवर्तनम्

१४.९ प्रचल्यमानधातूनां कर्मवाच्ये / भाववाच्ये विस्तृतिरूपम्

१४.१० अध्यायस्य असमीयाभाषायां सारांशः

१४.११ अध्यायात् किमवगतम्

१४.१२ ज्ञानाधिक्यम्

१४.१३ अग्रगत्याः निरीक्षणम्

१४.१४ अभ्यासप्रश्नाः

१४.१ उद्देश्यम्

अस्य अध्यायस्य अध्ययनादनन्तरं भवन् –

- संस्कृत वाच्यसम्बन्धिज्ञानं भविष्यति।
- वाच्यप्रकारविषये ज्ञास्यति।
- वाच्यपरिवर्तनस्य ज्ञानं प्राप्स्यति।
- वाच्यनियमान् ज्ञास्यति।

१४.२ परिचयः

संस्कृतवाक्येषु कर्ता-कर्म-क्रियादीनां प्रयोगो दृश्यते। तत्र च कर्तृकर्मभिः सह कारक-विभक्ति-विशेषण - सर्वनाम - लिङ्ग-वचनादीनामपि संयोगो दरीदृश्यते। येन विना पदत्वं वाक्यत्वं वा नैव सम्भवति। तथैव क्रियया सह लकार-प्रत्ययादीनां व्यवहारो दृश्यते।

'पदसमूहो वाक्यम्' अर्थात् यत्र पदानां समूहो वर्तते तदेव वाक्यम्। तथा च 'वाक्यं स्याद् योग्यता-आसत्ति-आकांक्षायुक्तपदोच्चयः' इति। अर्थात् योग्यताविरहे आसत्तिं विना, आकांक्षां विना वाक्यं न सम्भवति; एते गुणाः भवितव्या एव। वाक्यं द्विविधम् - पूर्णवाक्यम् २. खण्डवाक्यञ्च। यस्मिन् वाक्ये कथा सम्पूर्णरूपेण प्रकटी-भवति तद् पूर्णवाक्यमुच्यते। यस्मिंश्च कथायाः एकस्याः अंशमात्रं प्रस्फुटितं जायते तद् खण्डवाक्यम् इति कथ्यते। संस्कृतवाक्ये सामान्यतया त्रिप्रकारकं पदसंघटनं दृश्यते -१ .कर्ता तद् विशेषणञ्च तद्गुणाः वा २ .कर्म तद्विशेषणञ्च ३ .क्रियापदम् चेति।

वच्धातोः ण्यत्प्रत्यये वाच्यमिति रूपं निष्पन्नम्। यत्र यद् प्रधानरूपेण वक्तव्यं भवति तद् वाच्यमिति।

१४.३. वाच्यप्रकाराः

संस्कृते वाच्यं चतुर्विधं भवति। तद्यथा-

१. कर्तृवाच्यम्

२. कर्मवाच्चम्

३. भाववाच्यम्

४. कर्म-कर्तृवाच्यम्

१ .**कर्तृवाच्यम्-** यस्मिन् वाच्ये कर्तृपदं प्रधानं वर्तते तद् कर्तृवाच्यम् उच्यते। कर्तृवाच्चे कर्तृपदे प्रथमा विभक्तिः भवति; क्रियापदं च कर्तुः पुरुषवचनानुसारं भवति, कर्तृपदे 'उक्ते कर्तरि १मा' इत्युच्यते। यथा बालकः ग्रन्थं पठति। अत्र 'अनुक्ते कर्मणि २या भवति।

२. **कर्मवाच्यम्**- यस्मिन् वाच्ये कर्मपदं प्रधानं भवति, तद् कर्मवाच्यम्। कर्मवाच्ये कर्मणि प्रथमा विभक्तिः भवति। क्रियापदं प्रथमाविभक्यन्तकर्मपदस्य पुरुषवचनानुसारं प्रयुज्यते। तत्र च 'उक्ते कर्मणि प्रथमा' उच्यते। तथा च अत्र कर्तृपदं 'अनुक्ते कर्तरि तृतीया भवति। यथा - बालिकया ग्रन्थः पठ्यते। अकर्मकसमापिकाक्रियायुक्तवाक्यं कर्मवाच्यं नैव भवति।

३.**भाववाच्यम्**- यस्मिन् वाच्ये क्रियापदं प्रधानं भवति, तद् भाववाच्यम् उच्यते। भाववाच्ये कर्तृपदे ३या भवति; कर्मपदं नैव भवति । तत्र च धातूनां प्रयोगे आत्मनेपदी प्रथमपुरुषैकवचनं प्रयुज्यते । तथा च क्त-क्तव्य प्रत्ययान्तक्रियापदानि नपुंसकलिङ्गे भवन्ति। यथा -

१ त्वया हस्यते।

२. युवकैः हसितम्।

३. अस्माभिः स्थातव्यम् ।

४. शिशुना हस्यते।

५. तैः नृत्यते।

६. तेन भूयते ।

७. ताभ्यां क्रुध्यते।

८. मया गम्यते।

९. त्वया खाद्यते ।

१०. तेन गतम्।

१४.३.४ कर्मकर्तृवाच्यम्

क्रियमाणन्तु यत्कर्म स्वयमेव प्रसिध्यति ।

सुकरैः स्वैर्गुणैकर्त्तः कर्मकर्तेति तद्विदुः॥

कर्मकर्तृवाच्ये कर्म स्वयमेव कर्तावत् कार्यं करोति एवञ्च क्रिया कर्मवाच्यमिव प्रयुज्यते । वाच्येऽस्मिन् सकर्मक-क्रिया अकर्मकक्रियावत् व्यवह्रियते । अत्र कर्म कर्तृवत् कार्यं करोति, अतः कर्मकर्तृवाच्यमुच्यते । तत्र प्रथमा विभक्तिः भवति । वाच्येऽस्मिन् क्रिया आत्मनेपदी भवति तथैव अत्र लट्, लङ्, लोट्, विधिलिङ्, धातौ यकारो संयुक्तो भवति । वाच्यमिदं भाववाच्येऽपि परिवर्तते। उदाहरणं 'यथा-

कर्तृवाच्यम्	कर्मकर्तृवाच्यम्	भाववाच्यम्
गजः वृक्षो भिनत्ति	वृक्षः (स्वयमेव) भिद्यते	वृक्षेण भिद्यते (स्वयमेव)

पाचकः ओदनं पचति	ओदनः (स्वयमेव) पच्यते	ओदनेन पच्यते (स्वयमेव)

ज्ञातव्यम्

वाच्यपरिवर्तनं कर्तृ- कर्म-क्रियाः तथा च कर्तृ-कर्मणोः विशेषणपदमपि परिवर्तयेत् । वाक्ये अन्यपदानां परिवर्तनं नैव भवति । यथा - कर्तृवाच्यम् - वने भ्राम्यन् अहं दुर्दान्तं व्याघ्रम् एकं दृष्टवान् ।

कर्मवाच्यम् - वने भ्राम्यता मया दुर्दान्तः बाघ्रः एकः दृष्टः।

कर्ता - कर्म पदानि विशेष्यानि इत्यतः तेषां लिङ्ग-विभक्ति-वचनानि विशेषणपदमपि अनुसरति ।

विशेष्यस्य हि यल्लिङ्गं विभक्तिवचने च ये ।

तानि सर्वापि योज्यानि विशेषणपदेष्वपि ॥

अग्रगत्याः निरीक्षणम्

प्रश्नः वाच्यपरिवर्तनं कुरु-

१. सः पठति।

२. बालकः ग्रन्थं पठति।

३. छात्राः पाठं पठन्ति।

४. रामः ओदनं खादति।

५. रामः तत्र तिष्ठति।

१४.४. केचन विशेष नियमाः

क) कस्यचित् वाक्यस्य वाच्यपरिवर्तने प्रथमं तु समापिका क्रिया सकर्मकम् अकर्मकं वा स्पष्टी भवेत्। यदि सकर्मकमस्ति तर्हि कर्मवाच्ये परिवर्तनीयम् । पुनः यदि क्रिया अकर्मकं भवति तर्हि भाववाच्यं करणीयम् । यत्र कर्म न भवति तत्र कर्मवाच्यं न भवति । कर्मकर्तृवाच्यस्य प्रयोगः साधारणतः नैव दृश्यते ।

ख) कर्मवाच्यम् - भाववाच्ययोः धातुरूपप्रयोगे समापिकाक्रियाः आत्मनेपदीविभक्तौ प्रयुज्यते। यथा- तेन चन्द्रः दृश्यते । अन्यच्च क्त - तव्यप्रत्ययान्तशब्दाः शब्दरूपमाध्यमेन परिवर्तते । यथा- बालिकया ग्रन्थः पठितः ।

ग) लट्, लोट्, लङ्, विधिलिङ् इत्यादिषु विभक्तिषु धातोरन्ते 'यकार: युज्यते । यथा - पठ्यते, खाद्यन्ते, त्रायते । परन्तु एतान् विहाय विभक्तिषु कर्मवाच्य - भाववाच्ययोः यकारो न प्रयुज्यते। धातोः केवलम् आत्मनेपदिरूपं भवति । यथा -

रामचन्द्रेन वनं जग्मे। (कर्मवाच्यम्, गम् + लिट् ए - जग्मे)

घ) धातोरन्ते यकारे सति (कर्मवाच्य-भाववाच्ययोः) केश्चन आकारान्तधातवः ईकारान्तो भवति । यथा- दा-दीयते (दी-य-ते) धा-धीयते, गा-गीयते, पा-पीयते, मा-मीयते, स्था- स्थीयते ।

ङ)इ-उ-कारान्तयोः धातोः क्रमशः इ-स्थाने 'ई', उ-स्थाने 'ऊ' भवति । यथा - चि - चीयते, जि-जीयते, श्रु- श्रूयते, स्तु- स्तूयते ।

१. ऋकारान्तधातुषु 'ऋ'-स्थाने 'रि' भवति । यथा- कृ- क्रियते, मृ- म्रियते । परन्तु व्यञ्जनवर्णैः युक्ते सति 'ऋ' स्थाने 'अर्' भवति । यथा स्मृ- स्मर्यते, ऋ - अर्च्यते, जागृ- जागर्य्यते ।

२. ऐकारान्तधातोः 'ऐ' स्थाने 'आ' भवति । यथा - ध्यौ - ध्यायते, त्रै - त्रायते किन्तु गै - गीयते ।

३. केषाञ्चित् धातूनां कर्मवाच्य-भाववाच्यरूपाणि- क्री-क्रीयते, दिव्- दिव्यते, प्रच्छ -पृच्छते, ग्रह- गृह्यते, यज् - इज्यते, शी- शय्यते, अस्-भूयते, हेव् - हूयते, वद् - उच्यते , वच् (ब्रू वा) - उच्यते, वस्- उष्यते, वह्- उह्यते, स्वप्- सुप्यते, कारि (कृ+णिच्) - कार्यते, दृश्- दृश्यते, दन्श् - दंश्यते ।

१४.५ द्विकर्मकधातूनां वाच्यम्

कस्याश्चित् क्रियायाः कर्मपदद्वयं भवति । तादृशाः धातवः द्विकर्मकधातवः उच्यन्ते। संस्कृते षोडशधातवः द्विकर्मकाः । ताः यथा- दुह्, याच्, पच्, दण्ड्, रुध्, प्रच्छ्, चि, ब्रू, शास्, जि, मन्थ्, मुष्, नी, हृ, कृष् ,वह् इत्येताः । उक्तञ्च -

'दुह्-याच्-पच्-दण्ड्-रुधि -प्रच्छि -चि-ब्रू-शास्-जि-मन्थमुषाम्।

कर्मयुक् स्यादथितं तथा स्यान्नीहृकृष्वहाम् ॥'

वाक्ये कर्मद्वयं भवति चेत् एकं मुख्यकर्म अन्यच्च गौणकर्म उच्यते । क्रियायाः उल्लेखेनैव यत्कर्म प्राथम्येन प्रधानमिति मन्यते तत् मुख्यकर्म तथा च यत् अवशिष्टं कर्म तत् गौणकर्म इति। मुख्यकर्माणि सर्वदा २या विभक्तिः प्रयुज्यते परन्तु गौणकर्मणि अर्थानुसारं ५मी विभक्तेः अन्यविभक्तीनां च प्रयोगो भवितुं शक्यते । यथा- सः वृक्षं (वृक्षात्) पुष्पं चिनोति । अत्र 'पुष्पं' मुख्यकर्म 'वृक्षं' च गौणं कर्म ।

कर्मवाच्यपरिवर्तनसमये उपर्युक्तधातूनाम् अन्तिम -चतुर्णां मुख्यकर्मणि १मा विभक्तिः भवति, अन्येषु च गौणकर्मणि २या विभक्तिः भवेत् ।

द्विकर्मकधातूनां वाच्यपरिवर्तनम्

धातवः	कर्तृवाच्यम्	कर्मवाच्यम्
दुह्	गोपः धेनुं पयो दोग्धि ।	गोपेन धेनुः पयो दुह्यते ।
याच्	वामनो बलिं वसुधां याचते ।	वामनेन बलिः वसुधां याच्यते।
चि	बालिकाः वृक्षान् पुष्पाणि चिन्वन्ति ।	बालिकाभिः वृक्षाः पुष्णाणि चीयन्ते ।
ब्रू	तपस्वी शिष्यं धर्मं ब्रूते ।	तपस्विना शिष्यो धर्मम् उच्यते ।
पच्	पाचकः तण्डुलान् ओदनं पचति ।	पाचकेन तण्डुलाः ओदनं पच्यन्ते ।
दण्ड्	राजा चौर शतं दण्डयति ।	राज्ञा चौरः शतं दण्ड्यते ।
रुध्	स चौरः कारागार रुणद्धि ।	तेन चौरं कारागारः रुध्यते ।
प्रच्छ्	शिष्यः गुरु शास्त्रं पृच्छति ।	शिष्येण गुरुः शास्त्रं पृच्छ्यते ।
नी	सः ग्रामं गां नयति ।	तेन ग्रामं गौः नीयते ।
हृ	वृद्धः ग्रामं भारं हरति ।	वृद्धेन ग्राम भारः ह्रियते ।
वह्	बालकः खञ्जं गृहं वहति।	बालकेन खञ्जो गृहम् उह्यते ।
कृष्	सा वृक्षं शाखां कर्षति ।	तया वृक्षं शाखा कृष्यते
शास्	गुरुः शिष्यं धर्मं शास्ति।	गुरुणा शिष्यः धर्मं शिष्यते ।
जि	स द्यूतकारं शतं जयति ।	तेन द्यूतकारः शतं जीयते
मन्थ्	देवाः समुद्रम् अमृतं ममन्थुः।	देवैः समुद्रः अमृतं ममन्थे।
मुष्	चौरः मां शतं मुष्णाति।	चौरेण अहं शतं मुष्ण्ये

अत्र दुह्-धातोः मुष्-धातुपर्यन्तम् उदाहरणं वाक्येषु कर्मवाच्ये अप्रधानकर्मषु प्रथमा विभक्तिः प्रयुक्ता । पुनश्च नीधातोः कृष्धातुपर्यन्ते वाक्येषु कर्मवाच्ये प्रधानकर्मषु प्रथमाविभक्तिः व्यवहृता ।

१४.६ केषाञ्चन प्रचलितधातूनां कर्मवाच्य-भाववाच्ययोः संक्षिप्तरूपम्

धातुः	लट्	लृट्	लिट्
अश्	अश्यते	अक्ष्यते, अशिष्यते	आनशे
अस्, भू	भूयते	भविष्यते, भाविष्यते	वभूवे
आप्	आप्यते	आप्स्यते	आपे
आस्	आस्यते	आसिष्यते	आषाञ्चक्रे, आसामासे
इ	ईयते	एष्यते	ईये
अधि-इ	अधीयते	अध्येष्यते	अधिजगे
कृ	क्रियते	करिष्यते, कारिस्यते	चक्रे
गम्	गम्यते	गंस्यते	जग्मे
गै	गीयते	गास्यते, गायिस्यते	जगे
ग्रह	गृह्यते	ग्रहीष्यते, ग्राहिष्यते	जगृहे
चि	चीयते	चायिष्यते, चेष्यते	चिक्ये, चिच्ये
जि	जीयते	जेष्यते, जायिष्यते	जिग्ये
ज्ञा	ज्ञायते	ज्ञायिष्यते, ज्ञास्यते	जज्ञे
दा	दीयते	दास्यते, दाचिष्यते	ददे
दृश्	दृश्यते	प्रक्ष्यते, दर्शिष्यते	ददृशे
नी	नीयते	नेष्यते, नायिष्यते	निन्ये
पच्	पच्यते	पक्ष्यते	पेचे
पठ्	पठ्यते	पठिष्यते	पेठे
पा	पीयते	पास्यते, पायिष्यते	पपे
पा	पायते	पास्यते, पायिष्यते	पपे
पाल्	पाल्यते	पालयिष्यते	पालयाचक्रे, पालयामासे
वच्	उच्यते	वक्ष्यते	उचे
वद्	उच्यते	वदिष्यते	उदे
वह्	विद्यते	वेत्स्यते	विविदे
वृत्	वृत्यते	वर्तिष्यते	ववृते
ब्रू	उच्यते	वक्ष्यते	उचे
यज्	इज्यते	यक्ष्यते	ईजे

याच्	याच्यते	याचिष्यते	ययाचे
लभ्	लभ्यते	लप्स्यते	लेभे
शक्	शक्यते	शक्ष्यते	शेके
लिख्	लिख्यते	लेखिष्यते	लिलिखे
श्रु	श्रूयते	श्रोष्यते , श्राविष्यते	शुश्रुवे
सेव्	सेव्यते	सेविष्यते	सिषेवे
हन्	हन्यते	घानिष्यते ,हनिष्यते	जघ्ने
हृ	ह्रियते	हारिष्यते	जह्रे

अग्रगत्याः निरीक्षणम्

प्रश्नः - २- अधोलिखितानां धातूनां कर्मवाच्ये लट्विभक्तेः प्रथमपुरुषैकवचनरूपाणि लिखत-

१. भू

२. नी

३. पठ्

४. ब्रु

५. हन्

१४.७. वाच्ये प्रत्ययानां व्यवहारः

वाक्ये क्रियापदे साधारणतः तिप्तस्झि-आदिप्रत्ययानां तव्य-अनीयर्-क्त-आदिप्रत्ययानां (कृत् प्रत्ययाः) च व्यवहारो भवति।

क) कर्तृवाच्ये वाक्येषु क्रियायां लकार प्रयोगसमये धातूनामन्ते कर्तुः पुरुष-वचनानुसारं प्रत्ययाः व्यवह्रियन्ते। यथा- रामः ग्रन्थं पठति, वाक्येऽस्मिन् 'रामः' कर्तृपदं तथा च 'पठति' लकारप्रत्ययुक्तं क्रियापदं वर्तते। अत्र रामः कर्तृपदे प्रथमपुरुषैकवचनतत्वात् 'पठति' क्रियापदेऽपि प्रथमपुरुषैकवचनं जातम्।

१) रामः वनं गतः - कर्ता 'रामः पुंलिङ्गैकवचने प्रयुक्तम्, क्त-प्रत्ययान्तक्रिया 'गतः' पुंलिङ्गप्रथमैकवचने प्रयुक्तम्।

२) सीता वनं गता- कर्ता 'सीता' स्त्रीलिङ्गप्रथमैकवचने प्रयुक्तम्, 'क्त' प्रत्ययान्तक्रिया 'गता' स्त्रीलिङ्गप्रथमैकवचने प्रयुक्तम् ।

३) रामः वनं गतवान् - गतवान् क्तवतुप्रत्ययान्तपदम् ।

४) सीता वनं गतवती - 'गतवती' क्तवतुप्रत्ययान्तस्त्रीलिङ्गपदम् ।

ख) कर्मवाच्ये वाक्येषु क्रिया कर्मपदानुसारं प्रयुक्तो भवति । अत्र मूलधातुभिः सह यकारागमो भवति । तथा च आत्मनेपदी भूत्वा लकारानुसारं प्रत्ययाः प्रयुज्यन्ते । कर्मणि यः पुरुषः यच्च वचनं वर्तते तदेव लकारप्रत्ययेषु अपि व्यवह्रियते । यथा- रामेण ग्रन्थः पठ्यते । इत्यत्र 'रामः कर्ता अत एव तृतीया-विभक्तिः प्रयुक्ता 'रामेण' इति रूपं जातम्। कर्मपदं 'ग्रन्थ' इति प्रथमाविभक्तौ ग्रन्थः इतिः भवति तथा च 'पठ्यते' क्रियापदं कर्मणः 'ग्रन्थः' इत्यस्य पुरुषवचनानुसारं प्रथमपुरुषैकवचने आत्मनेपदिरूपं प्रयुक्तम् ।

अन्यच्च यदा कर्मवाच्ये कृत्प्रत्ययविधानेन क्रिया उपयुज्यते, तदा कर्मपदस्य लिङ्ग - विभक्ति-वचनानुसारं कृत्प्रत्ययो भवति ।यथा-

१. रामेण पत्रं लिखितम्। अत्र कर्मपदं 'पत्रम्' नपुंसकलिङ्गे प्रथमैकवचने प्रयुक्तम्; क्तप्रत्ययान्तं 'लिखितम्' नपुंसकलिङ्गे प्रथमैकवचनं जातम् ।

२. रामेण पत्राणि लिखितानि।

३. छात्रैः ग्रन्थौ पठितौ।

४. छात्रैः ग्रन्थाः पठिताः।

५. मया आम्राणि खादनीयानि।

६. त्वया चलचित्रं द्रष्टव्यम् ।

७. अस्माभिः निर्धनेभ्यः धनं देयम्।

८. युवाभ्यां वस्त्राणि देयानि।

९. तेन इदम् उक्तम्।

१०. मया आम्राणि खादितव्यानि।

ग) भाववाच्ये कर्मपदं नैव अवतिष्ठते। अतः कर्तृपदे तृतीया-विभक्तिः तथा च क्रियापदं लकारप्रत्ययान्ते सति सदा प्रथमपुरुषैकवचने व्यवह्रियते। यथा- 'रामेण हस्यते।' अत्र 'रामः' कर्तृपदं ३या विभक्तौ 'रामेण 'इति जातम् ;'हस्यते' क्रियापदं आत्मनेपदी प्रथमपुरुषैकवचने प्रयुक्तम्।

भाववाच्ये कृत्प्रत्ययान्तक्रियापदानि सदैव नपुंसकलिङ्गे प्रथमैकवचने प्रयुक्तं भवति। यथा- रामेण हसितम्। इत्यत्र 'क्त' प्रत्ययान्तं -'हसितम्' क्रियापदे नपुंसकलिङ्गस्य प्रथमाविभक्तौ एकवचने प्रयुक्तं कृतम्।

संक्षिप्तं वाच्यविधिः

१. कर्तृवाच्यम्-

क) कर्ता - प्रथमा विभक्तिः

ख) कर्म - द्वितीया विभक्तिः

ग) क्रिया - कर्तानुसारम्

१. लकारप्रत्ययः - कर्तुः पुरुष-वचनानुसारम्

२. कृत्प्रत्ययः - कर्तुः लिङ्ग-विभक्ति-वचनानुसारम्

१. क्रियापदम् (धातुरूपम्) - मूलधातुः + लकारः - लकारप्रत्ययः

२ .क्रियापदम् -मूलधातुः +कृत्प्रत्ययः +लिङ्ग-विभक्ति-वचनानि

२. कर्मवाच्यम्

क) कर्ता - तृतीया विभक्तिः

ख) कर्म - प्रथमा विभक्तिः

ग) क्रियापदम् - कर्मानुसारं (आत्मनेपदी + यकारागमः)

१. लकारप्रत्ययः - कर्मणः पुरुषवचनानुसारम्

२ .कृत्-प्रत्ययः - कर्मणः लिङ्ग-विभक्ति-वचनानुसारम्

१. क्रियापदम् (धातुरूपम्) - मूलधातुः+य्+ लकार-लकारप्रत्ययः (आत्मनेपदी)

२. क्रियापदम् - मूलधातुः + कृत्प्रत्ययः + लिङ्गविभक्तिवचनानि

३. भाववाच्यम्

क) कर्ता - तृतीयाविभक्तिः

ख) कर्म - नास्ति

ग) क्रियापदम् -

१. लकारप्रत्ययः - प्रथमपुरुषैकवचनम् (आत्मनेपदी+'य' आगमः)

२. कृत्प्रत्ययः - नपुंसकलिङ्गं-प्रथमैकवचनम्।

वाच्ये व्यवहृतकृत्प्रत्ययानां विवरणम्

केचन कृत्प्रत्ययानां वाच्येषु व्यवहारज्ञानं समुपस्थाप्यते-

क) तव्य- 'कुर्यात्' अर्थे भाववाच्ये कर्मवाच्ये वा 'तव्य' प्रत्ययो भवति। उदाहरणं यथा-

दा-दातव्य,

श्रु – श्रोतव्य,

भू- भवितव्य,

कृ – कर्तव्य,

गम् – गन्तव्य।

ख) अनीयर्- उचितार्थे भाववाच्ये कर्मवाच्ये धातौ 'अनीयर्' प्रत्ययो भवति । यथा - पा- पानीयः श्रू- श्रवणीय, कृ-करणीय, स्मृ-स्मरणीय, रम्-रमणीय, दृश्-दर्शनीय; रक्षणीय - रक्ष् ।

ग) यत्- 'अचो यत्' इति सूत्रेण उचितार्थे भाववाच्ये कर्मवाच्ये स्वरान्तधातौ यत्प्रत्ययः प्रयुक्तं भवति। यथा - जि-जेय, नी-नेय, श्रु-श्रव्य, भु-भव, दा-देय, गा-गेय, गम्-गम्य, नम-नम्य।

घ) ण्यत् - 'ऋ-हलोर्ण्यत्' इति सूत्रेण उचितार्थे भाववाच्ये कर्मवाच्ये ऋकारान्त-व्यञ्जनान्तधातौ ण्यत् प्रत्ययो भवति। यथा - कृ-कार्य, धृ-धार्य, हृ-हार्य, आ + रुज्- आरोग्य आदिः। '

ङ.) क्यप् - 'एति-स्तु-शास्-वृ-दृ-जुषः क्यप्' इति सूत्रेण उचितार्थे भाववाच्ये कर्मवाच्ये कृ,भू,स्तु, शास् आदिधातुषु क्यप् प्रत्ययो भवति। यथा-

कृ-कृत्य,

तृ- भृत्य,

स्तु- स्तुत्य।

च) शतृ - 'लट् शतृशानचवप्रथमा समानाधिकरणे' इति सूत्रेण असमापिकाकार्ये वर्तमानकाले परस्मैपदिधातोः शतृ प्रत्ययो भवति।

यथा- चल्- चलत्,

रुद्- रुदत्,

भू – भवत्।

छ) शानच् - 'लट् शतृशानचवप्रथमा समानाधिकरणे' इति पूर्वोक्तसूत्रानुसारम् असमापिकाकार्ये वर्तमानकाले आत्मनेपदिधातोः शानच् प्रत्ययो भवति। यथा-

वृत् – वर्तमान,

वृध्- वद्धमान,

मा – म्रियमान।

कर्मवाच्ये अपि- कृ- क्रियमान,

वच् – उच्यमान।

ज) स्यतृ - भविष्यत्काले परस्मैपदिधातोः कर्तृवाच्ये 'स्यतृ" प्रयुक्तं भवति। यथा

भू- भविष्यत्,

गम् – गमिष्यत्,

हन् – हनिष्यत्।

झ) स्यमान् - भविष्यत्काले आत्मनेपदिधातोः कर्तृवाच्ये स्यमान भवति। यथा -

वक्ष् – वक्ष्यमान,

सेव्- सेविष्यमान,

जन – जनिष्यमान।

ञ) क्त - साधारणतः अतीतकाले कर्मवाच्ये भाववाच्ये च क्तप्रत्ययो भवति। सकर्मकधातोः कर्मवाच्ये प्रयुक्तः क्त प्रत्ययः तिङन्तशब्दः कर्मणः विशेषणे भवति तथा च कर्मणः लिङ्ग-विभक्ति वचनानि उपलभ्यन्ते। यथा - कुम्भकारेण घटः कृतः/ घटौ कृतौ / घटाः कृताः। अकर्मकधातौ कर्तृवाच्ये क्तप्रयोगो भवति, अयं कर्तुः विशेषणं भवति। यथा - सः जागरितः, सा भीता।

गमनार्थकधातौ कर्मवाच्ये क्तप्रयुक्तो भवति। यथा-'सः ग्रामं गतः', 'सः गृहं प्रस्थितः'। शी-स्थादिधातवः अकर्मके सति उपसर्गयुक्तत्वात् सकर्मको भवति चेत् तत्रापि क्तप्रत्ययो भवति ।यथा- सः गृहम् अधिशयितः, वानरो वृक्षम् आरूढः।

अकर्मक - अविवक्षितकर्मकधातूनां भाववाच्ये क्तप्रयुक्तो भवति। तत्र च समापिकाक्रियासदृशं सदैव नपुंसकैकवचने व्यवह्रियते। यथा - तेन कृतम्, तैः कृतम्, युस्माभिः कृतम्।

विशेष्यपदमिव व्यवहृते सति अकारान्तनपुंसकरूपवत् चलति। यथा -गतम्, गते, गतानि; कृतम्, कृते, कृतानि।

ट) क्तवतु- अतीतकाले कर्तृवाच्ये क्तवतुप्रत्ययो प्रयुक्तो भवति। एते शब्दाः कर्तुः विशेषणं भवति। कर्तुः लिङ्ग-विभक्ति - वचनानुसारं जायते। यथा-

१. सः पुस्तक पठितवान्।

२. तौ पुस्तकं पठितवन्तौ।

३. ते पुस्तकं पठितवन्तः ।

ठ) क्तिन् - भाववाच्ये धातोरन्ते क्तिन् प्रत्ययो भवति । क्तिन् प्रत्ययान्तशब्दाः स्त्रीलिङ्गे भवन्ति । यथा-

गै - गीतिः

स्था- स्थितिः

भी- भीतिः

ड) पक् - कतृवाच्यस्य धातोरन्ते पक् (अक्) प्रत्ययः प्रयुङ्क्ते। यथा-

नी – नायकः,

श्रु – श्रावकः,

पच् – पाचकः।

ढ) तृन् (तृच्) धातोः अन्ते कर्तृवाच्ये तृन् प्रत्ययो भवति । यथा-

कृ + तृन् = कर्तृ,

दा- दाता,

विद् – वेत्ता,

धृ – धाता,

वच् – वक्ता,

श्रु – श्रोता,

त्रै- त्राता।

ण) अनट् (ल्युट्) - भाववाच्यस्य धातौ अनट् प्रत्ययो भवति। अनट् प्रत्ययान्तपदं नपुंसके भवति। यथा -

गम् – गमनम्,

भुज् – भोजनम्,

पत् – पतनम्,

शी – शयनम्,

गर्ज – गर्जनम्,

स्ना – स्नानम्,

कृ – करणम्।

त) घञ् -भाववाच्यार्थे- भाववाच्य-कर्तृवाच्ये विना अन्य-कारकवाच्यस्य धातोः अन्ते 'घञ्' प्रत्ययो भवति। यथा-

कर्मवाच्यार्थे - प्रकर्षेण क्रियते यः सः - प्रकारः (प्र-कृ+घञ्)।

करणार्थे - पद्यते (गम्यते) अनेन इति - पदम् (पद् + घञ्)।

१४.८ वाच्यपरिवर्तनम्

कर्ताभेदः - प्रथमपुरुषः (तिङन्तक्रिया)

कर्तृवाच्यम् -	कर्मवाच्यम् -
१. कुम्भकारः घटं करोति।	कुम्भकारेण घटः क्रियते।
२. कुम्भकारः घटौ करोति।	कुम्भकारेण घटौ क्रियेते।

३. कुम्भकारः घटान् करोति। कुम्भकारण घटाः क्रियन्ते ।

कर्मभेदः - मध्यमपुरुषः (तिङन्तक्रिया)

४. गुरुः त्वां निन्दति गुरुणा त्वं निन्द्यसे

५. गुरुः युवां निन्दति गुरुणा युवां निन्द्यथे

६. गुरुः युष्मान् निन्दति गुरुणा यूयं निन्द्यध्वे

कर्मभेदः – उत्तमपुरुषः (तिङन्तक्रिया)

७. पिता मां पश्यति पित्रा अहं दृश्ये

८. पिता आवां पश्यति पित्रा आवां दृश्यावहे

९. पिता अस्मान् पश्यति पित्रा वयं दृश्यामहे

पुंलिङ्गकर्मभेदः (कृदन्तक्रिया)

१०. रामः राक्षसं हतवान् रामेण राक्षसः हतः

११. रामः राक्षसौ हतवान् रामेण राक्षसौ हतौ

१२. रामः राक्षसान् हतवान् रामेण राक्षसाः हताः

स्त्रीलिङ्गकर्मभेदः (कृदन्तक्रिया)

१३. बालिका नदीं दृष्टवती बालिकया नदी दृष्टा

१४. बालिके नद्यौ दृष्टवत्यौ बालिकाभ्यां नद्यौ दृष्टे

१५. बालिकाः नदीः दृष्टवत्यः बालिकाभिः नदीः दृष्टाः

नपुंसकलिङ्गकर्मभेदः (कृदन्तक्रिया)

१६. मम मित्रं फलं लब्धवान् मम मित्रेण फलं लब्धम्

१७. मम मित्रे फले लब्धवती मम मित्राभ्यां फले लब्धे

१८. मम मित्राणि फलानि लब्धवन्तः मम मित्रैः फलानि लब्धानि

अन्तोदाहरणानि (कर्तृवाच्यात् - कर्मवाच्यम्)

धातुः	कर्तृवाच्यम्	कर्मवाच्यम्
१.पठ्	सः पुस्तकं पठति।	तेन पुस्तकं पठ्यते ।
२. पठ्	ते ग्रन्थं पठन्ति ।	तैः ग्रन्थः पठ्यते।
३. दृश्	रामः वानरान् पश्यति।	रामेण वानराः दृश्यन्ते ।
४. याच्	वामनः बलिं वसुधां याचते।	वामनेन बलिः वसुधा याच्यते
५. दृश्	अहं त्वं पश्यामि ।	मया त्वं दृश्यसे
६. कृ	सः कार्यं करोति	तेन कार्यं क्रियते ।
७ .लिख्	तौ लेखं लिखतः	ताभ्यां लेखः लिख्यते ।
८. वप्	कृषकः वीजान् वपति	कृषकेन वीजा वप्यन्ते ।
९ .पच्	सूदः तण्डुलान् ओदनं पचति।	सूदेन तण्डुलाः ओदनं पच्यन्ते
१०. खन्	कुम्भकारः भूमिं खनति।	कुम्भकारेण भूमिः खन्यते ।
११. दृश्	रामः तं पश्यति	रामेण सः दृश्यते।
१२. दृश्	सः त्वां पश्यति	तेन त्वं दृश्यसे।
१३. दृश्	अहं रामं पश्यामि	मया रामः दृश्यते।
१४. लिख्	त्वं लेखं लिखसि	त्वया लेखः लिख्यते।
१५. श्रु	अहं कथां श्रृणोमि	मया कथा श्रूयते
१६ .वद्	भवन्तः लोकान् वदन्ति	भवद्भिः श्लोकाः उच्यन्ते
१७. कथ्	ते वार्तां कथयन्ति	तैः वार्ता कथ्यते
१८. कृ	कवयः कवितां कुर्वन्ति	कविभिः कविता क्रियते।
१९. दा	सः विप्राय गां ददाति	तेन विप्राय गौ दीयते
२० पा	बालः पयः पिबति।	बालेन पयः पीयते
२१ .भुज्	अयम् ओदनं भुङ्क्ते।	अनेन ओदनं भुज्यते
२२. हन्	वीरः शत्रुं हन्ति	वीरेण शत्रुः हन्यते।
२३. वद्	वयम् अनृतं न वदामः ।	अस्माभिः अनृतं न उद्यते।
२४. ग्रह् युवां	पुस्तकं गृह्णाति ।	युवाभ्यां पुस्तकं गृह्यते ।
२५.प्रह	राजपुरुषाः चौरं प्रहरन्ति।	राजपुरुषैः चौरः प्रह्रियते ।
२६. ज्ञा	बालिका इमं विषयं न जानाति ।	बालिकया अयं विषयः न ज्ञायते ।
२७. कृदन्त	तावत् तौ रिक्तं भाण्डं दृष्टवन्तौ ।	तावत् ताभ्यां रिक्तः भाण्डः दृष्टः ।
२८. कृदन्त	रुदती बालिका रम्यम् उद्यानं गतवती ।	रुदत्या बालिकया रम्यम् उद्यानं गतम् ।
२९. कृदन्त	भो कान्त, त्वम् आनीतवान् भोजनम् ।	भो कान्त, त्वया आनीतं भोजनम् ।

३०. कृदन्त	वने भ्राम्यन् अहं व्याघ्रमेकं दृष्टवान्।	वने भ्राम्यता मया व्याघ्रः एकः दृष्टः।

कर्तृवाच्यात् – भाववाच्यम् उदाहरणानि

धातु	कतृवाच्यम्	भाववाच्यम्
१. नृत्	मयूराः नृत्यन्ति।	मयुरैः नृत्यते।
२. जीव्	वयम् अन्नेन जीवामः।	अस्माभिः अन्नेन जीव्यते।
२. वस्	त्वं तत्र वसति।	त्वया अत्र उष्यते।
४. स्वप्	सः गृहे स्वपिति।	तेन गृहे सुप्यते।
५. स्था	ते तत्र तिष्ठन्ति।	तैः तत्र स्थीयते।
६. रुच्	मह्यं मोदकं रोचते।	मह्यं मोदकेन रुच्यते।
७. भी	त्वं सर्पात् विभेषि।	त्वया सर्पात् भीयते।
८. शीङ्	भवान् कुत्र शेते।	भवता कुत्र शय्यते।
९. खेल्	छात्राः खेलन्ति।	छात्रैः खेल्यते।
१०. द्यूत्	रात्रौ चन्द्रः द्योतते।	रात्रौ चन्द्रेण द्योत्यते।
११. जागृ	विवेकी सदा जागर्ति।	विवेकिना सदा जागर्यते।
१२.भू	त्वं राजा भविष्यसि	त्वया राज्ञा भविष्यते।
१३. वृत्	अथ क्व वर्तते भगवान् स्वामी चन्द्रः।	अथ क्व वर्त्यते भगवता स्वामिना चन्द्रेण।

१४.९. प्रचलिताना धातूनां कर्मवाच्य-भाववाच्ययोः विस्तृतं रूपम् –

अत्र केषाञ्चनधातूनां कर्मवाच्य-भाववाच्ययोः रूपाणि

तावत् लट्लकारे समुपस्थापितानि-

लट्लकारः

१. धातुः – पठ् (कर्तृवाच्ये – पठति)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपु.	पठ्यते	पठ्येते	पठ्यन्ते
मध्यमपु.	पठ्येसे	पठ्येथे	पठ्यध्वे
उत्तमपु.	पठ्ये	पठ्यावहे	पठ्यामहे

२. धातु-लिख् (कर्तृवाच्ये – लिखति)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रभमपु.	लिख्यते	लिख्येते	लिख्यन्ते
मध्यमपु.	लिख्यसे	लिख्येथे	लिख्यध्वे
उत्तमपु .	लिख्ये	लिख्यावहे	लिख्यामहे

३.धातु-गम् (कर्तृवाच्ये – गच्छति)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रभमपु.	गम्यते	गम्येते	गम्यन्ते
मध्यमपु.	गम्यसे	गम्येथे	गम्यध्वे
उत्तमपु	गम्य	गम्यामहे	गम्यावहे

४.धातु-भू (कर्तृवाच्ये – भवति)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रभमपु.	भूयते	भूयेते	भूयन्ते
मध्यमपु.	भूयसे	भूयेथे	भूयध्वे
उत्तमपु	भूये	भूयावहे	भूयामहे

६.धातु-नी (कर्तृवाच्ये – नयति)

पुरुषः	एकवचनम्	बहुवचनम्	द्विवचनम्
प्रभमपु.	नीयते	नीयन्ते	नीयेते
मध्यमपु.	नीयसे	नीयेथे	नीयध्वे
उत्तमपु.	नीये	नीयावहे	नीयामहे

धातु-दा (कर्तृवाच्ये – ददाति)

पुरुषः	एकवचनम्	बहुवचनम्	द्विवचनम्
प्रभमपु.	दीयते	दीयन्ते	दीयेते
मध्यमपु.	दीयसे	दीयेथे	दीयध्वे
उत्तमपु	दीये	दीयावहे	दीयामहे

७. धातु-स्मृ (कर्तृवाच्ये – स्मरति)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपु.	स्मर्यते	स्मर्येते	स्मर्यन्ते
मध्यमपु.	स्मर्यसे	स्मर्येथे	स्मर्यध्वे

उत्तमपु.	स्मर्ये	स्मर्यावहे	स्मर्यामहे

८.धातु-दृश् (कर्तृवाच्ये – पश्यति)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रभमपु.	दृश्यते	दृश्येते	दृश्यन्ते
मध्यमपु.	दृश्यसे	दृश्येथे	दृश्यध्वे
उत्तमपु	दृश्ये	दृश्यावहे	दृश्यामहे

९.धातु-हस् (अकर्मक- कर्तृवाच्ये – ददाति)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रभमपु.	हस्यते	हस्येते	हस्यन्ते
मध्यमपु.	हस्यसे	हस्येथे	हस्यध्वे
उत्तमपु	हस्ये	हस्यावहे	हस्यामहे

धातु-स्था (अकर्मक) (कर्तृवाच्ये – तिष्ठति)

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपु.	स्थीयते	थीयेते	स्थीयन्ते
मध्यमपु.	स्थीयसे	स्थीयेथे	स्थीयध्वे
उत्तमपु.	स्थीये	स्थीयावहे	स्थीयामहे

क) णिजन्तधातूनां वाच्यपरिवर्तनम्

किमपि कार्यं परोक्षरूपेण अन्येन केनचित् करणार्थे 'णिच्' प्रत्ययो भवति। यथा- कृ+ णिच् = कारि-कारयति, कारयते। येन कार्यं क्रियते अर्थात् णिजन्तक्रियायाः कर्त्रा यह नियुज्यते स प्रयोज्यकर्ता उच्यते । अन्यच्च यः कार्यं कारयति सः प्रयोजककर्ता उच्यते। यथा- शिशुः शेते – इत्यत्र शिशुः स्वतन्त्रकर्ता । परन्तु माता शिशुं शाययति – इत्यत्र माता प्रयोजककर्ता, 'शिशु' प्रयोज्यकर्ता । गमनार्थः (गम्) ज्ञानार्थः (बुध्), भोजनार्थः (अश्), शब्दकर्मकम् (अधि-इ) अकर्मकम् (शी) धातूनां प्रयोगे प्रयोज्यकर्तरि कर्मसंज्ञा भवति तथा च तत्र द्वितीयाविभक्तिः भवति।

णिजन्तवाक्यं कर्मवाच्ये परिवर्तयितुं कर्मणि द्वितीयाविभक्तियुक्तप्रयोज्यकर्तरि प्रथमाविभक्तिः भवति, क्रियापदं च कर्माधीनं वर्तते। पुनश्च अन्यत् कर्मपदं तिष्ठति चेत् तत्र द्वितीयाविभक्तिः एव भवति। यथा-

अणिजन्तवाक्यम्	**णिजन्तवाक्यम्**
रामः पञ्चवटीं गच्छति	दशरथः रामं पञ्चवटीं गमयति।

वाच्यपरिवर्तनम् – दशरथेन रामः पञ्चवतीं गम्यते।

ख) कृत्यप्रत्ययान्तक्रियायाः वाच्यपरिवर्तनम् –

उचितार्थे भतिष्यत्कालार्थे कर्मवाच्य-भाववाच्ययोः तव्य-अनीयर्-ण्यत् – यत् – क्यत् – केलिमर – प्रत्ययाः प्रयोजनानुसारं प्रयुज्यते। एते कृत्प्रत्ययाः उच्यन्ते। तद्वाक्यं कर्मवाच्य-भाववाच्यात् कर्तृवाच्ये परिवर्तयितुमपि शक्यते। तत्र च लृट् विधिलिङ विभक्तिः भवति।

यथा-

कर्मवाच्यम्	**कर्तृवाच्यम्**
कार्यमिदं मया करणीयम्।	अहं कार्यमिदं करिष्यामि / कुर्यास।
अस्माभिः रामायणं पाठ्यम्।	वयं रामायणं पठेम / पठिष्यामः।

१४.१० अध्यायस्य असमीयाभाषायां सारांशः

দুটা বা ততোধিক পদ গোট খাই থকা বুজালে, তাক বাক্য বোলে। বাক্য দুবিধ - পূর্ণবাক্য আৰু খণ্ড বাক্য। যি বাক্যত কথা এটা সম্পূর্ণৰূপে প্ৰকাশ পায়, তাকেই পূর্ণবাক্য বোলে। যি বাক্যত কথা এটাৰ এটা খণ্ড মাথোন প্ৰকাশ পায়, তাকেই খণ্ড বাক্য বোলে। সংস্কৃত বাক্যত সামান্যভাবে তিনি প্ৰকাৰৰ পদ সংঘটন (ক্ৰম) দেখিবলৈ পোৱা যায়- (১) কর্তা আৰু কর্ত্তাৰ বিশেষণ, অথবা কর্ত্তাৰ বিশেষত্ব বুজোৱা গুণবাচক শব্দ, (২) কর্ম, তথা কর্মৰ বিশেষণ, (৩) ক্ৰিয়া পদ।

প্ৰত্যেক পূর্ণ বাক্যৰ পদসংগতি তিনি প্ৰকাৰ। এই পদ সংগতিক বাক্যৰ বাচ্য বোলে। বচ্ +ণ্যৎ = বাচ্য + (বক্তব্য)। যি ঠাইত যিটো প্ৰধানভাবে বক্তব্য, সেই ঠাইত সেইটোৱেই বাচ্য। মানুহে মনোগত ভাৱক বাক্যৰ ৰূপত প্ৰকট কৰে আৰু এই বাক্য এই তিনিপ্ৰকাৰ বাচ্যত প্ৰকাশিত হয়।

এই অধ্যায়ত আপুনি বাচ্যৰ বিভিন্ন প্ৰকাৰ, বাচ্যত প্ৰত্যয়ৰ ব্যৱহাৰ, বাচ্য পৰিৱৰ্তন আদি বিভিন্ন বিষয় অধ্যয়ন কৰিব পাৰিব।

বাচ্যৰ প্ৰকাৰ

সংস্কৃতত বাচ্য চাৰি প্ৰকাৰৰ পোৱা যায়। সেইকেইটা হ'ল- কৰ্তৃবাচ্য, কৰ্মবাচ্য, ভাববাচ্য আৰু কৰ্তৃ-কৰ্মবাচ্য অথবা কৰ্ম-কৰ্তৃবাচ্য।

১) কৰ্তৃবাচ্য (Active voice): যি বাচ্যত (অথবা বাক্যত) কৰ্তা পদটোৱেই প্ৰধান বক্তব্য বিষয় তাকেই কৰ্তৃবাচ্য বোলে।

২) কৰ্মবাচ্য (Passive voice): যি বাচ্যত কৰ্ম পদটোৱেই প্ৰধান বক্তব্য বিষয়, তাকেই কৰ্মবাচ্য বোলে।

৩) ভাৱবাচ্য (Neuter Voice): যি বাচ্যত ক্ৰিয়াপদ (ভাৰ) টোৱেই প্ৰধান বক্তব্য বিষয়, তাকেই ভাৱবাচ্য বোলে।

৪) কৰ্ম-কৰ্তৃবাচ্য (Passive- Active Voice): যি বাচ্যত কৰ্মপদে নিজস্ব গুণৰ দ্বাৰা কৰ্ত্তাৰ দৰে কৰা দেখুৱাই, সেয়ে কৰ্ম-কৰ্তৃবাচ্য।

কৰ্তৃবাচ্য

কৰ্তৃবাচ্যত কৰ্তা পদটোৱেই প্ৰধান বক্তব্য বিষয়। এই বাচ্যত কৰ্তাত প্ৰথমা বিভক্তি, কৰ্ম থাকিলে, কৰ্মত দ্বিতীয়া বিভক্তি আৰু ক্ৰিয়াটো কৰ্ত্তাৰ পুৰুষ আৰু বচন অনুসৰি হয়। কৰ্তৃবাচ্যত কৰ্ত্তাপদক 'উক্ত' (Mainly Spoken About) বুলি কোৱা হয় আৰু তাত প্ৰথমা বিভক্তি ব্যৱহৃত হয়। এই কৰ্ত্তাপদটোক 'উক্তে কৰ্তৰি প্ৰথমা' বোলা হয়। এই বাচ্যত কৰ্মপদ থাকিলে তাত দ্বিতীয়া বিভক্তি হয় আৰু এনেকুৱা কৰ্মপদক 'অনুক্ত' বুলি কোৱা হয়। এই কৰ্মপদটোক 'অনুক্তে কৰ্মণি দ্বিতীয়া' বোলে। যেনে-

সকৰ্মক (কৰ্ম থকা) বাক্যৰ উদাহৰণ-

১) স চন্দ্রং পশ্যতি।

২) তৌ গ্রামান্ গচ্ছতঃ।

৩) তে নগৰং গচ্ছন্তি।

৪) বালিকা গ্রন্থং পঠতি।

৫) ত্বং পয়ঃ পিবসি।

৬) যুবাং গীতং গায়থঃ।

৭) য়ুয়ং গৃহং গচ্ছথ।

৮) অহং পুস্তকং পঠামি।

৯) আবাং মন্দিৰং গচ্ছাবঃ।

১০) বয়ং কণ্ডুকং ক্রীড়ামঃ।

অকর্মক (কর্ম নথকা) বাক্যৰ উদাহৰণ-।

১) শিশুঃ হসতি।

২) বালকঃ ক্রীড়তি।

৩) তে নৃত্যন্তি।

৪) ত্বং হসসি।

৫) অহম্ গচ্ছামি।

কর্মবাচ্য

কর্মবাচ্যত কর্মপদটোৱেই প্রধান বক্তব্য বিষয়। এই বাচ্যৰ কর্ত্তাত তৃতীয়া বিভক্তি, কর্মত প্রথমা বিভক্তি আৰু ক্রিয়াটো কর্মৰ পুৰুষ আৰু বচন অনুযায়ী হয়। কর্মবাচ্যত কর্ম পদটোক উক্ত বোলে, সেই কাৰণে ইয়াত প্রথমা বিভক্তি ব্যৱহাৰ কৰা হয় আৰু এনেকুৱা কর্মপদক 'উক্তে কর্মণি প্রথমা' বোলা হয়। কর্মবাচ্য আৰু ভাৱবাচ্যৰ কর্ত্তাত তৃতীয়া বিভক্তি হয় আৰু এনেকুৱা কর্ত্তাক 'অনুক্তে কর্তৰি তৃতীয়া' বোলে। কর্মবাচ্য আৰু ভাৱবাচ্যৰ ক্রিয়াৰ ধাতু আত্মনেপদী হয়। লট্, লোট্, লঙ্ আৰু বিধিলিঙ্ ত ধাতুৰ পাছত 'য়' যোগ হয়। অকর্মক সমাপিকা ক্রিয়া থকা বাক্যত কর্মবাচ্য হ'ব নোৱাৰে। কর্মবাচ্যৰ উদাহৰণ-

১) তেন চন্দ্রো দৃশ্যতে।

২) তাভ্যাং গ্রামাঃ গম্যন্তে।

৩) তৈঃ অন্নং ভূজ্যতে।

৪) ত্বয়া পয়ঃ পীয়তে।

৫) যুৱাভ্যাং গীতিঃ গীয়তে।

৬) যুস্মাভিঃ বস্ত্রং পৰিধীয়তে।

৭) ময়া পুস্তকং পঠ্যতে।

৮) আবাভ্যাং শিবঃ পূজ্যতে।

৯) অস্মাভিঃ সন্ধ্যা উপাস্যতে।

ভাৱবাচ্য

ভাৱবাচ্যত ক্রিয়াপদ (ভাৱ) টোৰেই প্রধান। অকর্মক ধাতুৰ পাছত ভাৱবাচ্যৰ প্রয়োগ হয়। ভাৱবাচ্যৰ কর্ত্তাত তৃতীয়া বিভক্তি হয়, কর্মপদ নাথাকে আৰু ক্রিয়াপদ, ধাতুৰূপ কৰা ধৰণে প্রয়োগ হ'লে (যেনে- গম্যতে, খাদ্যতে) সদায়ে আত্মনেপদৰ প্রথম পুৰুষৰ একবচনত প্রয়োগ হয়। আনহাতে ক্রিয়াপদ ক্ত, তব্য আদি প্রত্যয়ৰ দ্বাৰা সাধিত হ'লে, সদায়ে ক্লীৱলিঙ্গৰ প্রথমা একবচনত প্রয়োগ হয় (যেনে- গন্তব্যম্, খাদিতম্ ইত্যাদি)। উদাহৰণ-

১) শিশুনা হস্যতে।

২) তৈঃ নৃততে।

৩) তেন ভূয়তে।

৪) ত্বয়া ৰুদ্যতে।

৫) ময়া গম্যতে।

৬) যুগ্মাভিঃ স্থীয়তে।

৭) তাভ্যাং ক্রুধতে।

৮) তেন গতম্।

৯) যুবকৈঃ হসিতম্।

১০) অস্মাভিঃ স্থাতব্যম্।

কর্মকর্তৃবাচ্য

'ক্রিয়মাণস্তু যৎকর্ম স্বয়মেব প্রসিধ্যতি।

সুকৰৈঃ স্বৈগুণৈকর্তৃঃ কর্মকর্ত্তেতি তদ্বিদুঃ।।'

কর্ম-কর্তৃবাচ্যত কর্মই নিজে কর্ত্তাৰ দৰে কার্য্য কৰা দেখা যায় আৰু ক্রিয়াৰ ৰূপ কর্মবাচ্যৰ দৰে হয়। এই বাচ্যত সকর্মক ক্রিয়া অকর্মকৰ দৰে ব্যৱহাৰ হয়। ইয়াত কর্মই কর্ত্তাৰ দৰে কাম কৰে, সেই কাৰণে তাক কর্মকর্তা বোলে আৰু তাত প্রথমা বিভক্তি হয়। এই বাচ্যত ক্রিয়া আত্মনেপদী হয় আৰু লট্, লঙ্, লোট্, বিধিলিঙ্ ত ধাতুৰ পিছত 'য়' কাৰ যোগ হয়। এই বাচ্যৰ বাক্যক ভাৱবাচ্যলৈও নিব পাৰি। উদাহৰণ-

কর্তৃবাচ্য	**কর্মকর্তৃবাচ্য**	**ভাৱবাচ্য**
গজঃ বৃক্ষং ভিনত্তি	বৃক্ষঃ (স্বয়মেব) ভিদ্যতে	বৃক্ষেণ ভিদ্যতে (স্বয়মেব)
পাচকঃ ওদনং পচতি	ওদনঃ (স্বয়মেব) পচ্যতে	ওদনঃ পচ্যতে (স্বয়মেব)

१४.११. अध्यायात् किमवगतम्

अस्य अध्यायस्य अध्ययनं कृत्वा भवान्-

- संस्कृतवाच्यज्ञानं सञ्जातम्।
- वाच्यप्रकारविषये ज्ञानमभवत्।
- वाच्यपरिवर्तननियमानां ज्ञानमभवत्।
- वाच्यपरिवर्तनं कर्तुमर्होऽभवत्।

१४.१२ ज्ञानाधिक्यम

१. लघुसिद्धान्तकौमुदी, श्रीमद्वरदराजविरचिता।

२. समग्रव्याकरणकौमुदी, ईश्वरचन्द्रविद्यासागरविरचिता।

३. संस्कृतव्याकरणप्रभा, डॉ हरिश्चन्द्र भट्टाचार्यविरचिता।

१४.१३. अग्रगत्याः निरूपणम्

प्रश्नः १- उत्तरम्-

१. तेन पठ्यते।

२. बालेन ग्रन्थः पठ्यते।

३. छात्रः पाठं पठ्यते।

४. रामेण ओदनं खाद्यते।

५. रामेण तत्र स्थीयते ।

प्रश्नः २ – उत्तरम्

१. भूयते।

२. नीयते।

३. पठ्यते।

४. उच्यते।

५. हन्यते।

⍰१४.१४. अभ्यासप्रश्नाः

(क) वस्तुधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ५० शब्देषु लिखन्तु)।

वाच्यपरिवर्तनं कुरु -

१. अहं रामं पश्यामि ।

२. त्वया लेखाः लिख्यते।

३. अस्माभिः अन्नेन जीव्यते ।

४. कवयः कवितां कुर्वन्ति ।

५. बालिकया अन्नं पश्यन्ति।

(ख) संक्षेपप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं १५० - ३०० शब्देषु लिखन्तु)।

टीप्पणी प्रदेया

१. सकर्मकधातुः

२. द्विकर्मकधातुः

(ग) रचनाधर्मीप्रश्नाः (प्रत्येकानां प्रश्नानाम् उत्तरं ३०० - ५०० शब्देषु लिखन्तु)।

१. वाच्यस्य प्रकारान् विलिख्य व्याख्यां कुर्वन्तु।

*****